shrimadh.udupa@gmail.com

॥ अथ धर्मवृत्तिलारंभः ॥

shrinath.udupa@gmail.com

अथधर्मप्रवृत्तानुक्रमः

पृष्ठ	विषय	पृष्ठ	विषय	पृष्ठ	विषय	पृष्ठ	विषय	पृष्ठ	विषय
१	प्रातःकालेविष्णुस्मरणं		नदीरजोदोषः		अथसंध्याप्रयोगः		अथोपस्थानंगृह्यपरिशिष्टे		अथनिषेधः
	अथमौनविधिः		अथकुशविधिः		अथसंध्यामुपशिष्यइति-		अथसायं		अथप्रसंगान्मध्यान्हसं-
	अथशौचविधिःविण्मूत्रा		अथपवित्रलक्षणं		संकल्पमुच्चारयेत्		अथसायंकालजपविशेष		ध्योच्यते
	दीनां		अथयज्ञोपवीतविधिः		अथगायत्रीजपः		माह	१४	अथाभिवादनं
२	गंडूषविधिः	७	अथतिलकविधिः		अथगायत्रीन्यासः	१२	अथपुराणाचमनं		अथवर्ज्यानाह
	आचमनपवित्रविधिः		अथत्रिपुंड्रविधिः		अथाक्षरन्यासः		अथश्रुत्याचमनं		अथहोमविधिः
	दंतधावनविधिः	८	धारणप्रकारः	१०	अथक्रमेणध्यानानि		अथप्राणायामः		अथशक्तंप्रतिसएवाह
	दंतधावननिषेधः		अथसंध्याकालः		अथासनानि	१३	अथमार्जनंकारिकायां		प्रातर्होमस्यकालमाहमनुः
३	स्नानविधिः		अथकाललोपप्रायश्चित्तं		अथरुद्राक्षधारणम्		अथार्घ्यदानं		अथधर्मप्रवृत्तोऽपासन-
५	अथवस्त्रविधिः	९	अथसंग्रहेसंध्याविधिः	११	अथमुद्राः		अथजपविधिः		विधिः
	अथसचैलस्नानं		अथसंध्याकालः		अथगायत्रीतर्पणं		अथप्रदोषेजपः		अथस्थंडिलादिषु
६	अन्यस्नातकूपस्नानविधिः		अथदेशः		अथसंध्यातर्पणं		अथजपस्थानानि		अथसमस्यहोमः

shrinath.udupa@gmail.com

१५ अथसंग्रहेपंचयज्ञाः
अथवैश्वदेवः
१६ अथाविभक्तैवैश्वदेवः
अथधर्मप्रवृत्तौब्रह्मयज्ञः
अथतिलतर्पणंस्मृत्यर्थसारे
१७ श्राद्धादिनेतर्पणं
अथसंग्रहेतर्पणविधिः
१८ अथयमतर्पणं
अथभीष्मतर्पणं
अथधर्मप्रवृत्तौदिवातीत-
कर्माणि
अथदेवतार्चनविधिः
अथसंग्रहेदेवतार्चनविधिः
२० अथगुरुपूजा
अथसायंप्रातरितिसूत्रं
अत्रकारिका
अथगृहबलिः
२१ अथसंग्रहेमनुष्ययज्ञः
भिक्षादिलक्षणं
अथसंग्रहेनित्यश्राद्धवि-
धिः
अथधर्मप्रवृत्तौनित्यश्रा-
द्धविधिः
संग्रहेभोजनविधिः
२२ अथप्राणाहुतिकल्पः
२३ संग्रहेभोजनविधिः
अथभोजनेमंडलं
अथकांस्यपात्रं
भोजनेपात्राणि
निषिद्धानिपात्रानि
२४ अथानिषिद्धान्न
अथवमनविधिः
अथतांबूलविधिः
अथदीपाः
अथसंग्रहेतांबूलविधिः
२५ अथप्रसंगात्संग्रहनिर्णयः
अथग्रहणनिर्णयः
अथवान्नप्रस्थधर्माः
अथाग्निहोत्रविधिः
२६ अथचतुर्थः
अथप्रदोषः
२७ अथतिलतर्पणनिषेधकारः
२८ गायत्र्यर्थः
अथशिवपूजनं
२९ अथधर्मप्रवृत्तौगर्भाधान
शयनविधिः
अथपुंसवनम्
अथगर्भिणीधर्माः
अथगर्भिणीपतिधर्माः
अथजातकर्म
अथनामकरणं
३० अथनिष्क्रमणम्
अथचौलं
अथचूडानिषेधः
अथशिशुलक्षणं
अथकर्मलोपप्रायश्चित्तं
अथाक्षरस्वीकारः
अथनक्षत्राणि
अथोपनयनं
उपनयनकर्त्तारः
गुरुबलं
अथोपनयनेप्रतिषेधः
अथमातरिरजस्वलानि-
र्णयः
३१ अथानुप्रवचनं
ब्रह्मचारीनियमः
महानाम्नी
अथोपाकर्म
अथानध्यायानाह
अथनैमित्तिकानाह
चातुर्मास्याद्वितियामाह
अथयुगादयः
अथमन्वादयः
अथाष्टकाः
अथसोपपदाः

shrinath.udupa@gmail.com

प्रदोषः
अथगोदानं
३२ समावर्तनं
अथवेदिः
रात्रिभागाः
ऋतुमतीविचारः
अथचतुर्थी
गृहप्रवेशः
देवकोत्थापनं
प्रतिकूलं
३३ विवाहादौसूतकोत्पत्तिविचारः
वज्यर्नाह
अथैकोदरविवाहः
३४ परिवेत्तादि

अथासंस्कृतरजोदोषविचारः
स्त्रीणांरजोदोषविचारः
द्वितीयविवाहनिमित्तं
३५ अग्निसंयोगः
औपासनातीतप्रायश्चितं
पुनःसंधानं
विधुरौपासनं
अथविधिमाह
मृतभार्यस्यपुनर्विवाहविषयेसंग्रहः
अर्कविवाहः
पुण्याहवाचनं
षोडशकर्माण्याह
३६ नांदीश्राद्धं

पादप्रक्षालनं
विवाहमासानाह
ज्येष्ठत्रयं
वरगुणानाह
कन्यागुणाः
सापिंड्यादिनिर्णयः
जीवत्पितृकश्राद्धविधिः
सापत्नमातृविषयं
३७ बहुपत्निकपुत्रविषयं
कर्माधिकारिणःपुत्राः
अन्येअधिकारिणः
अनुपनिताधिकारः
अथापुत्रविषये
वपनविधिः
अथप्रथमेहनिकर्ता

३८ दहनाग्निविचारः
नवश्राद्धानि
तत्रमध्येदर्शेविचारः
आस्थिसंचयनं
त्रिपुष्करयोगः
विभक्तैरपिप्रेतस्यश्राद्धमेकेनैवकार्यं
३९ वृषोत्सर्गः
आद्यश्राद्धं
सपिंडीकरणं
अथव्युत्क्रमणं
पुत्राभावे
अनुगमनेबौधायनः
ब्रह्मचारिसपिंडीकरणं
अथासन्निधानेज्येष्ठेसापिं ४२

४० डनविचारः
असन्निधानेपुत्रविषये
अनुमासिकं
प्रथमाब्देकर्तव्यं
संवत्सरविमोकश्राद्धं
पितामहश्राद्धं
४१ विभक्तश्राद्धं
अविभक्तश्राद्धं
मृताहविषयेस्मृतिः
अन्नश्राद्धविधिः
आमश्राद्धं
हिरण्यश्राद्धं
अथविधिः
एकस्मिन्दिनेश्राद्धानि
सहगमनेश्राद्धविचारः

shrinath.udupa@gmail.com

श्राद्धमहिमा
आमश्राद्धं
श्राद्धेसूतकप्राप्तौविचारः
४३ मृताहमासोनज्ञायतेतद्विचारः
ब्राह्मणाभावे
द्रव्याभावे
श्राद्धकालः
पण्णवत्यः
श्राद्धदैवतानि
पिंडरहितश्राद्धानि
श्राद्धेनियमाः
४४ अपरपक्षः
सन्यासिश्राद्धं
४५ श्राद्धेब्राह्मणनियमाः
श्राद्धदेशः
पुनःश्राद्धविधिः
श्राद्धेवमने
जीवत्पितामहविषये
श्राद्धदिनेवैश्वदेवविधिः
४६ दौहित्रप्रतिपच्छ्राद्धं
अथाशौचविधिः
४७ देशांतरलक्षणं
४८ देशांतरगतेचिरायिते विचारः
द्वादशाद्वादूर्ध्वमवलोकन निषेधः
अनुगमनविधिः
सापत्नमातृविषये
पुनर्दाहः
४९ असपिंडाशौच
आतुरस्नानविधिः
रजस्वलामरणविधिः
५० गर्भिणीमरणविधिः
महानद्यः
पुण्यपर्वताः
दुर्मरणानि
अस्थिशुद्धिः
निक्षेपः
५१ गुर्वादिलक्षणं
श्राद्धविधिः
५५ श्राद्धोपयोगिवचनानि
५६ समस्तपित्रर्चनविधिः
एकादश्यांश्राद्धभोजन विचारः
५७ दानविधिः
दानप्रशंसा
गवादिदशदानानि
नानादानानि
६१ ऋतुपरत्वेनदानं
भूशुद्धिः
गृहशुद्धिः
६२ पात्रशुद्धिः
धान्यशुद्धिः
अन्नशुद्धिः
जलशुद्धिः
६३ वस्त्रशुद्धिः
देहशुद्धिः
प्रायश्चित्तान्युच्यंते
६४ उपपातकानि
ब्रह्महत्याप्रायश्चित्तं
६५ सुरापानप्रायश्चित्तं
स्वर्णस्तेयप्रायश्चित्तं
गुरुतल्पप्रायश्चित्तं
संसर्गप्रायश्चित्तं
६७ उपपातकप्रायश्चित्तं
७० अगम्यागमनं
कृच्छ्रचांद्रायणादिलक्षणं
७१ अथप्रत्याम्नायः
अद्वलक्षणं
निवर्तमानं
धान्यपरिमाणं
सुवर्णपरिमाणं निमेषादि
७२ पिंडप्रमाणं
स्त्रीनामानि

shrivaishnavsudarshan@gmail.com

॥ श्रीवेदव्यासायनमः ॥ श्रीगुरुभ्योनमः ॥ नत्वासर्वेश्वरंविष्णुंगोविंदंपतंरतथा॥ आन्हिकादिसमारभ्यलिख्यतेधर्मसंग्रहः ॥ १
तत्रादौ ॥ उषःकालेसमुत्थायार्चितयेदात्मनोहितम् ॥ स्मृत्वानारायणंदेवंस्तोत्राण्यपिचसंजपेत् ॥ ब्राह्मेमुहूर्तेचोत्थायधर्मार्थमीवि-
चिंतयेत् ॥ कायक्लेशविनाशार्थंध्यायंतिपरमेश्वरं ॥ स्मृतिचंद्रिकायाम् ॥ ब्राह्मेमुहूर्तेयानिद्रासापुण्यक्षयकारिणी ॥ तांकरोतितुयो
मोहात्पादकृछ्रेणशुध्यति ॥ अथमौनविधिः ॥ प्रभातेमैथुनेचैवप्रस्रावेदंतधावने ॥ स्नानेभोजनकालेचषट्सुमौनंविधीयते ॥ उत्थाय
पश्चिमेयामेरात्रेराचम्यचोदकं ॥ अंतर्धायतृणैर्भूमिंशिरःप्रावृत्यवाससा ॥ वाचंनियम्ययत्नेननिष्ठिवोच्छ्वासवर्जितः ॥ कुर्यान्मूत्र
पुरीषेतुशुचौदेशेसमाहितः ॥ इतियाज्ञवल्क्यः ॥ दशहस्तंपरित्यज्यमूत्रंकुर्याज्जलाशये ॥ शतहस्तंपुरीषेतुनदीतीरेचतुर्गुणं ॥ वसिष्ठः ॥
सूत्रेतुदक्षिणेकर्णेपुरीषेवामकर्णके ॥ धारयेद्ब्रह्मसूत्रंतुमैथुनेचोपवीतवत् ॥ दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः ॥ कुर्यान्मूत्रपुरीषेतु
रात्रौचेदक्षिणामुखः ॥ कर्णश्चदक्षिणः ॥ पवित्रंदक्षिणेकर्णेकृत्वाविण्मूत्रमुत्सृजेत् ॥ इतिस्मृत्यंतरे ॥ अंगिराः ॥ कृत्वायज्ञोपवीतंतुपृष्ठतः
कंठलंबितं ॥ विण्मूत्रंतुगृहीकुर्याद्यद्वाकर्णेसमाहितः ॥ प्रत्यङ्मुखस्तुपूर्वाण्हेपराण्हेप्राङ्मुखस्तथा ॥ उदङ्मुखस्तुमध्यान्हेनिशायां
दक्षिणामुखइति ॥ सूर्यसोमौनवीक्षणीयाइत्याशयेनाहयमः ॥ सायणीये ॥ गृहीत्वाजलपात्रंतुविण्मूत्रंकुरुतेयदि ॥ तज्जलंमूत्रसदृशं
पीत्वाचांद्रायणंचरेत् ॥ तीर्थशौचंनकुर्वीतकुर्वीतोद्धृतवारिणेतिमनुः ॥ जलेविण्मूत्रगंडूषान्येकुर्वीतिनराधमाः ॥ आब्रह्मकल्पपर्यंतं
कुंभीपाकेवसंतिते ॥ यस्मिन्देशेतुयत्तोयंयाचयत्रैवमृत्तिका ॥ सैवतत्रप्रशस्तास्यात्तयाशौचंविधीयते ॥ स्मृत्यर्थसारे ॥ अंतर्गृहेदे-
वगृहेवल्मीकेमूषकस्थले ॥ कृतशौचविशिष्टाश्चनग्राह्याःपंचमृत्तिकाः ॥ कालकृष्टेजलेचित्यांवल्मीकेगिरिमस्तके ॥ देवालयेनदीतीरे

shrinath.udupa@gmail.com

दर्भेषुपुष्पेषुशाद्वले॥ कूलच्छायासुवृक्षेषुमार्गेगोष्टांबुभस्मसु ॥अग्नौचगवांस्तिष्ठंश्चाविष्ठामूत्रंचनोत्सृजेत्॥देवाग्न्यर्काश्चसोमांबुसंध्याबुस्त्री द्विजन्मनः॥पश्यन्नाभिमुखश्चैतान्विष्ठामूत्रंचनोत्सृजेत् ॥अरण्येऽनुदकेरात्रौचोरव्याघ्राकुलेपथि॥कृत्वामूत्रपुरीषेतुद्रव्यहस्तोनदुष्यति॥कच्छान्वितोमूत्रयुक्तस्तथारातिपुरीषयोः॥अज्ञानाद्यदिवाज्ञानात्समूढोनरकंव्रजेत्॥ मरीचिः॥विप्रेशुक्लापिमृच्छौचेरक्ताक्षत्रेविधीयते ॥ हरिद्वर्णातुवैश्येचशूद्रेकृष्णेतिनिर्दिशेत् ॥ यमः॥ वापीकूपतटाकेषुनाहरेद्धास्ततोमृदम् ॥ आहरेज्जलमध्यात्तुपरतोमणिबंधनात् ॥ उधृत्योदकमादायमृत्तिकांसैववाग्यतः ॥ उदङ्मुखोदिवाकुर्याद्रात्रौचेद्दक्षिणामुखइति॥शातातपः॥एकालिंगेकरेसव्येतिस्रोद्वेहस्तयोर्द्वयोः ॥ मूत्रशौचंसमाख्यातंशकृतित्रिगुणंभवेत् ॥ आदित्ये ॥ स्त्रीशूद्रयोरर्धमानंप्रोक्तंशौचंमनीषिभिः ॥ दिवाशौचस्यनिश्यर्धंपथिपादंविधीयते ॥ गृहीत्वाशिश्नमुत्थायमृद्भिरभ्युत्थितैर्जलैः ॥ गंधलेपक्षयकरंशौचंकुर्यादतंद्रितः ॥ यद्दिवाविहितं शौचंतदर्धंनिशिकीर्त्तितम् ॥ तदर्धमातुरेप्रोक्तंआतुरस्यार्धमध्वनि ॥ स्त्रीशूद्रयोरशक्तानांबालानांचोपवीतिनां ॥ गंधलेपक्षयकरं शौचंप्रोक्तंमनीषिभिः ॥मनुः॥ संध्यासूदङ्मुखोहन्यपिनिशितुपुनर्दक्षिणास्योनिवीतीकुर्यान्मूत्रादिशौचंबहिरथसलिलात्त्रलिंगेमृदेका ॥ पंचापानेथहस्तेदशपुनरुभयोःसप्तचैतद्गृहस्थेद्वैगुण्यादिकमात्तद्रातिवानियातिपुस्यात्तर्धंनिशायां ॥ एतच्छौचंगृहस्थस्याद्विगुणंब्रह्मचारिणः॥ वानप्रस्थस्यत्रिगुणंयतीनांचचतुर्गुणं ॥ धर्मप्रवृत्तौ ॥ शौचेयत्नःसदाकार्यःशौचमूलोद्विजःस्मृतः॥ शौचाचारविहीनस्यसमस्तानिष्फलाःक्रियाः॥मुत्रात्तुद्विगुणंशुक्रेमैथुनेत्रिगुणंस्मृतं॥ पद्भ्यांतुशोधयेत्तीरंनान्यथाशुचितामियात् ॥ पादपृष्ठेपादतलेतिस्रातिस्रश्चमृत्तिकाः ॥ एकैकयामृदापादौहस्तौप्रक्षालयेत्ततः ॥ वामंप्रक्षालयेत्पादंशूद्रादेर्वाःकथंचन ॥ शौचादृतेवामपादं

shrinath.udupa@gmail.com

पश्चादक्षिणमेवच॥ यतिश्चेद्विसृजेत्स्नात्वामूत्रंवाथमलंयदि॥ आजंघक्षालयेन्मूत्रेद्विराचम्यकटिंजले॥इतिशौचविधिः॥अथगंडूषाः॥
चतुरष्टद्विषट्त्र्यष्टगंडूषैःशुद्ध्यतेक्रमात्॥ मूत्रेपुरीषेभुक्त्यंतेरेतःप्रस्रवणेपिच॥पुरतःसर्वदेवाश्चदक्षिणेपितरस्तथा॥ऋषयःपृष्ठतःसर्वे
वामेगंडूषमुत्सृजेत्॥ प्राङ्मुखोदङ्मुखोवाथद्विराचम्यततःपरं॥ उक्तकालेप्रकुर्वीतवाग्यतोदंतधावनमिति॥ धर्मप्रवृत्तौ॥ याज्ञ
वल्क्यः॥ अंतर्जानुःशुचौदेशउपविष्टउदङ्मुखः॥ प्राग्वाब्राह्मेणतीर्थेनद्विजोनित्यमुपस्पृशेत्॥यमः॥आपःकरनखस्पृष्टायआचाम
तिवैद्विजः॥ सुरांपिबतिसव्यक्तंयमस्यवचनंयथा॥ अकृत्वापादशौचंतुतिष्टन्मुक्ताशिखोपिवा॥ विनायज्ञोपवीतेनआचांतो
प्यशुचिर्भवेत्॥ अधोवायुसमुत्सर्गेआक्रंदेक्रोधसंभवे॥ मार्जारमूषकस्पर्शेप्रहासेनृतभाषणे॥ निमित्तेष्वेपुसर्वेषुकर्मकुर्वन्नुपस्पृशेत्
इतिबृहस्पतिः॥ देवलः॥भोजनेदंतलग्नानिनिर्दहत्याचमनंचरेत्॥ दंतलग्नमसंहार्यलेपंमन्येतदंतवत्॥बृहस्पतिः॥कृत्वालंपादशौचंवि
मलमथजलंत्रिःपिबेदुन्मृजेद्विर्देशिन्यंगुष्ठकाभ्यांसजलमभिमृशेन्नासिकारंध्रयुग्मं॥ अंगुष्ठानामिकाभ्यांनयनयुगयुतंकर्णयुग्मं-
कनिष्ठांगुष्ठाभ्यांनाभिदेशंहृदयमथतलेनांगुलीभिःशिरोंसौ॥ हारीतः॥ आर्द्रवासाजलेकुर्याच्तर्पणाचमनंजपं॥ शुष्क-
वासाःस्थलेकुर्यात्तर्पणाचमनंजपमिति॥ करकालांबुपात्रेणताम्रचर्मपुटेनच॥ गृहीत्वास्वयमाचामेद्भूमिलग्ननान्यथेति॥ पा-
रिजाते॥ कौशिकः॥ अपवित्रकरःकश्चिद्ब्राह्मणोयमुपस्पृशेत्॥ अकृतंतस्यतत्सर्वमभक्ष्यायजनंयथा॥ वामहस्तेस्थितेदर्भे-
दक्षिणेनाचमेद्यदि॥ रक्तंतुतद्भवेत्तोयंपीत्वाचांद्रायणंचरेत्॥ हस्तद्वयेपवित्रंचप्रशंसंतिचगौतमाः॥ उभयत्रस्थितैर्दर्भैस्समाचा-
मतियोद्विजः॥ सोमपानफलंतस्यभुत्कायज्ञफलंलभेत्॥ सपवित्रेणहस्तेनकुर्यादाचमनक्रियाम्॥ नोच्छिष्टंतत्पवित्रंतुभुक्तोच्छिष्टतु

skrinath.udupa@gmail.com

वर्जयेत् ॥ चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकं ॥ एकैकन्यूनमुद्दिष्टंवर्णवर्णेयथाक्रमं ॥ अन्यानिचपवित्राणिकुशदूर्वात्मकानिवै ॥ पवित्रकूटलोहस्यकलांनार्हतिषोडशीम् ॥ वामहस्तेकुशान्कृत्वानपिबेद्दक्षिणेनतु ॥ नब्रह्मग्रंथिमाचामेन्नदूर्वाभिःकदाचन ॥ कुशैः पूतंभवेत्सानंकुशेनोपस्पृशेद्द्विजः ॥कुशेनचोद्धृतंतोयंसोमपानेनसंमितं ॥ इतिव्यासः ॥ यमः ॥ कुशाःकाशास्तथादूर्वायवाव्रीहयएवच॥बिल्वजाःपुंडरीकाणिसप्तधाबर्हिरुच्यतेइति॥कात्यायनः॥अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेवच॥प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित् ॥ स्मृत्यंतरे ॥ त्रिभिर्दर्भैःशांतिकर्मपंचभिःपौष्टिकंतथा ॥ चतुर्भिराभिचारंतुकुर्वन्कुर्यात्पवित्रकामिति॥ब्रह्मयज्ञेजपेचैवब्रह्मग्रंथिर्विधीयते॥भोजनेवर्तुलःप्रोक्तएषधर्मोनहीयतइति॥इत्याचमनपवित्रयोर्विधिः ॥अथदंतधावनम्॥मुखेपर्युषितेयस्मादुद्भवेदशुभा नरः॥ततःकुर्यात्प्रयत्नेनशुध्यर्थंदंतधावनम् ॥खदिरश्चकरंजश्चकदंबश्चवटस्तथा ॥ तिंतृणीवेणुवृक्षश्चाम्रनिंबूतथैवच ॥ अपामार्गश्च वृक्षश्चार्कश्चोदुंबरस्तथा॥एतेप्रशस्ताःकथितादंतधावनकर्मसु॥खदिराक्षीरवृक्षस्यप्रमाणंद्वादशांगुलम् ॥ कनिष्ठिकावत्स्थूलंचपूर्वार्धेनत्रिरुक्षितम् ॥ स्मृतिसारसमुच्चये॥गुर्वार्कतालहिंतालकेतकीनमहावटाः॥खर्जूरीनारिकेलश्चसप्तैतेतृणराजतः॥तृणराजसमोपेतो यःकुर्यादंतधावनम् ॥ नरश्चांडालयोनिःस्याद्यावद्दंगांनपश्यति ॥ इतिविष्णुः ॥ कंटाकिक्षीरवृक्षोत्थंद्वादशांगुलमव्रणं॥कनिष्ठांगुलिवत्स्थूलंपूर्वार्धेकृतकूर्चकं॥जंबूदुंबरचूताश्चकदंबोलोध्रचंपकैः॥बदरीतिंडुकश्चेतिप्रोक्तादंतप्रधावने॥आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच॥ब्रह्मप्रज्ञांचमेधांचत्वंनोधेहिवनस्पते॥त्रिपुच्छिन्नमधोयातंभुक्तानिर्मितमुत्सृजेत् ॥ इतिदंतधावनविधिः॥अथदंतधावननिषेधः स्मृतिसारसमुच्चये ॥ अभ्यंगेचोदधिस्नानेमैथुनेदंतधावने ॥ जातेचनिधनेचैवतिथिस्तात्कालिकीस्मृता ॥ प्रतिपत्पर्वषष्ठीपुनवमीद्वा

shrinath.udupa@gmail.com

दर्शंतथा॥दंतानांकाष्ठसंयोगंप्रयत्नेनविवर्जयेत्॥ स्मृतिः॥ अर्कवारेव्यतीपातेसंक्रांत्यांजन्मवासरे॥वर्जयेद्दंतकाष्ठंतुनंदादिषुतुपर्व
सु॥उदितेचसहस्रांशौयःकुर्यादंतधावनं॥सवितामक्षितस्तेनपितृवंशस्यघातकः॥स्मृत्यंतरे॥अंगारवालुकाभिश्चभस्मांगारनखैरपि॥
इष्टकालोष्टपाषाणैर्नकुर्यादंतधावनम्॥ इतिधर्मप्रवृत्तौ॥ अन्यच्च॥ अष्टम्योश्चचतुर्दश्योःपंचदश्योस्त्रिजन्मसु॥व्यतीपातेचसंक्रांत्यां
दंतकाष्ठंनभक्षयेत्॥दीक्षितोब्रह्मचारीचयतिश्चविधवांगना॥ नित्यमद्यादंतकाष्ठमसायांतुविवर्जयेत्॥ विष्णुः॥ प्रतिपदर्शषष्ठीषुचतु
र्दश्यष्टमीषुच॥ द्वादश्यांचनवम्यांचवर्जयेद्दंतधावनम्॥ यमः॥ श्राद्धेजन्मदिनेचैवविवाहेजीर्णदोषके॥ व्रतेचैवोपवासेचवर्जयेद्दं
तधावनम्॥ व्यासः॥ अलाभेदंतकाष्ठानांनिपित्र्यायांतथातिथौ॥अपांद्वादशगंडूषैर्विदध्याद्दंतधावनम्॥ तृणपर्णैस्सदाकुर्यादमावे
कादशींविना॥ तयोरपिचकुर्वीतजंबूप्लक्षरसालकैः॥स्मृत्यर्थसारे॥ तृणपर्णैर्मध्यमानामिकांगुष्ठैर्वानिपित्र्याहेपिकुर्युरिति॥इतिदंत
धावननिषेधविधिः॥ अथस्नानविधिः॥ उषःकालेतुसंप्राप्तेशौचंकृत्वायथार्थवत्॥ततःस्नानंप्रकुर्वीतदंतधावनपूर्वकमिति॥ अस्ना
तश्चपुमान्नार्होजपाग्निहवनादिषु॥प्रातःस्नानंतदर्थंतुनित्यस्नानंप्रकीर्तितं॥कुर्याच्छ्रियमिच्छंकस्नानंशीताद्भिःकाम्यमेवच॥नित्यंयादृच्छि
कंचैवयथारुचिसमाचरेत्॥इतिगार्ग्यः॥स्नानंदानंजपोहोमःस्वाध्यायःपितृकर्मच॥एकवस्त्रोद्विजःकुर्याच्चत्सर्वंनिष्फलंभवेत्॥स्ना
नंनदीदेवखातेह्रदेषुचसरःसुच॥पंचपिंडान्समुद्धृत्यनस्नायात्परवारिणि॥स्नानमब्दैवतैर्लिंगैर्वारुणैश्चसुदासह॥ कुर्याद्व्याहृतिभिर्वा
थर्तिकचेदमृचापिवा॥ देवलः॥ एकांनदींसमासाद्यनान्यांस्नानेनदींस्मरेत्॥ शंखः॥ आपोअस्मानितिस्मृत्वाआदित्याभिमुख
स्स्थितः॥इदंविष्णुर्जपित्वातुप्रतिस्रोतोनिमज्जति॥ इतियाज्ञवल्क्यः॥तत्रविशेषः॥ अप्रवाहोदकेस्नानंविप्रपादाभिषेचनम्॥गायत्री

shrinath.uduna@gmail.com

जपमर्घ्यंचसूर्यस्याभिमुखंचरेत् ॥ स्नानंतुद्विविधंप्रोक्तंगौणमुख्यप्रभेदतः ॥ तयोस्तुवारुणंमुख्यंतत्पुनःषड्विधंस्मृतं ॥ नित्यंनैमित्तिकं
काम्यंक्रियांगंमलकर्षणं ॥ क्रियास्नानंतथापष्ठंषोढास्नानंप्रकीर्त्तितं ॥ मार्कंडेयः ॥ अस्नात्वानाचरेत्कर्मजपहोमादिकिंचन ॥ लि
लास्वेदसमाकीर्णःशयनादुत्थितःपुमान् ॥ अत्यंतमलिनःकायोनवच्छिद्रसमन्वितः ॥ स्रवत्येवदिवारात्रौप्रातःस्नानंविशोधनं ॥ प्रातः
स्नानंप्रशंसंतिदृष्टादृष्टकरंहितं ॥ सर्वमर्हतिशुद्धात्माप्रातःस्नायीजपादिकं ॥ शंखः ॥ उच्छिष्टाद्युपघातादौस्नाननैमित्तिकंस्मृतं ॥
चंद्रसूर्योपरागादौतथैवगृहसूतके ॥ पुण्यस्नानादिकंचैवदैवज्ञविधिचोदितं ॥ तद्धिकाम्यंसमुद्दिष्टंनाकामस्तत्प्रयोजयेत् ॥ धर्मक्रियां
कुर्तुमनाःपूर्वस्नानंसमाचरेत् ॥ क्रियांगंतत्समुद्दिष्टंस्नानंचैवपरैर्द्विजैः ॥ तथाच ॥ जप्तुकामःपवित्राणिअर्चितादेवताःपितॄन् ॥
स्नानंसमाचरेद्यस्तुक्रियांगंतत्प्रकीर्त्तितं ॥ मलापकर्षणंनामस्नानमभ्यंगपूर्वकं ॥ मलापकर्षणायैवप्रवृत्तिस्तस्यनान्यथा ॥ सरःसुदे
वखातेषुतीर्थेषुचनदीषुच ॥ क्रियास्नानंसमुद्दिष्टंस्नानंतत्रमताःक्रियाः । यत्तुतीर्थादिषुस्नानंक्रियास्नानंप्रकीर्तितं ॥ स्नानादेवफलं
यत्रक्रियास्नानंदिनेदिने ॥गौणंहि॥जाबालिः॥असामर्थ्याच्छरीरस्यदेशकालाद्यपेक्षया॥मंत्रस्नानादितःसप्तकेचिदिच्छंतिसूरयः॥
योगी ॥ मांत्रंभौमंतथाग्नेयंवायव्यंदिव्यमेवच ॥ वारुणंमानसंचैवसप्तस्नानान्यनुक्रमात् ॥ आपोहिष्टादिभिर्मंत्रैर्मृदालंभश्चपार्थिवं ॥
आग्नेयंभस्मनास्नानंतद्दिव्यमितिचोच्यते ॥ वारुणंचावगाहश्चमानसंविष्णुचिंतनं ॥ जाबालिः ॥ अशिरस्कंभवेत्स्नानंस्नानाशक्तौ
तुकर्मिणां ॥ आर्द्रेणवाससावापिमार्जनंकापिलंविदुः ॥ बृहस्पतिः ॥ पुण्यंकनखलेयच्चप्रयागेयच्चसुंदरी॥तत्फलंसकलंदेविभूतिस्नाने
विधीयते॥भूमिष्टमुद्धृतात्पुण्यंततःप्रस्रवणोदकं॥ततोपिसारसंपुण्यंतस्मान्नादेयमुच्यते॥तीर्थतोयंततःपुण्यंततोगांगंतुसर्वशः ॥ मरी

shrinath.udupa@gmail.com

चिः ॥ भूमिष्ठमुद्धृतंवापिशीतमुष्णमथापिवा ॥ गांगंपयःपुनात्याशुपापमामरणांतिकं ॥ शौनकः ॥ पुण्येतुजन्मनक्षत्रेव्यतीपाते चवैधृतौ ॥ अमायांतुनदीस्नानंपुनत्यासप्तमंकुलं ॥ आपएवसदापूतास्तासांवन्हिर्विशोधकः ॥ तस्मात्सर्वेषुकालेषुउष्णांभःपावनंस्मृतं ॥ मृतेजन्मनिसंक्रांतौश्राद्धेजन्मदिनेतथा ॥ अस्पृश्यस्पर्शनाच्चैवनस्नायादुष्णवारिणा ॥ पौर्णमास्यांतथादर्शेयःस्नायादुष्णवारिणा ॥ सगोहत्याकृतंपापंप्राप्नोतीहनसंशयः ॥ श्रीकामःसर्वदास्नानंकुर्वीतामलकैर्नरः ॥ सप्तमीनवमीचैवपर्वकालंचवर्जयेत् ॥ इतिविष्णुः ॥ धर्मप्रवृत्तौ ॥ उत्तमंतुनदीस्नानंतडागेमध्यमंस्मृतं ॥ कूपेस्नानंतुसामान्यंभांडंस्नानंवृथाभवेत् नदीषुदेवखातेषुप्रातःस्नायादिनेदिने ॥ तदभावेतडागेवास्रावेस्नानंसमाचरेत् ॥ जलेनिमज्यवध्नीयाच्छिखामाचम्यवाग्यतः ॥ पुनराचम्यसंकल्प्यनद्यांस्नानंसमाचरेत् ॥ सप्ताहंत्प्रातरस्नायीद्विजःशूद्रत्वमाप्नुयात् ॥ तस्मात्स्नानंप्रकर्तव्यंरविवारेसदैवहि ॥ ॥ मनुः ॥ अत्यंतमलिनःकायोनवाछिद्रसमन्वितः ॥ स्रवत्येवदिवारात्रौप्रातःस्नानंविशोधनं ॥ नदींगंतुमशक्तश्चेद्गृहेवास्नानमाचरेत् ॥ स्वयंचैवाथशिष्यैश्चपुत्रैर्वोद्धृतवारिणा ॥ पराशरः ॥ नस्नायाच्छूद्रहस्तेननैकहस्तेनवातथा ॥ उध्दृताभिरद्भिःस्नायादाहृताभिर्द्विजातिभिः ॥ द्विराचम्यनिमज्याथपुनरेवद्विराचमेत् ॥ मंत्रेणैवशिखांबध्वाप्राणानायम्यवैयतः ॥ यमः ॥ कराभ्यां धारयेद्दर्भान्शिखाबंधंविधायच ॥ प्राणायामंततःकुर्यात्संकल्पंचसमुच्चरेत् ॥ १ आपोहिष्ठेतिनवाभिर्वारुणैर्मार्जयेदथ ॥ सांगुष्ठं यज्ञमूत्रेणत्रिःप्रदक्षिणमाचरेत् ॥ २ स्रोतसोभिमुखोमज्जेयत्राऽपःप्रवहंतिच ॥ स्थावरेषुचसर्वेषुह्यादित्याभिमुखस्तथा ॥ यायाः

पाठांतरे १ ॥ **विश्वामित्रः** ॥ नाभिमात्रेजलेतिष्ठन्सप्तद्वादशपंचच ॥ त्रिवारमपिचाल्पपुत्यस्नानमेवंविधीयते ॥ स्नात्वाथदेहंस्पृशाल्पपुनःस्नात्वासमाचरेत् २ याःप्रवतइमंमे गंगेइतिस्मृतिः ॥ संकल्पंसूक्तपठनंमार्जनंचाघमर्षणं ॥ देवतातर्पणंचैवपंचांगंस्नानमाचरेत् ॥

shrinath.udupa@gmail.com

समुद्रगानद्यस्तासुस्नानंतुसंमुखं ॥ सर्वेषांशाखिनामेवविनावाजसनेयिनः॥ वासिष्ठः ॥ स्नानंकृत्वाधृतेवस्त्रेपतंतिकेशर्विंदवः ॥ तत्स्नानंनिष्फलंविद्यात्पुनःस्नानेनशुध्यति॥त्वन्नोअग्नेततश्चैवसत्वन्नोअग्नइत्यथ॥तरत्समइतिसूक्तंचजपन्स्नानंसमाचरेत्॥आग्नाअग्न०१ ऋक् आधीवासंपरि० २ अयंयज्ञोदे० ३ अतीयाम० ४ अग्नेभव० ५ अग्नेरक्षाणः० ६ अद्यामुरी० ७ अध्वर्योद्राव० ८ अग्निंदूतं० ९ अग्नेवाघस्वं० १० ताद्विष्णोःप० ११ यत्किंचेदं० १२॥हस्ताभ्यांजलमादायसकृदेवाभिमंत्रितं॥मस्तकेचमुखेवाऽपो हृदयेपृष्ठदेशके।अभिषिंचेत्स्वमात्मानंगायत्र्यायोनिमुद्रया।एकावृत्याजपेच्छक्त्यावैष्णवीबृहच्चंततः॥प्राङ्मुखोदेवतीर्थेननिवीतीच उदङ्मुखः।दक्षिणाभिमुखोभूत्वाप्राचीनावीतितर्पयेत् ॥ यन्मयादुष्कृतंतोयंशारीरमलसंभवात् ॥ तत्पापस्यविशुध्यर्थंयक्ष्माणंतर्पयाम्यहम्॥असंस्काराश्चयेकेचिज्जलाशाःपितरोमम॥तेषामाप्यायनार्थायदीयतेसलिलंमया।हस्ताभ्यांवीक्षितंतोयंतत्तीरेसलिलाद्बहिः उत्तीर्यपीडयेद्वस्त्रंमंत्रतोदक्षिणेततः॥ येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः ॥ तेगृण्हंतुमयादत्तंवस्त्रनिष्पीडनोदकं॥ दर्भान्विस्रज्यतत्तीरेत्र्युपवीतीद्विराचमेत् ॥ अक्लिन्नवस्त्रंसंप्रोक्ष्यशुचीवइतिमंत्रतः ॥ इतिधर्मप्रवृत्तौ ॥ संग्रहे ॥ प्रातर्मध्यान्हयोःस्नानं वानप्रस्थगृहस्थयोः ॥ यतेस्त्रिषवणंप्रोक्तंसकृत्तुब्रह्मचारिणः ॥ नाभिमात्रजलेस्थित्वाकृत्वाकेशान्द्विधाद्विजः ॥ निरुध्यकर्णौनासांचत्रिःकृत्वामज्जनंचरेत् ॥ शौनकः ॥ प्रसंप्राजेबृहत्सूक्तमष्टर्चंवारुणंजपेत् ॥ समुद्रादूर्मिरित्यापांसूक्तमेकादशर्चकं ॥ आपोअस्मानमातरइत्यृचंमजपेन्नरः ॥ अवगाह्यनिमज्याथद्विराचम्याभिषेचयेत् ॥ अंवयोयंत्यृचाष्टौ चापोहिष्टादयोनव॥ अद्भिःस्नात्वोदकेमग्नस्त्रिःपठेदघमर्षणमिति ॥ स्नानादनंतरेतावत्तर्पयेत्पितृदेवताः ॥ उत्तीर्यपीडयेद्वस्त्रंसंध्याकर्मततःपरमिति ॥ पितृदे

shrinath.udupa@gmail.com

वताइत्यृषीणामुपलक्षणं ॥ क्रमश्चाविवक्षितस्तेनदेवानृषीन्पितॄंश्चेत्यर्थः ॥ व्यासः ॥ यज्ञोपवीतीदेवानांनिवीतीऋषितर्पणे ॥ ॥ प्राचीनावीतिपित्र्येतुस्वेनतीर्थेनभावितः ॥ काष्णाजिनिः ॥ देवऋषिपितॄणांचजलेदद्याज्जलांजलिं ॥ असंस्कृतप्रमीतानांस्छलेदद्याज्जलंपुनः ॥ बौधायनः ॥ जलांजलित्रयंदद्याद्येचान्येसंस्कृताभुवि ॥ असंस्कृतप्रमीतानामेकमेवतटेक्षिपेत् ॥ मंत्रः ॥ अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम ॥ भूमौदत्तेनतोयेनतृप्तायांतुपरांगतिमिति ॥ स्नानदर्भमोचनेस्मृतिः ॥ विकिरेपिंडदानेचतर्पणेस्नानकर्मणि ॥ आचांतःसन्नकुर्वीतदर्भसंस्पर्जनंबुधः ॥ इतिस्मृतिः ॥ स्नातःशिरोनावधूनेन्नांगेभ्यस्तोयमुत्थरेत् ॥ नचपूर्वधृतंवासोनचतैलमुपस्पृशेत् ॥ आजन्मकृतसाहस्रंयत्पापंकुरुतेक्वचित् ॥ मुच्यतेसर्वपापेभ्यस्नात्वैवंलक्षणांभसीति ॥ इतिस्नानविधिः ॥ अथवस्त्रविधिः ॥ संग्रहे ॥ स्वयंधौतेनकर्तव्याक्रियाधर्म्याविपश्चिता ॥ नतुनैरजकःधौतेननान्यहस्तेनकुत्रचित् ॥ ॥ भृगुः ॥ ॥ ब्राह्मणस्यसितंवस्त्रंनृपतेरक्तमुल्बणं ॥ पीतंवैश्यस्यशूद्रस्यनीलंमलवदिष्यते ॥ नीलीरक्तंतुयद्वस्त्रंदूरतस्तद्विवर्जयेत् ॥ स्त्रीणांक्रीडार्थसंयोगेशयनीयेनदुष्यति ॥ स्नानंदानंजपोहोमःस्वाध्यायःपितृकर्मच ॥ वृथातस्यमहायज्ञानीलीवासोविभार्तियः ॥ नीलीरक्तंयदावस्त्रंविप्रःस्वांगेषुधारयेत् ॥ तंतुसंततिसंख्याकैर्नरकेवसतेध्रुवं ॥ अहोरात्रोषितोभूत्वापंचगव्येनशुध्यति ॥ नीलीरक्तेनवस्त्रेणयदन्नमुपकल्पयेत् ॥ भोक्ताविषसमंभुंक्तेदाताचनरकंव्रजेत् ॥ इतिकाशीखंडे ॥ विकच्छोनुत्तरीयश्चनग्नश्चावस्त्रएवच ॥ श्रौतंस्मार्ततथाकर्मननग्नश्चितयेदपि ॥ नग्नश्चमलवद्वासानग्नःकौशेयकेवलः ॥ नग्नोद्विगुणवस्त्रःस्यान्नग्नोदग्धपटस्तथा ॥ नग्नश्चस्छूलवस्त्रस्यान्नग्नोग्रंथितवस्त्रकः ॥ नग्नश्चबहुवस्त्रःस्या

shrinath.udupa@gmail.com

न्नग्नः कौपिनकेवलः ॥ काषायवस्त्रःसाक्षाच्चदशनग्नाःप्रकीर्तिताः ॥ विष्णुपुराण ॥ होमेदेवार्चनाद्यासुक्रियासुपठनेतथा ॥ नैक
वस्त्रःप्रवर्तेतद्विजोद्याचमनेजपे ॥ गोभिलः ॥ एकवस्त्रोनभुंजीतनकुर्यादेवतार्चनं ॥ पारिजाते ॥ उत्तरीयंयोगपट्टंतर्जन्यारजतं
तथा ॥ नजीवत्पितृकैर्धार्यंज्येष्ठोवाविद्यतेयदि ॥ स्मृत्यंतरे ॥ यज्ञोपवीतेद्वेधार्येश्रौतेस्मार्तेचकर्मणि ॥ तृतीयमुत्तरीयार्थंवस्त्रा
भावेतदिष्यते ॥ इतिधर्मप्रवृत्तौ ॥ याज्ञवल्क्यः ॥ दग्धंजीर्णंचमलिनंमूषकोपहतंतथा ॥ खादितंगोमहिष्याद्यैस्तत्याज्यंसर्वथाद्विजैः
कंबलेपट्टसूत्रेतुनीलीदोषोनविद्यते ॥ स्त्रियावस्त्रंसदात्याज्यमन्यवस्त्रंविसर्जयेत् ॥ अधौतंकारुधौतंचपूर्वेद्युर्धौतमेवच ॥ त्रयमेतत्तु
संविद्वान्सर्वकर्मसुवर्जयेत् ॥ ईषद्धौतंस्त्रियाद्धौतंशूद्रधौतंतथैवच ॥ अधौतंतच्चविज्ञेयंशुष्कंदक्षिणपल्लवैः ॥ स्मृतिः ॥ निष्पीड्य
वस्त्रमाचम्यततःसंध्यामुपासते ॥ मध्यान्हेतर्पणादूर्ध्ववस्त्रनिष्पीडनंभवेत् ॥ प्रातःस्नानेत्वशक्तश्चेन्मार्जयेदार्द्रवाससा ॥ उत्तमांगा
दिपादांतंसभवेत्स्नानकृद्विजः ॥ प्रातःस्नानेत्वशक्तश्चेत्संक्षिप्यस्नानमाचरेत् ॥ स्नानंचैवतुमध्यान्हेद्विजःकुर्यात्सविस्तरं ॥
अभ्यंगेचैवमांगल्येगृहेचैवतुसर्वदा ॥ शीतोदकेननस्नायान्नधार्यंगोपिचंदनं ॥ संक्रांतौग्रहणेचैवह्यमावस्यार्कपर्वसु ॥ गृहेवापि
प्रकुर्वीतस्नानंशीतोदकेनच ॥ गृहस्नानेनकुर्वीततर्पणंमार्जनंतथा ॥ नांतराचमनंकुर्यात्पश्चादाचम्यशुध्यति ॥ अथसचैलस्नानं ॥
श्वानकुक्कुटमार्जारमद्यमांसरजस्वलाः ॥ स्पृष्ट्वादेवलकंचैवसचैलंस्नानमाचरेत् ॥ मातापितृविसृष्टांक्रियामुत्सृज्ययाचकः ॥
देवार्चनपरोविप्रोवित्तार्थीवत्सरत्रयं ॥ सर्वेदेवलकोनामहव्यकव्येषुवर्जयेत् ॥ चितिंचचितिकाष्ठंचयूपंचांडालमेवच ॥ स्पृष्ट्वा
देवलकंचैवसचैलंस्नानमाचरेत् ॥ इतिधर्मप्रवृत्तौ ॥ मनुः ॥ दिवाकीर्तिमुदक्यांचपतितंसूतकंतथा ॥ शवंतत्स्पर्शिनंचैवस्पृष्ट्वास्ना

shrinath.udupa@gmail.com

नेनशुध्यति ॥ दीपाग्निदीपतैलंचभस्मचास्थिरजस्वलां ॥ एतानिब्राह्मणस्पृष्ट्वासवासाजलमाविशेत् ॥ इतिनैमित्तिकस्नान विधिः ॥ इतिधर्मप्रवृत्तौ ॥ अथअन्यखातकूपस्नानविधिः ॥ अंत्यजैःखानिताःकूपास्तटाकादिस्तथैवच ॥ तेषुस्नात्वाचपीत्वाचपं चगव्येनशुध्यति ॥ नदीरजोदोषः ॥ सिंहकर्कटयोर्मध्येसर्वानद्योरजस्वलाः ॥ तासुस्नानंनकुर्वीतवर्जयित्वासमुद्रगाः॥ व्याघ्रः ॥ उपाकर्मणिचोत्सर्गेप्रातःस्नानेतथैवच ॥ चंद्रसूर्यग्रहेचैवरजोदोषोनविद्यते ॥ गर्तानांसर्वदाचैवरजोदोषोनविद्यते ॥ तत्रस्नानं प्रकुर्वीतभार्गवस्यवचोयथा ॥ अथकुशविधिः ॥ कुशाःकाशायवादूर्वाडाशिराश्चसकुंदराः ॥ गोधूमाव्रीहयोमुंजादशदर्भाः प्रकीर्तिताः ॥ पितृकृत्येषुसर्वेषुकुशाग्राह्याःसमाहिताः ॥ दूर्वाश्लक्ष्णाःसदाग्राह्यासर्वेषुशुभकर्मसु ॥ स्मृत्यर्थसारे ॥ यैः कृतःपिंडनिर्वापःश्राद्धंवापितृपार्वणं ॥ विण्मूत्रादिषुयेदर्भास्तेषांत्यागोविधीयते ॥ वनस्पतिगतेसोमेयस्तुहिंस्याद्वनस्पतीन् ॥ ॥ घोरायांभ्रूणहत्यायांयुज्यतेनात्रसंशयः ॥ जाबालिः ॥ कुशाःशाकंचपुष्पाणिगवार्थंचतृणादिकं ॥ निषिद्धेपिचगृण्ही-यादमावास्याहनिद्विजः ॥ मनुः ॥ ततःश्राद्धदिनेकर्तादिशंगछेत्तुदक्षिणां ॥ दक्षिणाप्रवणान्दर्भान्समूलानाहरेच्छुचिः ॥ ॥ पाराशरः ॥ समित्पुष्पजलादीनिश्रोत्रियःस्वयमाहरेत् ॥ शूद्रानीतैःक्रयक्रीतैःकर्मकुर्वन्व्रजत्यधः ॥ अथपवित्रलक्षणं ॥ ॥ स्मृत्यर्थसारे ॥ सर्वेषांवाभवेद्वाभ्यांपवित्रंग्रंथितंनवा ॥ द्वौदर्भौदक्षिणेहस्तेसव्येत्रीनासनेसकृत् ॥ हेमाद्रौ ॥ पंचभिःपौ ष्टिकेचैवचतुर्भिर्यज्ञकर्मणि ॥ पितृयज्ञेत्रिभिर्दर्भैर्द्वौदर्भौनित्यकर्मणि ॥ श्राद्धेग्राह्यास्त्रयःसाग्राःकुशाःस्युःषोडशांगुलाः ॥ द्विमूलमेकतःकुर्यात्पवित्रस्याग्रमेकतः ॥ द्व्यंगुलंमूलवलयंग्रंथिरेकांगुलिस्तथा ॥ चतुरंगुलमग्रंस्यात्पवित्रस्यप्रमाणकं ॥ स्नाने

shrinath.udupa@gmail.com

दानेजपेयज्ञेस्वाध्यायेनित्यकर्मणि ॥ सपवित्रौसदर्भौवाकरौकुर्वीतनान्यथा ॥ ग्रंथिर्यस्यपवित्रस्यनतेनाचमनंभवेत् ॥ आचमेद्यस्तुमोहात्मायथोच्छिष्टस्तथैवसः ॥ सपवित्रःसदर्भोवाकर्मांगाचमनंचरेत् ॥ नोच्छिष्टंतत्पवित्रंतुभुक्तोच्छिष्टंतुवर्जयेत् ॥ योगी ॥ दार्भपवित्रंताम्रंवाराजतंहैममेवच ॥ भूषणंदक्षिणेपाणौपवित्रंचोत्तरोत्तरं ॥ याज्ञवल्क्यः ॥ अनामिकाधृतंहैमंतर्जन्यांरौप्यमेवच ॥ कानिष्ठिक्यांधृतंखड्गंतेनपूतोभवेन्नरः ॥ तातेवाभ्रातरिज्येष्ठेयस्यचैवतुजीविति ॥ नतस्यमौनंतर्जन्यांरजतस्यचधारणं ॥ पादुकारोहणंचैवयोगपट्टंतथैवच ॥ नजीवत्पितृकःकुर्याद्वयाश्राद्धंतथैवच ॥ अथयज्ञोपवीतविधिः ॥ उपवीतंबटोरेकंद्वेतथेतरयोःस्मृते ॥ एकमेवयतीनांस्यादितिधर्मोव्यवस्थितः ॥ ॥ पराशरः ॥ ॥ रंध्रादिनाभिपर्यंतंब्रह्मसूत्रंपवित्रकं ॥ न्यूनेरोगप्रवृत्तिःस्यादधिकेधर्मनाशनं ॥ दशाष्टौवागृहस्थस्यचत्वारिवनचारिणः ॥ एकैकमुपवीतंचयतिनोब्रह्मचारिणः ॥ यज्ञोपवीतेनैकेनजपहोमादिकंकृतं ॥ तत्सर्वंविलयंयातिपितॄणांनोपतिष्ठते ॥ पतितंत्रुटितंवापिब्रह्मसूत्रंयदाभवेत् ॥ नूतनंधारयेद्विप्रःस्नानंसंकल्पपूर्वकं ॥ यज्ञोपवीतमेकैकंप्रतिमंत्रेणधारयेत् ॥ आचम्यप्रतिसंकल्प्यधारयेन्मुनिरब्रवीत् ॥ एकमंत्रैकसंकल्पंधृत्वायज्ञोपवीतकं ॥ एकस्मिन्त्रुटितेसर्वंत्रुटितंनात्रसंशयः ॥ यज्ञोपवीतमाज्ञिनंमौंजींदंडंचधारयेत् ॥ नष्टेभ्रष्टेनवंधृत्वानष्टंचैवजलेक्षिपेत् ॥ मनुः ॥ कार्पासमुपवीतंस्याद्विप्रस्योर्ध्ववृतंत्रिवृत् ॥ शणसूत्रमयं राज्ञोवैश्यस्यह्याविसूत्रकं ॥ विधवारचितंसूत्रमनध्यायेकृतंचयत् ॥ त्रिछिन्नमप्यधोयातंभुत्कानिर्मितमुत्सृजेत् ॥ संग्रहे ॥ ॥ उर्ध्ववृत्तमधोयातंपुनरूर्ध्वकृतंयथा ॥ एतद्यज्ञोपवीतंस्यात्तस्यैकाग्रंथिरुच्यते ॥ तैत्रामैत्राःकठाःकाण्वाश्चरकावाजसनेय-

shrinath.udupa@gmail.com

काः ॥ कंठादुत्तीर्यसूत्रंतुकुर्युर्वैक्षालनंद्विजाः ॥ बव्हृचाःसामगाश्चैवयेचान्येयाजुषास्तथा ॥ कंठादुत्तीर्यसूत्रंतुपुनःसंस्कारमर्हति ॥ अभ्यंगेचोदधिस्नानेमातापित्रोर्मृतेहनि ॥ कंठादुत्तीर्यसूत्रंतुकुर्याद्वैक्षालनंद्विजः ॥ अथतिलकविधिः ॥ धर्मप्रवृत्तौ ॥ ललाटेतिलकंकुर्यान्मृदावापिचभस्मना ॥ तदभावेपितोयेनचंदनेनापिवाद्विजः ॥ स्मृतिसारसमुच्चये ॥ ऊर्ध्वपुंड्रंमुसौम्यंचललाटेयस्यदृश्यते ॥ सचांडालोपिशुद्धात्मापूज्यएवनसंशयः ॥ ब्रह्मघ्नोवापिगोघ्नोवाहंतुकःसर्वपापकृत् ॥ गोपीचंदनसंपर्कान्मुक्तोभवतितत्क्षणात् ॥ उर्ध्वपुंड्रंमृदाकुर्यात्तिर्यक्चैवतुभस्मना ॥ चंदनेनोभयंकुर्यादन्यथानरकंव्रजेत् ॥ स्नात्वापुंड्रंमृदाकुर्याद्धोमंकृत्वातुभस्मना ॥ अभ्यंगोत्सवकालेषुकस्तूरीचंदनादिना ॥ ऊर्ध्वपुंड्रंत्रिपुंड्रंवाब्राह्मणैःकर्मकर्तृभिः ॥ वर्जयेत्तिलकंभालेश्राद्धेचैवतुतर्पणे ॥ स्नानादौजपहोमादौस्वाध्यायेपितृकर्मणि ॥ यस्त्रिपुंड्रंविनाकुर्यात्तत्सर्वंनिष्फलंभवेत् ॥ ॥ अभ्यंगेसूतकेरात्रौविवाहेपुत्रजन्मनि ॥ मांगल्येषुचसर्वेषुनधार्यंगोपिचंदनं ॥ ऊर्ध्वपुंड्रंसदाकुर्याच्छ्रौतेस्मार्तेचकर्मणि ॥ ॥ नैवतिर्यङ्मृदाकुर्यादूर्ध्वपुंड्रंचभस्मना ॥ चंदनेनोभयंकुर्यादितितन्मनुरब्रवीत् ॥ त्रिपुंड्रंसुरविप्राणांवर्तुलंनृपवैश्ययोः ॥ ॥ अर्धचंद्रंतुशूद्राणामन्येषामूर्ध्वपुंड्रकं ॥ इतिधर्मप्रवृत्तौऊर्ध्वपुंड्रविधिः ॥ द्वारावत्युद्भवाद्गोपीचंदनादूर्ध्वपुंड्रकं ॥ धारयेन्नित्यमेवंहिपापंहंतिदिनेदिने ॥ जान्हवीतीरसंभूतांमृदंमूर्ध्नाबिभर्तियः ॥ बिभर्तिरूपंसोर्कस्यतमोनाशायकेवलं ॥ अंगुष्ठःपुष्टिदःप्रोक्तोमध्यमायुष्करीभवेत् ॥ अनामिक्यन्नदानित्यंमुक्तिदाचप्रदेशिनी ॥ ललाटेकेशवंविद्यान्नारायणमथोदरे ॥ ॥ माधवंहृदिविन्यस्यगोविंदंकंठकूबरे ॥ उदरेदक्षिणेपार्श्वेविष्णुरित्यभिधीयते ॥ तत्पार्श्वेबाहुमध्येतुविन्यसेन्मधुसूदनं ॥

shrinath.udupa@gmail.com

॥ त्रिविक्रमंकर्णदेशेवामकुक्षौतुवामनं ॥ श्रीधरंबाहुकेवामेहृषीकेशंतुकर्णके ॥ पृष्ठदेशेपद्मनाभंकुकुदामोदरंस्मरेत् ॥ द्वाद
शैतानिनामानिप्रणवंचैवमूर्धनि ॥ संकर्षणादिभिःकृष्णेशुक्लेचेत्केशवादिभिरिति ॥ भाले ॥ दशांगुलप्रमाणंतुत्द्युत्तमो-
त्तममुच्यते ॥ नवांगुलंमध्यमंस्यादष्टांगुलमतःपरमिति ॥ शौनकः ॥ स्मृतिसारसमुच्चये ॥ गोपीचंदनलिप्तांगोयंयंपश्य
तिचक्षुषा ॥ तंतंशुद्धंविजानीयान्नात्रकार्याविचारणा ॥ अशुचिर्वाप्यनाचारोमनसापापमाचरन् ॥ शुचिरेवभवेन्नित्यं-
मूर्ध्वपुंड्रंविनातुतत् ॥ यत्कर्मकारयेन्नित्यंतत्सर्वंनिष्फलंभवेत् ॥ ऊर्ध्वपुंड्रंत्रिपुंड्रौतौधारयेद्वैदिकोत्तमः ॥ तयोरेकंपरि-
त्यज्यरौरवंनरकंव्रजेत् ॥ नपादुकस्थोनादर्शेनजलेचावलोकयेत् ॥ नग्नावृतशिराःकुर्यात्तिलकंधर्मसाधनं ॥ वेदमार्गैकनि
ष्ठस्तुमोहेनाप्यंकितोयदि ॥ पतत्येवनसंदेहस्तथापुंड्रांतरादापि ॥ नांकनंविग्रहेकुर्याद्वेदपंथानमाश्रितः ॥ पुंड्रांतरंभ्रमाद्वा
पिललाटेनैवधारयेत् ॥ ऊर्ध्वपुंड्रंमृदाकुर्यात्त्रिपुंड्रंभस्मनाचरेत् ॥ ऊर्ध्वपुंड्रंत्रिपुंड्रंवाःचंदनेनयथारुचि ॥ इतितिलकविधिः ॥
अथसंग्रहेत्रिपुंड्रविधिः ॥ कात्यायनः ॥ श्राद्धेयज्ञेजपेहोमेवैश्वदेवेसुरार्चने ॥ धृतत्रिपुंड्रःपूतात्मामृत्युंजयतिमानवः ॥ भविष्ये ॥
सितेनभस्मनाकुर्याद्त्रिसंध्यंचात्रिपुंड्रकं ॥ सर्वपापविनिर्मुक्तःशिवेनसहमोदते ॥ स्मृतिरत्नावल्यां ॥ ललाटेत्हृदयेनाभौगलांसेबा-
हुसंधिषु ॥ पृष्ठदेशेशिरस्येवंस्थानेष्वेतेषुधारयेत् ॥ पुलस्त्यः ॥ अग्निरित्यादिभिर्मंत्रैशुद्धब्रह्माभिमंत्रितं ॥ शिवमंत्रेणतद्धार्यंमंत्रे
णाष्टाक्षरेणवा ॥ गायत्र्यावाचदेवर्षेमंत्रेणप्रणवेनवा ॥ करोतिशिवमंत्रेणयस्त्रिपुंड्रंद्विजोत्तमः ॥ त्र्यक्षःशूलधरःसौम्योशिवलोके
महीयते ॥ अष्टाक्षरेणमंत्रेणयःकरोतित्रिपुंड्रकं ॥ विष्णोःपदमवाप्नोतिनान्यथाश्रुतिचोदितं ॥ सौरंपदमवाप्नोतिगायत्र्यामुनि

shrinath.udupa@gmail.com

सत्तम ॥ प्राप्नोतिब्रह्मणोरूपंप्रणवेननसंशयः ॥ इति ॥ अग्निरितिभस्म ॥ वायुरितिभस्म ॥ जलमितिभस्म ॥ स्थलमितिभस्म ॥ व्योमेतिभस्म ॥ ॥ सर्वँहवाइदंभस्म ॥ ॥ तस्माद्भस्मतमेतत् ॥ पाशुपतंभस्मनासंस्पृशेत् ॥ तस्माद्ब्रह्मतमेतत् ॥ रत्नावल्यां ॥ मध्यमानामिकांगुष्ठैरनुलोमविलोमतः ॥ अतिस्वल्पमनायुष्यमतिदीर्घंतपःक्षयं ॥ नेत्रयुग्मप्रमाणेनत्रिपुंड्रंधारयेद्द्विजः ॥ ॥ पारिजाते ॥ ॥ धार्यंभस्मत्रिसंध्यंतुगृहिणाजलसंयुतं ॥ सर्वकालंभवेत्स्त्रीणांय तीनांलजवर्जितं ॥ वानप्रस्छस्यकन्यानांदीक्षितानांनृणांतथा ॥ मध्यान्हात्प्राग्जलैर्युक्तंपरतोजलवर्जितम् ॥ मध्यांगुलीत्रयेणैवस्वदक्षिणकरस्यच ॥ त्रिपुंड्रंधारयेद्विद्वान्सर्वकल्मषनाशनं ॥ त्रिपुंड्रंयद्यधृत्वातुकुर्यात्कर्मतुतद्वृथा ॥ प्रख्याख्यातप्रमादस्यश्रूयतेतैत्तिरेयके ॥ भूत्यैनप्रमदितव्यं ॥ भस्मनोद्धूलनंचैवतथातिर्यक्त्रिपुंड्रकं ॥ श्रुत्याविधीयतेयस्मात्तत्सागीपतितोभवेत् ॥ बौधायनः ॥ येभस्मधारिणंदृष्ट्वावाचानिंदंतिमानवाः ॥ तेषांशूद्रेणसंभूतिरनुमेयाविपश्चिता ॥ गौतमः ॥ शंखचक्रान्वितंकर्मयत्कृतंसुकृतंभवेत् ॥ अंकनंधारयेद्यस्तुरौरवंनरकंव्रजेत् ॥ कश्यपः ॥ भस्महीनंतुयत्कर्मकरोतिज्ञानदुर्बलः ॥ सर्वंतद्व्यर्थमेवस्यात्तस्माद्भस्मैवधारयेत् ॥ व्याघ्रपादः ॥ यस्यभस्मनिविद्वेषःसतुचांडालजःस्मृतः ॥ तस्यदर्शनमात्रेणसवासाजलमाशिवेत् ॥ धारणप्रकारः ॥ स्मृत्यंतसारे ॥ अग्निरितिभस्मेत्यभिमंत्र्यमानस्तोकेतिकश्यपस्येतिद्राभ्यामुदकेनालोड्य ॥ ईशानायनमइतिशिरसि ॥ तत्पुरुषायेतिमुखे ॥ अघोरायेतित्हृदये ॥ वामदेवायेत्यूर्वाः ॥ सद्योजातायेतित्रिपुंड्रं ॥ ब्रह्मणेनमइतिललाटे ॥ स्कंदायेतिनाभौ ॥ अग्नयेनमइतित्हृदये ॥ पूष्णेनमइतिकंठे ॥ रुद्रायेतिदक्षिणबाहुमूले ॥ आदित्यायेतिदक्षिणकर्पूरे

shrinath.udupa@gmail.com

॥ चंद्रायेतिदक्षिणमणिबंधे ॥ वामदेवायेतिवामबाहुमूले ॥ प्रभंजनायेतिवामकूपरे ॥ वसुभ्योनमइतिवाममणिबंधे ॥ हरायेति पृष्ठे ॥ आत्मनेनमइतिशिरसि ॥ अतोग्निहोत्रजनैवभस्मनाचत्रिपुंड्रकं ॥ नित्यंद्विजोऽप्रमादेनकुर्यात्कर्मविशुद्धये ॥ अन्यथास र्वकर्माणिनफलंतिकदाचन ॥ त्रिपुंड्रंधृग्वरोविप्रोयोरुद्राक्षधरःशुचिः ॥ सहंतिरोगदुरितव्याधिदुर्भिक्षतस्करान् ॥ समाप्नोति परंब्रह्मयतोनावर्ततेपुनः ॥ सपंक्तिपावनःश्राद्धेपूज्योविप्रैःसुरैरपि ॥ इतिसंग्रहेत्रिपुंड्रविधिः ॥ अथधर्मप्रवृत्तौभस्मधारणविधिः ब्राह्मणानांनृपाणांचभस्ममिश्रंतुचंदनं ॥ नेत्रयुग्मप्रमाणंचत्रिपुंड्रंधारयेद्बुधः ॥ नारदः ॥ त्रिपुंड्रंपरमंपुण्यंकुर्याद्विष्णु शिवात्मकं ॥ येजीवाराक्षसाःप्रोक्तायेचान्येक्षुद्रजंतवः ॥ त्रिपुंड्रधारणंदृष्ट्वापलायंतेनसंशयः ॥ विष्णुः ॥ यस्यपंक्तौ द्विजोभुंक्तेशिवभक्तास्त्रिपुंड्रधृक् ॥ सतांपंक्तिपुनात्येवसकलांचतुरानन ॥ भक्तिर्यस्यभवेद्यस्मिन्मृदिवाप्यथभस्मनि ॥ तदे वधारयेद्विद्वानितिवैमुनयोविदुः ॥ इतिधर्मप्रवृत्तौभस्मधारणविधिः ॥ अथसंध्याकालः ॥ अहोरात्रस्ययौसंधीसूर्यनक्ष त्रवर्जितौ ॥ तयोःसंध्यासमाख्यातामुनिभिस्तत्वदर्शिभिः ॥ संध्योत्तमातृतीयांशेपंचधांशदिनस्यतु ॥ मध्यान्हीकींतदू र्ध्वंवापूर्ववास्यादिवैवाहि ॥ संध्याकालेतुसंप्राप्तेसंध्यानैवमुपासिता ॥ जीवमानोभवेच्छूद्रोमृतःश्वौचवजायते ॥ कालेतुवंदि तासंध्यास्वर्गमोक्षप्रदायिनी ॥ अकालेवंदितासंध्यासाचवंध्यावधूरिव ॥ अथकाललोपप्रायश्चित्तं ॥ संध्याकालेत्वति क्रांतेस्नात्वाचैवयथाविधि ॥ जपेदष्टशतंदेवींततःसंध्यांसमाचरेत् ॥ जमदग्निः ॥ एकाहंसमतिक्रम्यप्रमादादकृतंयदि ॥ ॥ अहोरात्रोषितोभूत्वागायत्र्याश्चायुतंजपेत् ॥ राष्ट्रभंगेनृपक्षोभेरोगार्तेसूतकेपिच ॥ संध्यावंदनाविच्छित्तिर्नदोषायकदाचन ॥

shrinath.udupa@gmail.com

देवाग्निद्विजविद्यानांकार्येभहतिसंस्थिते ॥ संध्याहीनेनदोषोस्तियतस्तत्कर्मसाधनात् ॥ इतिधर्मप्रवृत्तौसंध्याकाललोपप्राय-श्चितं ॥ अथसंग्रहेसंध्याविधिः ॥ संध्यात्रयंतुकर्तव्यंद्विजेनात्मविदासदेति ॥ व्यासः ॥ गायत्रीनामपूर्वाण्हेसावित्री मध्यमोदिने ॥ सरस्वतीचसायान्हेसैवसंध्यात्रिषुस्मृतेति ॥ अत्रसंध्याशब्दआदित्यशब्दवाच्यदेवतापरः ॥ संध्याकालोपास्यत्वादि तिमाधवः ॥ सम्यग्ध्येयत्वात्संध्या ॥ अथसंध्याकालः ॥ उत्तमात्तारकोपेतामध्यमालुप्ततारका ॥ अधमासूर्यसहिता प्रातःसंध्यात्रिधामता ॥ उत्तमासूर्यसहितामध्यमालुप्तसूर्यका ॥ कनिष्ठातारकोपेतासायंसंध्यात्रिधामतेति ॥ अथदेशः ॥ ॥ व्यासः ॥ गृहेत्वेकगुणासंध्यागोष्टेदशगुणामता ॥ दशसाहस्रिकानद्यामनंताविष्णुसंनिधौ ॥ बहिःसंध्यादशगुणाअ-नंताजान्हवीजले ॥ शातातपः ॥ अनृतंमद्यगंधंचदिवामैथुनमेवच ॥ पुनातिवृषलस्यान्नंबहिःसंध्यात्युपासितेति ॥ अ-त्रिः ॥ संध्यात्रयंतुकर्तव्यंद्विजेनात्मविदासदा ॥ उभेसंध्येतुकर्तव्येब्राह्मणैस्तुगृहेष्वपीति ॥ अथसंध्याप्रयोगः ॥ आ-चमनप्राणायामौकृत्वा ॥ शौनकः ॥ नासिकामंगुलीभिश्चतर्जनीमध्यमाहते ॥ दक्षिणेनसमाकृष्यसव्येनतुविसर्जयेत् ॥ प्रण-वादिशिरोंतांतुगायत्रींत्रिःपठेद्द्विजः ॥ प्राणानायम्यविधिवद्वाग्यतःसंयतेंद्रियः ॥ अथसंध्यामुपासिष्यइतिसंकल्पमुच्चरेत् ॥ ॥ ऋग्विधाने ॥ नवप्रणवयुक्तेनआपोहिष्ठादृचेनच ॥ संवत्सरकृतंपापंमार्जनांतेविनश्यतीति ॥ मंत्राचमनंगृह्यपरिशिष्टे ॥ सू यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्योरक्षंतांयद्राव्यापापमकार्षंमनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्नारात्रिस्तदवलंप-तुयात्किंचिदुरितंमयि इदमहंमाममृतयोनौसूर्येज्योतिषिजुहोमिस्वाहेतिप्रातः ॥ आपःपुनंत्वितिमध्यान्हे ॥ सूर्यस्थानेऽग्निपदं रात्रि

shrinath.udupa@gmail.com

स्छानेअन्हपदंसत्सेज्योतिषीतिसायं॥गृह्यपरिशिष्टेद्वितीयमार्जनंपुनराचम्यमार्जयेत् ॥ आपोहिष्ठेतिसूक्तेनगायत्रीशिरसाचांभसा आत्मानंपरिषिंचेत् ॥ भगवान् ॥ प्रणवेनव्याहृतिभिर्गायत्र्याप्रणवाद्यया ॥ आपोहिष्ठेतिसूक्तेनमार्जनंहिचतुर्थकं ॥ प्रजापतिः ॥ ॥ ऋगंतेमार्जनंकुर्यात्पादांतेवासमाहितः ॥ अर्धचांतेथवाकुर्याच्छिष्टानांमतमीदृशं ॥ भगवान् ॥ उधृत्यदक्षिणेहस्तेजलं गोकर्णवत्कृते ॥ निःश्वासंनासिकाग्रेतुपाप्मानंपुरुषंस्मरेत् ॥ ऋतंचेतितृचेनैवतज्जलंतुक्षितौक्षिपेत् ॥ जलेष्वर्घ्यंप्रदातव्यं जलाभावेशुचिस्छले ॥ संप्रोक्ष्यवारिणासम्यक्ततोर्घ्यंतुप्रदापयेदिति ॥ अथगायत्रीजपः ॥ तथाचगृह्यं ॥ यज्ञोपवीती निसोदकः संध्यामुपासीतवाग्यतः सायमुत्तरापराभिमुखोन्वष्टमदेशंसावित्रींजपेदर्धास्तामितेमंडलआनक्षत्रदर्शनादेवंप्रातः प्राङ्मुखस्तिष्ठन्मंडलदर्शनात्इति ॥ स्मृत्वोंकारंचगायत्रींबध्नीयात्तुशिखांततः ॥ पुनराचम्यहृदयंबाहुस्कंधौचसंस्पृशेत् ॥ ॥ शंखः ॥ दैवादिदिवाकर्माऽकृतेविशेषःस्मर्यते ॥ रात्रौप्रहरपर्यंतंदिवाकर्माणिकारयेत् ॥ अवगाहंब्रह्मयज्ञंसौरजप्यंच वर्जयेत्इति ॥ अथगायत्रीन्यासः ॥ ॐभूःहृदयायनमः ॥ ॐभुवःशिरसेस्वाहा ॥ ॐस्वःशिखायैवषट् ॥ ॐतत्सवितुर्वरेण्यं॥ कवचायहुं॥ॐभर्गोदेवस्यधीमहि॥नेत्रत्रयायवौषट्॥ॐधियोयोनःप्रचोदयात्॥अस्त्रायफट्॥ॐअकारंनाभौ॥ ॐउकारंहृदये ॥ ॐमकारंमूर्ध्नि ॥ ॐभूःपादाभ्यां० ॥ ॐभुवःजानुभ्यां० ॥ ॐस्वःगुह्याय० ॥ महःनाभ्यैनमः ॥ जनःहृदयाय०॥ ॥ तपःकंठाय० ॥ सत्यं शिरसे० ॥ तत्पादाभ्यां० ॥ सवितुर्जंघाभ्यां० ॥ वरेण्यंकट्यै० ॥ भर्गः नाभ्यै० ॥ देवस्यहृदयाय० ॥ धीमहिकंठाय० ॥ धियःमुखाय० ॥ योनःललाटाय० ॥ प्रचोदयात्शिखायैवौषट् ॥ अथाक्षरन्यासः ॥ तत्पा

shrinath.udupa@gmail.com

दाभ्यां० ॥ सगुल्फाभ्यां० ॥ विजंघाभ्यां० ॥ तुजानुभ्यां० ॥ वंऊरुभ्यां० ॥ रेगुदाय० ॥ णिलिंगाय० ॥ यंकट्यैः ॥ भनाभ्यै
न० ॥ गोंउदराय० ॥ देस्तनाभ्यांन० ॥ वहृदयाय० ॥ स्यकंठाय० ॥ धीमुखाय० ॥ मतालुदेशाय० ॥ हिनासिकायै० ॥
॥ धिनेत्राभ्यां० ॥ योभ्रूभ्यां० ॥ योललाटाय० ॥ नःपूर्वमुखाय० ॥ प्रदक्षिणमुखाय० ॥ चोपश्चिममुखाय० ॥ दउत्तरमुखा
य० ॥ यामूर्ध्वेत्० ॥ तसर्वत्र ॥ आपोगुह्याय० ॥ ज्योतिर्नेत्राभ्यां० ॥ रसोमुखाय०॥ अमृतंजानुभ्यां० ॥ ब्रह्मभूःपादाभ्यां०॥
॥ भुवःनाभ्यै ॥ स्वरोंललाटाय० ॥ अथक्रमेणध्यानानि ॥ प्रातःसंध्यांगायत्रींत्र्यक्षांबालामक्षसूत्रकमंडलुधरांरक्तांरक्तवर्णां ॥
ऋग्वेदकृतोत्संगांरक्तपुष्पमालाविभूषितांब्रह्माणीं ब्रह्मदैवत्यांब्रह्मलोकनिवासिनीं ॥ आवाहयाम्यहंदेवीमायांतींसूर्यमंडला
त् ॥ अन्यच्च ॥ मुक्ताविद्रुमहेमनीलधवलछायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटांतत्वार्थवर्णात्मिकां ॥ गायत्रींवरदाभ
यांकुशकरांशुभ्रंकपालंगुणंशखंचक्रमथारविंदयुगलंहस्तैर्वहंतींभजे ॥ एवंध्यात्वाजपेन्मौनीगायत्रींश्रद्धयान्वितः ॥ अष्टोत्त
रसहस्रंवाअष्टोत्तरशतंतुवा ॥ अष्टाविंशतिवारंवादशवारमथापिवा ॥ अथाचगृह्यपरिशिष्टे ॥ शुचौदेशेदर्भामसोक्षितेद-
र्भान्संस्तीर्यव्याहृतिभिरुपविश्यप्राणायामत्रयंकृत्वाऋषिदैवतछंदांस्यनुस्मृत्यषड्भिस्तदंगैर्मंत्रैर्यथांगमात्मानंतद्रूपंभावयेत् ॥
॥ अस्त्रंप्राच्यादिदशदिक्षुन्यसेत् ॥ एषोंगन्यासोप्येकेनेच्छंति ॥ सहिविधिरवैदिकइति ॥ अथमंत्रदेवतांध्यात्वा ॥
॥ आगच्छवरदेदेवीत्यावाह्यतिष्ठन्नर्धनक्षत्रेष्वामंडलदर्शनात् मंत्रार्थमनुसंदधानः ॥ प्रणवव्याहृतिपूर्वकंसावित्रींजपेदिति ॥
॥ ऋष्यादिन्यासानंतर ॥ सहस्रपरमांदेवींशतमध्यांदशावरां ॥ गायत्रींसंस्मरेद्धीमान्हृदिवासूर्यमंडले ॥ व्यासः ॥ ब्रह्मचारी

shrinath.udupa@gmail.com

गृहस्थश्शतमष्टोत्तरंजपेत् ॥ वानप्रस्थोयतिश्चैवसहस्रादधिकंजपेत् ॥ अष्टोत्तरशतंनित्यमष्टाविंशतिमेववा ॥ विधिनाद-
शकंचैवत्रिकालेपिजपेद्बुधश्चरेत् ॥ वस्त्रेणाच्छाद्यतुकरंदक्षिणंयःसदाजपेत् ॥ तस्यतत्सफलंजप्यंतद्धीनमफलंस्मृतं ॥ व्यासः ॥
॥ गायत्रीतुभवेद्रक्तासावित्रीशुक्लवर्णिका ॥ सरस्वतीतथाकृष्णाउपास्यावर्णभेदतश्चेति ॥ गायत्रीब्रह्मरूपातुसावित्रीरुद्ररू
पिणी ॥ सरस्वतीविष्णुरूपाज्ञेयावर्णप्रभेदतः ॥ अथासनानि ॥ कौशेयंकंबलंचैवअजिनंपट्टमेवच ॥ दर्भजंबालपत्रंच
आसनंपरिकल्पयेत् ॥ शंखरुप्यमयीमालाकांचनीवनजोत्पलैः ॥ पद्माक्षकैश्चरुद्राक्षैर्विद्रुमैर्मणिमौक्तिकैः ॥ वंशासनेदरिद्रःस्या
त्पाषाणेव्याधिसंभवः ॥ धरण्यांदुःखसंभूतिर्दौर्भाग्यंदारुकासने ॥ तृणासनेयशोहानिःपल्लवेचित्तविभ्रमः ॥ कृष्णाजिनेज्ञान
सिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि ॥ आभिचारेचनीलंस्यात्कंबलंव्याधिकर्मसु ॥ श्वेतवस्त्रेयशोवृद्धिःसर्वार्थाश्चित्रकंबले ॥ सायणीये ॥
भिन्नासनंयोगपट्टस्तथैवमृगचर्मच ॥ कृष्णाजिनंचयत्नेनवर्जयेत्पुत्रवान्सदा ॥ आधारादिनमस्कुर्यात्कुशाग्रैरासनंततः ॥ प्राणा-
यामत्रयंकुर्यादुपविश्यकुशासने ॥ अथकामनापरत्वान्मालाविधिः ॥ शंखाक्षमणयःश्रीदाःस्फाटिकामोक्षदाःपराः ॥ पद्माक्षाः
पुष्टिलक्ष्मीदारुद्राक्षाभुक्तिमुक्तिमुदाः ॥ पापक्षयाःकुशमयाःकामदाःस्वर्णरौप्यजाः ॥ प्रवाळमुक्तास्फटिकैर्जपःकोटिफलप्रदः ॥
पुत्रजीवभवाःपुत्रपशुधान्यसमृद्धिदाः ॥ विद्रुमावश्यधनदाःसौभाग्यार्थाश्चमौक्तिदाः ॥ तुळसीमणिनायेनगणनंचाक्षयंभवेत् ॥
रुद्राक्षमणिनाचैवह्यनंतंफलमश्नुते॥ अथरुद्राक्षधारणं ॥ रुद्राक्षान्कंठदेशेदशनपरिमितान्मस्तकेविंशतीद्वेषट्पट्कर्णप्रदेशेकरयुगल
कृतेद्वादशद्वादशैव ॥ वह्नेरिंदोःकलाभिर्नयनयुगकृतेएकमेकंशिखायांवक्षस्याष्टाधिकंयःकलयतिचशतंसःस्वयंनीलकंठः ॥

shrinath.udupa@gmail.com

अथमुद्राः ॥ सुमुखंसंपुटंचैववितताविस्तृतंतथा ॥ द्विमुखंत्रिमुखंचैवचतुःपंचमुखंतथा ॥ षण्मुखाधोमुखंचैवव्यापकांजलिकं तथा ॥ शकटंयमपाशंचग्रंथितंचोल्मुकोन्मुखं ॥ प्रलंबंमुष्टिकंचैवमच्छःकूर्मवराहकं ॥ सिंहःक्रांतंमहाक्रांतंमुद्गरंपल्लवंतथा ॥ ॥ चतुर्विंशतिमुद्रैतागायत्र्याःसंप्रकीर्तिताः ॥ एतामुद्रानजानातिगायत्रीनिष्फलाभवेत् ॥ अथगायत्रीतर्पणं ॥ अस्मिन्कालेसर्वव्यापिसवितृप्रीत्यर्थंगायत्रीतर्पणमहंकरिष्ये ॥ ॐभूःपुरुषमृग्वेदायनमस्तर्पयामि ॥ ॐभुवःपुरुषंयजुर्वेदायनमस्त र्पयामि ॥ ॐस्वःपुरुषंसामवेदायनमस्त० ॥ ॐमहःपुरुषमथर्ववेदायनमस्त० ॥ ॐजनःपुरुषमितिहासपुराणेभ्योनमस्त० ॥ ॥ ॐतपःपुरुषंसर्वागमायनमस्त० ॥ ॐसत्यंपुरुषंसर्वलोकायनमस्त० ॥ ॐभूःभुवःस्वरृग्यजुःसाममंडलांतर्गतायश्रीसावित्रे-नमस्त० ॥ ॐभूःएकपदागायत्र्यै० ॥ ॐभुवःद्विपदागायत्र्यैनमस्त० ॥ ॐस्वश्चत्रिपदागायत्र्यैनमस्त० ॥ ॐभूर्भुवःस्वश्चतुष्प दागायत्र्यैनमस्त० ॥ उपसेनमस्त० ॥ गायत्र्यैनमस्त० ॥ सावित्र्यै० ॥ सरस्वत्यै० ॥ वेदमात्रे० ॥ पृथिव्यै० ॥ जयायै० ॥ सां-कृत्यै० ॥ कौशिक्यै० ॥ सर्वापराजितायै० ॥ सहस्रमूर्त्यै० ॥ अनंतानंतमूर्त्यै० ॥ २४ ॥ इतिगायत्रीतर्पणं ॥ अथसंध्यातर्पणं ॥ गायत्र्याव्यासऋषिः ॥ ब्रह्मादेवता ॥ गायत्रीछंदः ॥ प्रातःसंध्यातर्पणेवि० ॥ ॐभूःपुरुषंतर्पयामि ॥ १ ॥ ऋग्वेदंत० ॥ २॥ मंडलंत० ॥ ३ ॥ हिरण्यगर्भरूपिणंत० ॥ ४ ॥ आत्मानंत० ॥ ५ ॥ वेदमातरं० ॥ ६ ॥ गायत्रीं० ॥ ७ ॥ सांकृतिं० ॥ ८ संध्यां० ॥९ ॥ कौमारीं० ॥ १० ॥ ब्राह्मीं० ॥ ११ ॥ उषसं० ॥१२॥ निर्भुजं० ॥ १३ ॥ सर्वार्थसिद्धिकरीं० ॥ १४ ॥ सर्वमंत्राधि पतिं० ॥ १५ ॥ भूर्भुवःस्वःपुरुषं० ॥ १६ ॥ इतिप्रातः ॥ सावित्र्याकश्यपऋषिःरुद्रोदेवताउष्णिकछंदःमाध्यान्हसंध्यातर्पणेविनि

shrinath.udupa@gmail.com

योगः ॥ १ ॐभूःपुरुषंत० ॥ २ ॐभुवःपुरुषं० ॥ ३ यजुर्वेदं० ॥ ४ मंडलं० ॥ ५ रुद्ररूपिणं० ॥ ६ आत्मानं० ॥ ७ वेदमातरं० ८ सावित्रीं० ॥ ९ सांकृतीं० ॥ १० संध्यां० ॥ ११ युवतीं० ॥ १२ रौद्रीं० ॥ १३ उषमासीं० ॥ १४ निर्मृजां० ॥ १५ सर्वार्थसिद्धीकरीं० ॥ १६ सर्वमंत्राधिपतिं० ॥ १७ ॐभूर्भुवःस्वःपुरुषं ॥ इतिमध्यान्हे ॥ सरस्वत्यावशिष्ठऋषिः ॥ विष्णुर्देवता॥ अनुष्टुप्छंदः ॥ सायंसंध्यातर्पणेविनियोगः॥ १ ॐस्वःपुरुषंत० ॥ २ सामवेदं०॥ ३ मंडलं० ॥ ४ विष्णुरूपिणं० ५ आत्मानं० ॥ ६ वेदमातरं० ॥ ७ सरस्वतीं० ॥ ८ सांकृतिं० ॥ ९ संध्यां० ॥ १० सवितारं० ॥ ११ वैष्णवीं० ॥ १२ उषसं० ॥ १३ निर्मृजीं० ॥ १४ सर्वार्थसिद्धिकरीं० ॥ १५ सर्वमंत्राधिपतिं० ॥ १६ ॐभूर्भुवःस्वःपुरुषं० ॥ इतिसायं॥ ॥ अथोपस्छानंगृह्यपरिशिष्टे ॥ मित्रोजनानितिवर्चस्यसूक्तस्यगाथिनोविश्वामित्रऋषिः ॥ मित्रोदेवता ॥ त्रिष्टुप्छंदः ॥ अंत्या श्चतस्रोगायत्र्यः ॥ मित्रोपस्छानेवि० ॥ तद्वोदिवइतिमंत्रस्यगौतमोवामदेवऊषात्रिष्टुप् ॥ उषोष० ॥ गणानांत्वाशौनको गृत्समदोगणपतिर्जगति ॥ गणपत्युप० ॥ जातवेदसेभारीचःकश्यपोदुर्गात्रिष्टुप् ॥ दुर्गाग्नी० उ० ॥ त्र्यंबकमितिमैत्रावरु णिर्वसिष्ठोरुद्रोनुष्टुप् ॥ रुद्रप्रीत्यर्थेउ० ॥ तच्छंयोर्नमोब्रह्मणइतिप्रातः ॥ मध्यान्हकालमधिकृत्यउद्धाहुरुदङ्मुखः ॥ उदुत्यं जातवेदसमित्यादि ॥ गायत्रीजपमासीनोयथेष्टंकुर्यात् ॥ अथसायं ॥ यच्चिद्धीतिदशर्चस्याजीगर्तिःशुनःशेपःसंकृत्रिमोदे वरातोवरुणोगायत्री ॥ वरुणप्रीत्यर्थेज० ॥ शेषंपूर्ववत ॥ सायंप्रातश्चोपस्छानेविशेषमाहभगवान् ॥ नमोब्रह्मणइत्येवंत्रि रुक्तादिशोनमेत् ॥ इममेवरुणतत्वायामीतिसायंविशेषः ॥ संध्यामुपासतेयेतुसततंशंसितव्रताः ॥ विधूतपापास्तेयांतिब्रह्मलोकंस

shrinath.udupa@gmail.com

नातनं ॥ संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु ॥ यदन्यत्कुरुतेकर्मनतस्यफलभाग्भवेत् ॥ काम्यजपानाहाचार्यः ॥
॥ वैष्णवैर्वारुणैःसौरैःपावमानीभिरेवच ॥ क्षपयेदाशुपापानिकामांश्चानिखिलान्लभेत् ॥ रौद्रैर्विशेषतोघोरान्ब्रह्महत्यादि
कानपि ॥ क्षपयेत्पौरुषेणापिकामांश्चेच्छतिदुर्लभान् ॥ शतरुद्रेणजप्तेनचास्यवामीयकेनवा ॥ मोक्षमृच्छत्यसंदेहंकिमन्यदाधि
कंततइति ॥ विष्णोर्नुकंजपेत्सूक्तंविष्णुरूपीभविष्यतीति ॥ गोभिलः ॥ संध्यायेननाविज्ञातासंध्यायेनानुपासिता ॥ जी
वमानोभवेच्छूद्रोमृतश्चाभिजायतइति ॥ मरीचिः ॥ सूतकेकर्मणांत्यागःसंध्यादीनांविधीयतेइति ॥ भरद्वाजः ॥ सूतके
मृतकेकुर्यात्प्राणायाममंत्रकं ॥ तथामार्जनमंत्रास्तुमनसोच्चार्यमार्जयेत् ॥ गायत्रीमन्यगुच्चार्यसूर्यायार्घ्यंनिवेदयेत् ॥ मा-
र्जनंतुनवाकार्यमुपस्थानंनचैवहीति ॥ आश्वलायनः ॥ आपन्नश्चाशुचिःकालेतिष्ठन्नापिजपेदृशेति ॥ श्राद्धभोजिनासंध्याधि
कारसिद्धयेविशेषः ॥ दशकृत्वःपिबेदापोगायत्र्याश्राद्धभुग्द्विजः ॥ ततःसंध्यामुपासीतशुद्ध्येचतदनंतरमिति ॥ स्नानकाल
जप्यविशेषमाहव्यासः ॥ द्रुपदानामगायत्रीवेदेवाजसनेयके ॥ सकृदंतर्जलेजप्त्वाब्रह्महत्यांव्यपोहतीति ॥ कारिकायां ॥
॥ अन्यच्चाहरहःकृत्यंसंध्योपासनमुच्यते ॥ ग्रामाद्बहिरपांतीरेउपाविश्यैवसद्विजः ॥ आचम्यमार्जनादन्यत्स्मृत्युक्तंचकरोत्य
थ ॥ स्वशाखाविधिनाचैवसंध्याकर्मसमाचरेत् ॥ शौचाचारेतथापानेस्पृश्यस्पर्शेचचर्वणे ॥ पौराणाचमनंकुर्यान्नामभिःकेश-
वादिभिः ॥ गोकर्णाकृतिहस्तेनमाषमात्रंजलंपिबेत् ॥ तदूनमधिकंवापिसुरापानसमंभवेत् ॥ अंगुष्ठाग्रंसमाकुंच्यमध्य-
मामध्यपर्वणि ॥ गोकर्णंतंविजानीयात्सर्वेष्वाचमनेष्वपि ॥ स्मृत्यंतरे ॥ संहतांगुलिहस्तेनगृहीत्वाचांबुवीक्षितं ॥ मुक्तांगुष्ठक-

shrinath.udupa@gmail.com

निष्ठाभ्यांत्रिःपिबेद्ब्रह्मतीर्थतः ॥ शीतलंनिर्मलंचांबुमधुरंक्षारवर्जितं ॥ ग्राह्यमाचमनेस्नानेदेवेपित्र्येचकर्मणि ॥ अथपुराणाचमनं ॥ केशवाद्यैस्त्रिभिःपीत्वैकेनदक्षकरंमृजेत् ॥ द्वाभ्यामोष्ठौचसंमृज्यएकेनोन्मार्जयेच्चतौ ॥ जलमेकेनसंमंज्यैकेनवा मकरंमृजेत् ॥ एकेनदक्षिणंपादंवाममेकेनचैवहि ॥ संप्रोक्ष्यैकेनमूर्धानमूर्ध्वोष्टंनासिकाद्वयम् ॥ नेत्रयुग्मंकर्णयुग्मंदक्षिणो पक्रमंक्रमात् ॥ नाभिंहृदयमूर्धानौदक्षवामभुजौस्पृशेत् ॥ प्रणवंपूर्वकन्नामचतुर्विंशतिसंख्यया ॥ स्वाहांतंप्राशयेद्वारिन-मोंतंस्पर्शयेदथ ॥ संहतांगुलिभिस्तोयंगृहीत्वादक्षिणेनतु ॥ मुक्तांगुष्ठकनिष्ठेतुत्रिःपिबेद्ब्रह्मतीर्थतः ॥ प्रक्षाल्यहस्तौपीत्वा थसकृदोष्ठावतःपरं ॥ संहतांगुष्ठमूलेनद्विःप्रमृज्यततोमुखं ॥ कृत्वाकरावभिमृशेत्संहतांगुलिभिर्जलं ॥ अद्भिर्वामकरेसिंच्य ताभिःपादौचसंस्पृशेत् ॥ अंगुल्यग्रैस्त्रिभिर्मध्येउरस्योर्ध्वमुपस्पृशेत् ॥ मध्येमध्येजलंस्पृष्ट्वास्पृशेन्नासादिकान्क्रमात् ॥ अंगुष्ठे नप्रदेशिन्याघ्राणंपश्चादुपस्पृशेत् ॥ अंगुष्ठानामिकाभ्यांचचक्षुःश्रोत्रंपृथक्पृथक् ॥ अंगुष्ठोपकनिष्ठाभ्यांनाभिंपश्चादुपस्पृशे-त् ॥ तलेनहृदयंस्पृष्ट्वास्पृशेदंगुलिभिःशिरः ॥ अंगुल्यग्रैर्दक्षिणादिबाहुमूलद्वयंस्पृशेत् ॥ अनेनविधिनाविप्रःकुर्यादाचमनं सदा ॥ अथश्रुत्याचमनं ॥ देव्याःपादौत्रिभिःपीत्वाचाङ्गिलैर्नवभिःस्पृशेत् ॥ सप्तव्याहृतिभिश्चैवशिरोमंत्रैस्पृशेदथ ॥ आ दावंतेचसंध्यायांद्विर्द्विराचमनंस्मृतं ॥ तथैवार्घ्यप्रदानांतेमध्येमध्येसकृत्सकृत् ॥ अथप्राणायामः ॥ दक्षिणेरेचकं कुर्याद्वामेनापूरितोदरं ॥ कुंभकेनजपंकुर्यात्प्राणायामःस उच्यते ॥ पंचांगुलीभिर्नासाग्रेपीडनंप्रणवाधिया ॥ मुद्रेयंसर्वपा पघ्नीवानप्रस्थगृहस्थयोः ॥ कनिष्ठानामिकांगुष्ठैर्नासाग्रस्यचपीडनं ॥ ॐकारमुद्रासाप्रोक्तायतेश्चब्रह्मचारिणः ॥ याज्ञव

shrinath.udupa@gmail.com

स्त्रयः ॥ गायत्रींशिरसासार्धंजपेद्व्याहृतिपूर्विकां ॥ त्रिःपठेदायतप्राणःप्राणायामःसउच्यते ॥ दशप्रणवसंयुक्तांगायत्रीं शिरसासह ॥ त्रिःपठेदा॰ ते ॥ संध्यायामर्घ्यदानेचप्राणायामैकउच्यते ॥ आदावंतेचगायत्र्याःप्राणायामास्त्रयःस्त्रयः ॥ ॥ अथमार्जनंकारिकायां ॥ अथसंध्यामुपासिष्यइतिसंकल्प्यमार्जयेत् ॥ तिसृभिर्मार्जनंकुर्यादापोहिष्ठाकुशोदकैः ॥ स्पृष्ट्वा हस्तेनवामेनतटंनद्यादिकंतुवा ॥ गृहेतुमार्जनंकुर्यान्नान्यथेत्यब्रवीन्मनुः ॥ अथार्घ्यदानं ॥ पाणिभ्यांजलमादायगायत्र्या-चाभिमंत्रितं ॥ रवेराभिमुखास्तिष्ठांस्त्रिरूर्ध्वंसंध्ययोःक्षिपेत् ॥ द्वौपादौतुसमौकुर्यात्पूरयेदुदकांजलिं ॥ गोशृंगमात्रमुत्क्षिप्यज लमध्येजलंक्षिपेत् ॥ कालातिक्रमणेयस्तुत्रिसंध्यामपिसर्वदा ॥ चतुरर्घ्यप्रदातव्यंगायत्र्याशिरसासह ॥ प्रातर्मध्यान्हयोः संध्यांतिष्ठन्नेवसमापयेत् ॥ उपविश्यतुसायान्हेजलेत्वर्घ्यंननिक्षिपेत् ॥ पूर्वोत्तराशाभिमुखःप्रातःप्रयतमानसः ॥ जपंस्ति ष्ठेतसावित्रींसंध्यांतंसकलांततः ॥ ऋष्यादिलक्षणंज्ञात्वारुद्रप्रोक्तेनमार्गतः ॥ न्यासंकुर्याद्विधानोक्तंषडंगंवाथशक्तितः ॥ ॥ शौनकः ॥ प्रातस्तिष्ठन्जपेदेवींसायंचैवोपविश्यच ॥ उपविश्यतुमध्यान्हेजपकर्मसमारभेत् ॥ व्यासः ॥ प्रातर्मध्या न्हयोस्तिष्ठन्गायत्रीजपमारभेत् ॥ उर्ध्वजानुस्तुसायान्हेध्यानालोकनतत्परः ॥ आतारकोदयादेवप्रातःकर्मतदिष्यते ॥ अर्धा स्तमितनक्षत्रमंतरिक्षंयदाततः ॥ आरभ्यमाञ्जुखास्तिष्ठन्जपन्नास्तूर्यदर्शनात् ॥ संध्यायाःसायमुत्पत्तिर्विज्ञेयाविबुधैःसदा ॥ ॥ शौनकः ॥ उपाकृतेहिकुर्वीतसायंसंध्यामुपक्रमादिति ॥ अथजपविधिः ॥ प्रातर्नाभीकरंकृत्वामध्यान्हेहृदिसंस्थितं ॥ ॥ सायंजपतिनासाग्रेजपस्तुत्रिविधःस्मृतः ॥ अंगुष्ठानामिकामूलप्रदक्षिणमतंद्रितः ॥ मध्यमामूलपर्यंतंगाय्याजपईरितः ॥

shrinath.udupa@gmail.com

॥ गायत्रीवेदमूलत्वाद्वेदःपर्वसुगीयते ॥ पर्वभिस्तुजपेद्देवीनमालाभिःकदाचन ॥ उष्णीषीकंचुकीनग्नोमुक्तकेशोगलाकृतः ॥ अ
पवित्रकरश्चैवमलपन्नजपेत्क्वचित् ॥ ॐकारपूर्वमुच्चार्यव्याहृतीश्चततःपरं ॥ गायत्र्याप्रणवार्थांतेजपएषउदाहृतः ॥ तिस्रो-
व्याहृतयःकुर्यात्पृथगोंकारसंयुताः ॥ पुनःसंहृत्यचोंकारंमंत्रस्याद्यंतयोस्ततः ॥ मानसःसिद्धिकामानांपुत्रकामउपांशुकः ॥
॥ वाचकोमारणेचैवप्रशस्तोजपईरितः ॥ वाचकस्त्वेकएवस्यादुपांशुशतमुच्यते ॥ सहस्रंमानसंप्रोक्तंमन्वत्रिभृगुनारदैः ॥
॥ शौनकः ॥ अष्टोत्तरशतंनित्यमष्टविंशतिसंख्यया ॥ विधिनादशकंवापित्रिकालंप्रजपेद्द्विजः ॥ अथप्रदोषेजपः ॥ अष्टा-
विंशत्यनध्यायेसुदिनेतुयथाक्रमं ॥ अथजपस्थानानि ॥ गृहेजपंसमंविद्याद्गोष्ठेशतगुणंभवेत् ॥ पुण्यारण्येतथारामेसहस्र
गुणितंविदुः ॥ अयुतंपर्वतारण्येनद्यांलक्षमुदाहृतं ॥ कोटिंदेवालयेप्राहुरनंतंविष्णुसंनिधौ ॥ सूर्यस्याग्रेगुरोरग्रेदेवीदि-
स्यचजलस्यच ॥ विप्राणांचगवांत्रैवसंनिधौशस्यतेजपः ॥ अश्वत्थमूलमाश्रित्यजपहोमसुरार्चनं ॥ अक्षय्यंफलमाप्नोतिब्र
ह्मणोवचनंयथा ॥ अथनिषेधः ॥ पतितानांचात्यजानांदर्शनेभाषणेश्रुते ॥ क्षुतेऽधोवातगमनेजृंभणेजपमुत्सृजेत् ॥ प्रा-
प्तावाचम्यवैतेषांप्राणायामषडंगकं ॥ कृत्वासम्यग्जपेच्छेषंयद्वासूर्यादिदर्शनं ॥ अथसंध्योपस्थानं ॥ शौनकः ॥ सायंप्रात
रुपास्थानंकुर्यान्मंत्रैर्यथाक्रमं ॥ जातवेदसइत्येकातंच्छंयोरावृणीमहे ॥ नमोब्रह्मणइत्येतैरुपतिष्ठेद्दिशंप्रति ॥ उत्तमेचानु-
वाकेनगायत्रींचविसर्जयेत् ॥ अथप्रसंगान्मध्यान्हसंध्योच्यते ॥ आचार्यः ॥ कुर्यान्मध्यान्हिकींसंध्यांब्रह्मयज्ञादनंतरं ॥
॥ संगवादूर्ध्वमित्याहुर्नचेदर्वागथापिवा ॥ विश्वामित्रः ॥ सकृदर्घ्यंतुमध्यान्हेप्रक्षिपेद्धंसइत्यृचा ॥ आकृष्णेनेतिमंत्रेण

shrinath.udupa@gmail.com

गायत्र्यावेतिकेचन ॥ उपस्थानंतुमध्यान्हेकुर्यात्सूर्यस्यसंमुखः ॥ उदुत्यमितवैचित्रंदेवानामित्यनेनच ॥ अथाभिवादनं ॥ आत्मपादौतथाभूमिंस्पृष्ट्वासंध्याभिवादनं ॥ नक्षत्रंचतथासूर्यंद्विजानप्यभिवादयेत् ॥ स्मृत्यर्थसारे ॥ ज्येष्ठंवाथकनिष्ठंवासंध्यांतेह्यभिवादयेत् ॥ वर्जयेत्तुसुतींशिष्यंदौहित्रंदुहितुःपतिं ॥ नारायणः ॥ नमेद्वेदमधीतारमिति ॥ अथवर्ज्यानाह॥त्रमंतंजृंभमाणंचकुर्वंतंदंतधावनं ॥ अभ्यक्तंक्षुरसंस्थानंकुर्वंतंनाभिवादयेत् ॥ दूरस्थंजलमध्यस्थंधावंतंमदगर्वितं ॥ उन्मत्तंबधिरंमूकमधंतंनाभिवादयेत् ॥ इतिधर्मप्रवृत्तौसंध्याविधिः ॥ दक्षः ॥ संध्याकर्मावसानेतुस्वयंहोमोविधीयतइति ॥ अशक्तंप्रतिसएवाह ॥ ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथवित्पतिः ॥ एतैरपिहुतंयत्स्यात्तद्धुतंस्वयमेवतु इति ॥ वित्पतिर्जामाता ॥ २ ॥ कात्यायनः ॥ असमक्षंतुदंपत्योर्होतव्यंनार्त्विगादिना ॥ द्वयोरप्यसमक्षंतुभवेद्धुतमनर्थकं ॥ उभयोःसंनिधानंतुमुख्यं ॥ एकतरंत्वनुकल्पः ॥ प्रातर्होमस्यकालमाहमनुः ॥ उदितेनुदितेचैवसमयाध्युषितेतथेति ॥ सायंहोमस्यकालमाहकात्यायनः ॥ यावत्सम्यङ्नभाव्यंतेनभस्यृक्षाणिसर्वतः ॥ लोहितत्वंचनापैतितावत्सायंतुहूयते ॥ संगवांतःप्रातःप्रदोषांतःसायमितिबौधायनः ॥ होमकालात्ययेतस्यपुनराधानमिष्यते ॥ याज्ञवल्क्यः ॥ कर्मस्मार्त्तविवाहाग्नौकुर्वीतप्रत्यहंगृही ॥ यदाकालादृतेवापिश्रौतंवैतानिकादिषु ॥ विष्णुः ॥ बहुशुष्केंधनेचाग्नौसुसमिद्धेहुताशने ॥ विधूमेलेलिहानेचहोतव्यंकर्मसिद्धये ॥ इतिसंग्रहेसायंप्रातर्होमविधिः ॥ अथधर्मप्रवृत्तौउपासनाविधिः ॥ पाणिग्रहणादिगृह्यंपरिचरेदितिसूत्रं ॥ होमंकुर्यादनाशौचेष्वृत्विक्कर्तुरनुज्ञया ॥ यदिस्यात्सूतकंकर्तुःकुर्वीतानुज्ञयाविना ॥ अस्तमितेसायंजुहोत्यु-

shrinath.udupa@gmail.com

दितेप्रातरितिब्राह्मणं ॥ कारिकायां ॥ अथयस्मिन्विवाहाग्निरुत्पन्नेहानितस्यतु ॥ यत्सायंतंनमारभ्यवधुंपरिचरेत्स्वयं ॥ ॥ इत्युपासनस्यसायमारंभःसिद्धः ॥ उदितेजुहोतीतिप्रातश्रुतिः ॥ रेखामात्रश्चदृश्येतरश्मिभिश्चसमन्वितः ॥ उदितंतंविजानीयात्तत्रहोमोविधीयते ॥ संग्रहे ॥ अस्तादूर्ध्वंरविर्यावद्ध्रुवंहित्वानगच्छति ॥ तावदेवहिकालोयंप्रातस्तूदितहोमिनां ॥ प्रातर्द्वादशनाड्यस्तुसायंतुनवनाडिकाः ॥ होमकालःसमुद्दिष्टोमुनिभिस्तत्वदर्शिभिः ॥ अथस्थंडिलादिषु ॥ इषुमात्रावरं सर्वस्थंडिलमितिसूत्रं ॥ शौनकोपि ॥ चतुरस्रंचतुष्कोणंप्राचीदिक्प्रणवंतथा ॥ अरत्निमात्रंविज्ञेयंरश्मेरायतनंशुभं ॥ श्रौतमौपासनंवापिखातयोनिविवर्जितं ॥ मेखलाद्वितयंकार्यंरेखात्रयंतुबाह्यतः ॥ बाह्यषडंगुलोत्सेधाभ्यंतराद्वादशांगुला ॥ बाह्याष्टांगुलविस्ताराभ्यंतराचतुरंगुला ॥ औपासनंयत्सदनंतस्मादाहवनीयकं ॥ औपासनविधिःप्रोक्तःशौनकेनमहात्मना ॥ ॥ अन्यपक्षः ॥ नित्यहोमेतुकुंडंस्यान्मेखलात्रयसंयुतं ॥ भूमेरूर्ध्वंप्रकुर्वीतचतुर्विंशांगुलंशुभं ॥ मेखालाचोन्नताकार्यात्वेकैकाचतुरंगुला ॥ अंगुलाविस्तृतैकैकाखातंस्याद्वादशांगुलं ॥ शाकलः ॥ अग्निसंरक्षणेनित्यंयस्यशक्तिर्नविद्यते ॥ समिध्यारोपयेदग्निर्हस्तयोरथवापिच ॥ औपासनमकुर्वाणःस्त्रियंवाथोधिगछति ॥ स्वमातृगमनंप्रोक्तमितिशातातपोब्र० ॥ १ ॥ ॥ अथसमस्यहोमः ॥ कालद्वयेप्यशक्तश्चेदेकस्मिन्कालएववा ॥ प्रागेवोक्तेनाविधिनासमस्यःसायमाचरेत् ॥ समस्यंसायमारभ्यजुहुयात्सायमाहुतीः ॥ परिषिंच्याहुतीःप्रातर्हुत्वातंपरिषेचयेत् ॥ मियंगुव्रीहयःश्यामानीवाराश्चतथापयः ॥ यावनालाश्चगोधूमाउपासनशुभावहाः ॥ स्मृतिः ॥ अश्वत्थसमिधंवापिशमीसमिधमेववा ॥ तदभावेथवाचान्याःसमिधःप्रतपे

shrinath.udupa@gmail.com

हुधः ॥ पालाशःखादिरोश्वत्थःशम्यदुंबरजासमित् ॥ अपामार्गश्चदूर्वाचकुशाश्चेसपरोविदुः ॥ सत्वचःसमिधःकार्याःऋजु श्लक्ष्णाःसमास्तथा ॥ शस्तादशांगुलास्ताःस्युर्द्वादशांगुलिकास्तुवा ॥ पण्मासंतुशमीग्राह्याखादिरातुत्रिमासिकं ॥ मासत्र यंतुपालाशोह्यश्वत्थोरहःस्मृतः ॥ दिनमेकमपामार्गोग्राह्याश्चार्कस्तथैवतु ॥ वटादयोपिकेचित् ॥ अकालेकृतंपारिजाते ॥ ॥ अकालेयत्कृतंकर्मकालंप्राप्यपुनःक्रिया ॥ कालातीतंतुयत्कुर्यात्कृतंचापिहिकर्मतत् ॥ इत्युपासनाविधिः ॥ अथसंग्रहेपं चयज्ञाः ॥ पंचयज्ञान्प्रकुर्वीतविधिदृष्टेनकर्मणा ॥ वैश्वदेवात्क्षणातिथ्यमुद्धृतंचापिशक्तितइति ॥ अंगिराः ॥ यस्मिन्न ग्नौपचेदन्नंतस्मिन्होमोविधीयतइति ॥ अत्रवैश्यदेवशब्देनदेवभूतपितृणांयज्ञास्त्रयउच्यंते ॥ होमोदेवयज्ञःबलिर्भूतयज्ञःस्वधा कारः पितृयज्ञःएवंचतेनैवापितृयज्ञेसिद्धेनित्यश्राद्धार्थब्राह्मणभोजनंनावश्यकं ॥ अतएवदेवलस्तस्ययथाश्राद्धंमनेककालतामह ॥ एतेनविधिनाश्राद्धंकुर्यात्संवत्सरंसकृत् ॥ त्रिश्चतुर्वायथाश्राद्धंमासेमासेतदेनदेनेति ॥ सचायंवैश्वदेवआत्मसंस्कारार्थोन्नसं स्कारार्थश्च ॥ अहरहःकुर्वीतेतिवचनात् ॥ सिद्धस्यहविष्यस्येतिवचनात् ॥ शौनकः ॥ वैश्वदेवमपिप्रोक्तंपूर्वैरेवमनीपि भिः ॥ अन्नस्यचात्मनश्चैवसंस्कारार्थंतदिष्यतइति ॥ तच्चसायंप्रातःकर्तव्यं ॥ उभयकरणासंभवे ॥ प्रातरेवद्विरावृत्याकुर्याद्वा सहतद्विजः ॥ सायंवायदिवाभुंजीयात्तत्कृत्वाजात्वापिस्वयामिति ॥ व्यासः ॥ होमान्नदानरहितंनभोक्तव्यंकदाचन ॥ अवि-भक्तेषुसंसृष्टमेकेनापिकृतंतुवा ॥ पयोमूलफलैर्वापिपंचयज्ञान्समाचरेदिति ॥ आश्वलायनः ॥ बसतामेकपाकेनविभक्ता नामपिप्रभुः ॥ एकस्तुचतुरोयज्ञान्कुर्याद्वाग्यज्ञपूर्वकान् ॥ वाग्यज्ञोब्रह्मयज्ञः ॥ अविभक्ताविभक्ताश्चपृथक्पाकाद्विजातयः ॥

shrinath.udupa@gmail.com

॥ कुर्युःपृथक्पृथक्यज्ञान्भोजनात्प्राक्दिनेदिने ॥ पृथगप्येकपाकानाब्रह्मयज्ञोद्विजन्यनां ॥ सूतकाद्यैस्त्वशुद्धात्सानकुर्यात्न
चकारयेदिति ॥ आपत्त्वपिदातव्यमाकाष्ठमपिजुहुयादाक्रचमपिब्रह्मयज्ञंकुर्यादितिवचनांतराचेति ॥ अलाभेयेनकेनापिफ
लशाकोदकादिभिः ॥ पयोदधिघृतैःकुर्याद्वैश्वदेवंसुव्रतेनतु ॥ हस्तेनान्नादीभिःकुर्यादद्भिरंजलिनाजलइति ॥ शाकंवायदिवा
पत्रंमूलंवायदिवाफलं ॥ संकल्पयेद्यदाहारस्तेनैवजुहुयादपीति ॥ गृह्यपरिशिष्टे ॥ स्मृत्यंतरे ॥ कोद्रवंचणकंमाषंमसुरंचकुलित्थ
कं ॥ क्षारंचलवणंसर्ववैश्वदेवेविवर्जयेत् ॥ परिशिष्टे ॥ उत्तानेनतुहस्तेनह्यंगुष्ठाग्रेणपीडितं ॥ संहतांगुलिपाणिस्तुवाग्यतोजु
हुयाद्धविरिति ॥ वृद्धवसिष्ठः ॥ अनग्निकस्तुयोविप्रःसोन्नंव्याहृतिभिःस्वयं ॥ हुत्वाशाकलमंत्रैश्चशिष्टंकाकबलिहरेदिति ॥ पुत्रो
भ्रातातथाऋत्विक्शिष्यश्वशुरमातुलाः ॥ पत्नीश्रोत्रीययाज्याश्चदृष्टास्तुबलिकर्मणि ॥ अकृत्वावैश्वदेवंतुयोभुंक्तेनापदिद्विजः ॥
समूहोनरकंयातिपाशबद्धोह्यवाक्शिराः ॥ जुहुयात्सर्पिषाभ्यक्तंतैलक्षारविवर्जितं ॥ दध्यक्तंपायसाक्तंवातदभावेभसापिवा ॥
नचुल्यांनायसेपात्रेनभूमौनचखर्परे ॥ वैश्वदेवंप्रकुर्वीतकुंड्यास्थंडिलेपिवा ॥ पंचयज्ञांस्तुयोमोहान्नकरोतिगृहाश्रमी ॥ तस्यना-
यंनचपरोलोकोभवतिधर्मतः ॥ इतिधर्मप्रवृत्तौवैश्वदेवकर्तव्यताविधिः ॥ अथवैश्वदेवः ॥ हविष्यंपक्कमादध्यादधिश्रित्यानलेच
तत् ॥ प्रोक्ष्योद्वास्यघृताभ्यक्तंह्यादिसव्यंनिधायच ॥ सिद्धान्नंचत्रिभिःप्रोक्ष्यतत्पात्रंपुरतस्थितं ॥ हविर्यदेकपात्रंस्छंमध्येदेवंतथो
त्तरे ॥ भौतिकंपैत्रिकंयाम्यंमानुष्यचान्यपात्रके ॥ देवभूतपितृणांचतत्तद्भागेनवैक्रमात् ॥ द्रवंहविःस्रुवेणैवपाणिनाकाठिनं
हविरिति ॥ वैश्वदेवंदिवानक्तंनभवेच्चेत्पृथक्पृथक् ॥ प्रातरेवद्विरावृत्यकर्त्तव्यंस्मृतिशासनात् ॥ सूर्यादिजुह्यात्पूर्वमग्न्यादि

shrinath.udupa@gmail.com

भ्यस्ततःपरं ॥ हुत्वाव्याहृतिभिःपश्चाद्धूतयज्ञादिकंततः ॥ अथविभक्तवैश्वदेवः ॥ साग्नयोप्येकपाकास्युःपुत्रभ्रात्रादयो-
यादि ॥ नपृथग्वैश्वदेवाःस्युःस्वपाकान्निर्वपेद्यदि ॥ एकपाकेनवसतांपितृदेवद्विजार्चनं ॥ एकंभवेद्विभक्तानांतदेवस्यात्पृ
थक्पृथक् ॥ अनग्निकः ॥ साग्निकःपितृयज्ञांतेबालिकर्मसमाचरेत् ॥ अनग्निर्हुतशेषंतुबलिकाकबलिंहरेत् ॥ सूतकेत्याज्यं ॥
॥ वैश्वदेवंतथाश्राद्धंब्रह्मयज्ञंचमृतके ॥ नकुर्यात्स्वयमन्यैश्चकारयेन्नतुसर्वथा ॥ स्मृत्यंतरे ॥ कुर्यात्पंचमहायज्ञानित्यशःमृ-
तकंविना ॥ नित्यंनैमित्तिकंकाम्यंमृतकेपिनहापयेत् ॥ नित्यमौपासनं ॥ नैमित्तिकमुपरागस्नानादि ॥ काम्यं ॥ अग्नि
नेचंडीपूजनादिकंसर्वथानत्यजेत् ॥ अन्येनकारयेदित्यर्थः ॥ तथाच ॥ संध्यामिष्टिंचरुंहोमंयावज्जीवंसमाचरेत् ॥ नत्यजे
त्सूतकेवापित्यजनात्पततिह्यधः ॥ नित्यंनैमित्तिकंकाम्यंयत्स्वकर्मप्रचोदितं ॥ सूतकादिनिमित्तेषुहापयेन्नतुहापयेत् ॥ सूत
केमृतकेचैवह्यशक्तोश्राद्धभोजने ॥ प्रवासादिनिमित्तेषुहापयेन्नतुहापयेत् ॥ सूतकेतुसमुत्पन्नेस्मार्तकर्मकथंभवेत् ॥ पिंडय
ज्ञंचरुंहोममसगोत्रेणकारयेत् ॥ पिंडयज्ञंपिंडापितृयज्ञं ॥ स्थालीपाकमन्येनकारयेदित्यर्थः ॥ इतिवैश्वदेवप्रकरणं ॥ अथ
स्मृतिसंग्रहेब्रह्मयज्ञः ॥ बृहस्पतिः ॥ सचार्वाक्तर्पणात्कार्यःपश्चाद्वाप्रातराहुतेः ॥ वैश्वदेवावसानेवानान्यदर्थेनिमित्ततइति ॥
॥ सचमध्यान्हात्प्राक्कर्त्तव्यःप्रातराहुतेःपश्चादितिशाखांतराविषयं ॥ स्वगृह्यविधिनाकृत्वाब्रह्मयज्ञंपुराद्विजः ॥ स्वध्यायत
र्पणाभ्यांचगृहमेत्यपरंचरेत् ॥ ममसमस्तपापक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंपितृतुष्ट्यर्थंब्रह्मयज्ञेनसहदेवर्ष्याचार्यपितृतर्पणंचकरि
ष्येइतिसंकल्प्य ॥ प्रणवस्यपरब्रह्मऋषिः ॥ परमात्मादेवता ॥ दैवीगायत्रीछंदः ॥ व्याहृतीनांपरमेष्ठीप्रजापतिःप्रजापतिर्बृ

srinath.udupa@gmail.com

हती ॥ गायत्र्याविश्वामित्रःसावितागायत्री ॥ अग्निर्मूर्द्धेतिनवर्चस्यसूक्तस्यमधुच्छंदाग्निर्गायत्री ॥ नमोब्रह्मणइतिमंत्रस्यसंवननः संज्ञानमनुष्टुप् ॥ प्रणवव्याहृतिकांगायत्रींएकवारंपच्छः ॥ अर्धर्चशोद्वितीये ॥ ऋक्शस्तृतीये ॥ एवंत्रिवारंजपेत् ॥ अग्निर्मूर्द्धेतिनवर्चसूक्तं ॥ अग्निर्वैदेवानामवमोविष्णुःपरमः ॥ अथमहाव्रतं ॥ एषपंथाएतत्कर्म ॥ अथातःसंहितायाउपनिषत् ॥ विदामघवन्विदा ॥ महाव्रतस्यपंचविंशतिसामिधेन्यः ॥ इषेत्वोर्जेत्वा ॥ अग्नआयाहिवीतये ॥ शंनोदेवीरभिष्टये ॥ ॥ अथैतस्यसमाम्नायस्य ॥ समाम्नायःसमाम्नातः ॥ मयरसतजभनलगसंमितं ॥ गौःग्मा ॥ पंचसंवत्सरमयं ॥ अथशिक्षां प्रवक्ष्यामि ॥ वृद्धिरादैच् ॥ योगीश्वरंयाज्ञवल्क्यं ॥ नारायणंनमस्कृत्य ॥ अथातोधर्मव्याख्यास्यामः ॥ अथातोधर्मजिज्ञासा ॥ तच्छंयोरावृणीमहे ॥ नमोब्रह्मणइतित्रिः ॥ इतिब्रह्मयज्ञविधिः ॥ अथधर्मप्रवृत्तौब्रह्मयज्ञः ॥ यत्स्वाध्यायमधीतइतिसूत्रं ॥ स्मृतिः ॥ प्रातश्चेत्संगवाद्ध्वंअंत्येवानित्यकर्मणि ॥ अथवावैश्वदेवांतेब्रह्मयज्ञस्त्रिधामतः ॥ इदंशाखांतरविषयं ॥ आश्वलायनानांशौनकः ॥ आचर्तनेऽवगृह्यापःकुशपाणिस्तुवन्ट्टचः ॥ ब्रह्मयज्ञंप्रकुर्वीतसंध्यामाध्यान्हिकींततः ॥ ॥ ॐपूर्वाव्याहृतीस्तिस्रःसमस्तास्तुसकृद्वदेत् ॥ पच्छस्त्वर्धर्चशःसर्वासावित्रींत्रिर्वदेदथ ॥ शौनकः ॥ आचम्यवन्ह्रचाःकुर्युर्ब्रह्मयज्ञंचतर्पणं ॥ ततोनिष्पीड्यवस्त्रांतमुपवीतीसमाहरेत् ॥ अपांसमीपमागत्यतर्पयेदथदेवताः ॥ अन्वारब्धेनसव्येन दक्षिणेनतुपाणिना ॥ अथतिलतर्पणंस्मृत्यर्थसारे ॥ विवाहेचोपनयनेचौलेसतितथाक्रमं ॥ वर्षमर्धंतदर्धंतुनित्येकेतिलतर्पणं ॥ अर्केशुक्लेत्रयोदश्यांमघायांनिशिसंध्ययोः ॥ गृहेमृताहजन्मर्क्षेनकुर्यात्तिलतर्पणं ॥ अथविशेषः ॥ पितृपक्षेव्यती-

shrinath.udupa@gmail.com

पातेसंक्रातौतिथिपर्वसु ॥ निषेद्धेपितथावारेकर्तव्यातिलतर्पणं ॥ नद्यांतीर्थविशेषेतुप्रेतकार्यंतथैवच ॥ कृतोद्वाहोपिकुर्वीत कर्तव्यंतिलसंयुतं ॥ व्यतीपातेतुसंक्रांतौयुगमन्वंतरादिषु ॥ तर्पयित्वापितॄन्पश्चाच्छ्राद्धंकुर्यात्प्रयत्नतः ॥ पक्षश्राद्धेहिरण्येचपश्चाद्दद्यात्तिलोदकं ॥ तथाचैवाष्टकाश्राद्धेश्राद्धेचैवानुमासिके ॥ कृत्वातुमासिकंश्राद्धंसपिंडीकरणात्परं ॥ वैश्वदेवंततःकुर्यात्तर्पणंतिलसंयुतं ॥ दर्शेतिलोदकंपूर्वंपश्चाद्दद्यान्महालये ॥ क्षयाहेनपरंपूर्वंतिलोदकंपरेहनि ॥ पक्षश्राद्धंतुनिर्वर्त्य तर्पणंस्यादिनेदिने ॥ सकृन्महालयेदद्यात्परेहनितिलोदकं ॥ वृद्धिश्राद्धेसपिंडेचप्रेतश्राद्धेतुमासिके ॥ परेहनिविमोकाख्ये नकुर्यात्तिलतर्पणं ॥ श्राद्धदिनेतर्पणं ॥ कापिलः ॥ मन्वादिषुयुगाद्यासुदर्शसंक्रमणेपुच ॥ पौर्णमास्यांव्यतीपातेदद्यात्पुर्वंतिलोदकं ॥ कारुण्यश्राद्धविषयेसद्योदद्यात्तिलोदकं ॥ अर्धोदयेगजछायेपक्षेषुचमहालये ॥ भरण्यांचमघाश्राद्धेतदंततर्पणंविदुः ॥ मातापित्रोर्मृताहेतुपरेहनितिलोदकं ॥ पित्रोःप्रत्याब्दिकेप्राप्तेतर्पणंतुकथंभवेत् ॥ जलेनैवप्रकर्तव्यंनिवृत्तेपितृकर्मणि ॥ श्राद्धंकृत्वातुविधिवद्वैश्वदेवादिकंततः ॥ ब्रह्मयज्ञंततःकुर्यात्तर्पणंतुतिलैर्विना ॥ हारीतः ॥ ततःपरेन्हिकुर्वीततर्पणंपुरुषःसुधीः ॥ तच्छेषैःस्तिलदर्भैश्चप्रातःस्नात्वामृतैर्जलैः ॥ जीवमानःपितायस्यमातायदिविपद्यते ॥ मातुःश्राद्धंसुतःकुर्यान्नकुर्यात्तिलतर्पणं ॥ इतिधर्मप्रवृत्तौशौचादितर्पणांतप्रकरणंसमाप्तं ॥ अथसंग्रहेतर्पणविधिः ॥ परिधानीयानंतरमेतादेवतास्तर्पयेत् ॥ प्रजापतिमारभ्यैकोनत्रिंशत् ॥ ताश्चयथायोग्यंतृप्यतुतृप्यतांतृप्यंत्वितिशब्दमुच्चार्यतर्पयेत् ॥ एवमंतानीतिपृथङ्मंत्रोद्धोध्यः ॥ द्यावापृथिवीतृप्यतामितिप्रयोक्तव्यंनतुतृप्येतामिति ॥ तद्द्विर्धास्यात् ॥ लोडात्मनेपदे ॥ लि-

shrinath.udupa@gmail.com

ङ् परस्मैपदेवा ॥ नाद्यःधातोःपरस्मैपदित्वात् ॥ नद्वितीयः ॥ शौनकादिभिर्लोडैवव्यवहारात् ॥ तृप्यतुतृप्यंत्विसादिसं
दर्भविरोधाच्चेतिदिक् ॥ एकैकमंजलिंदेवान्द्वौद्वौतुसनकादयः ॥ अर्हतिपितरस्त्रींस्त्रींस्त्रियस्त्वेकैकमंजलिमिति ॥ सारसंग्रहे ॥
॥ अन्वारब्धेनसव्येनदक्षिणेननतुपाणिना ॥ सव्योत्तराभ्यांपाणिभ्यामथवातर्पणंभवेत् ॥ इदंचतर्पणंजलेनकार्यं ॥ शंखः ॥
उदकेनोदकंदद्यात्पितृभ्यश्चकदाचन ॥ उत्तीर्यचशुचौदेशेकुर्यादुदकतर्पणं ॥ दर्भास्तरणेविशेषः ॥ आग्नेये ॥ प्राग्ग्रे
षुसुरास्तर्प्यामनुष्याश्चैवमध्यतः ॥ पितरोदक्षिणाग्रेचएकद्वित्रियतांजलीनिति ॥ विष्णुः ॥ यत्रशुचिस्थलंवास्याद्दुदकेदेव
ताःपितृन् ॥ तर्पयेत्तुयथाकाममप्सुसर्वमतिष्ठितमिति ॥ मरीचिः ॥ सौवर्णेनतुपात्रेणताम्ररौप्यमयेवा ॥ औदुंबरेण
खड्गेणपितृणांदत्तमक्षयमिति ॥ योगयाज्ञवल्क्यः ॥ अनामिक्यांधृतंहेमतर्जन्यांरौप्यमेवच ॥ कानिष्ठिक्यांधृतंखड्गंतेनपूतो
भवेन्नरइति ॥ स्मृतिभास्करे ॥ कुशाग्रैस्तर्पयेद्देवान्मनुष्यान्कुशमध्यतः ॥ द्विगुणीकृत्यमूलाग्रैःपितॄन्संतर्पयेद्द्विजइति ॥ तथा
चापितृक्रमः ॥ तातांबात्रितयंसपत्नजननीमातामहादित्रयंसस्त्रीस्त्रीतनयादितातजननीस्वभ्रातरस्तास्त्रियः ॥ तातांवात्मभ
गिन्यपत्यधवयुक्जायापितासद्गुरुःशिष्यात्माःपितरोमहालयगयातीर्थंतथातर्पणे ॥ विस्तरासंभवेसंक्षेपतर्पणमुक्तंविष्णुपुराणे ॥
॥ आब्रह्मस्तंबपर्यंतंजगत्तृप्यात्विातिब्रुवन् ॥ क्षिपेत्तोयांजलींस्त्रींस्त्रीन्कुर्वन्संक्षेपतर्पणं ॥ जीवत्पितृकविषयेविशेषमाह ॥ याज्ञव
ल्क्यः ॥ कव्यवाहोनलःसोमोयमश्चैवार्यमातथा ॥ अग्निष्वात्ताःसोमपाश्चतथावर्हिषदोपिच ॥ यदिस्याज्जीवापितृकएता
न्विद्यात्ततःपितॄन् ॥ अत्रकव्यवाहंतर्पयामीतिप्रयोगः ॥ अकरणेप्रत्यवायःस्मर्यते ॥ देवताश्चमुनींश्चैवापितुन्योनहितर्पयेत् ॥

shrinath.udupa@gmail.com

॥ देवादीनामृणीभूत्वानरकंप्रतिपद्यतइति ॥ अथयमतर्पणं ॥ वृद्धमनुः ॥ दीपोत्सवचतुर्दश्यांकार्यंतुयमतर्पणं ॥ कृष्णां गारचतुर्दश्यामपिकार्यंसदैवचेति ॥ स्मृतिचंद्रिकायां ॥ यमायधर्मराजायमृत्यवेचांतकायच ॥ वैवस्वतायकालायसर्वभू तक्षयायच ॥ औदुंबरायदध्नायनीलायपरमेष्ठिने ॥ वृकोदरायचित्रायचित्रगुप्तायतेनमः ॥ चतुर्दशैतेमंत्राःस्युश्चतुर्थ्यंता नमोंतकाः ॥ एकैकेनतिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलांजलीन् ॥ यावज्जीवकृतंपापंतत्क्षणादेवनश्यति ॥ स्कांदे ॥ दक्षिणा भिमुखोभूत्वातिलान्सव्येसमाहितः ॥ देवतीर्थेनदेवत्वात्तिलैःप्रेताधिपोयतः ॥ स्मृतिसारेतु ॥ यज्ञोपवीतिनाकार्यंप्राची नावीतिनापिवा ॥ देवत्वंचपितृत्वंचयमस्यास्तिद्विरूपता ॥ गौतमः ॥ यमोनिहंतापितृधर्मराजोवैवस्वतोदंडधरश्चकालः ॥ ॥ प्रेताधिपोदत्तकृतानुसारिकृतांतमेतद्दशभिर्जपंति ॥ इतिदशवारंजपेत् ॥ अथभीष्मतर्पणं ॥ चंद्रिकायांव्यासः ॥ शुक्ला ष्टम्यांतुमाघस्यदद्याद्भीष्मायययोजलं ॥ संवत्सरकृतंपापंतत्क्षणादेवनश्यति ॥ तत्रायंमंत्रः ॥ वैयाघ्रपादगोत्रायसांकृतिप्र वरायच ॥ गंगापुत्रायभीष्मायप्रदास्येहंतिलोदकं ॥ अपुत्रायददाम्येतत्सलिलंभीष्मतर्पणे ॥ ततोदर्भविसर्जनं ॥ विकि रेपिंडदानेचेतिस्मरणात् ॥ तत्रैवमंत्रः ॥ एषांपितामहभ्रातानपुत्रोनान्यगोत्रिणः ॥ तेसर्वेतृप्तिमायांतुमयोत्सृष्टैःकुशैस्त थेति ॥ ततोवस्त्रंनिष्पीडयेत् ॥ तदाहशौनकः ॥ देवादितर्पणंकृत्वावस्त्रंनिष्पीड्यशोधयेत् ॥ स्नानार्थमिच्छतंविप्रंदे वाःपितृगणैःसह ॥ वायुत्वेनानुगच्छंतितृप्तास्तेजलार्थिनः ॥ निराशास्तुनिवर्ततेवस्त्रनिष्पीडनेकृते ॥ तस्माच्चपीडयेद्वस्त्र मकृतेतर्पणेद्विजइति ॥ निष्पीडनंचभूमौ ॥ भरद्वाजः ॥ वस्त्रोदकमपेक्षंतेयेमृतादासकर्मणा ॥ तस्मात्सर्वप्रयत्नेनजलं

shrinath.uduna@gmail.com

भूमौनिपातयेत् ॥ इतिसंग्रहेतर्पणविधिः ॥ अथधर्मप्रवृत्तौदेवतार्चनविधिः ॥ नकृतानिप्रमादाच्चेत्प्रातःकर्माणियानिच ॥ रात्रावपिचकार्याणिविनासौरंचतर्पणं ॥ दिवोदितानिकर्माणिप्रमादादकृतानिवै ॥ रजनीप्रहरंयावत्तावत्कर्माणिकारयेत् ॥ केचिद्रात्रावपिब्रह्मयज्ञमिच्छंति ॥ अथदेवतार्चनविधिः ॥ नारायणंमहादेवमादित्यंगणनायकं ॥ शक्तिंचैवाथपंचैतान्प्रयहंपूजयेद्द्विजः ॥ अभिष्टदेवतांमध्येस्छापयेत्तांयथाक्रमं ॥ शंभौमध्यगतेहरीनहरभूदेव्योहरौशंकरेभास्येनागसुतारवौहरगणेशाजांविकास्छापिताः ॥ देव्यांविष्णुहरेभवङ्करवयोर्लंबोदरेजेश्वरेनांवाशंकरभागतोतिसुखदाव्यस्तास्तुतेहानिदाः ॥ पूज्यपूजकयोर्मध्येपूर्वादिगभिधीयते ॥ यस्मिन्दिवस्वान्दिवपुवेत्युदेतिमार्चीतुतांवेदविदोवदंति ॥ मध्येपुनपूजकपूज्ययोश्चसदागमज्ञाःप्रवदंतिसंतः ॥ मुखेपुष्पांजलिंदत्वागणेशायार्घनंभवेत् ॥ हेमराजततामाणांसर्वेषामर्घ्यभाजनं ॥ शिवसूर्योपरित्यज्यशंखोन्यत्रप्रशस्यतइति ॥ आवाहनासनंपाद्यमर्घ्यमाचमनंतथा ॥ स्नानंवस्त्रोपवीतानिगंधपुष्पैश्चधूपकं ॥ दीपंनैवेद्यतांबूलंप्रदक्षिणाविसर्जनं ॥ प्रत्यृचंपूजयेद्देवंस्छापयेत्पौरुषेणच ॥ शालग्रामेस्छावरेचनावाहनविसर्जनं ॥ शालग्रामशिलायांतुनित्यंसंनिहितोहरिः ॥ चर्मण्यैष्टकआयासेपाषाणेनोपवेशयेत् ॥ नांगुल्याद्यर्चयेद्देवंनाधःपुष्पैसमर्चयेत् ॥ कराग्रैर्नक्षिपेत्तोयंवज्रपातसमंभवेत् ॥ जलंपर्युषितंत्याज्यंपत्राणिकुसुमानिच ॥ तुलस्यगस्त्यबिल्वंचनवर्ज्यंजान्हवीजलं ॥ अग्राह्यंशिवनिर्माल्यंपत्रंपुष्पंफलंजलं ॥ शालाग्रामस्यसंपर्कात्सर्वयातिपवित्रतां ॥ इतिधर्मप्रवृत्तौदेवतार्चनविधिः ॥ अथसंग्रहेदेवतार्चनविधिः ॥ नृसिंहपुराणे ॥ जलदेवंनमस्कृत्यततोगच्छेद्दृहंबुधः ॥ पौरुषेणचसूक्तेनततोविष्णुं

shrinath.udupa@gmail.com

समर्चयेदिति ॥ नांगुष्ठैर्मर्दयेद्देवंनाधःपुष्पैप्रपूजयेत् ॥ कराग्रैर्निक्षिपेत्तोयंवज्रपातसमंभवेत् कौर्मे ॥ ब्रह्माणंशंकरं सूर्यंतथैवमधुसूदनं ॥ अन्याश्चाभिमतान्देवान्भक्त्यात्वक्रोधनोनरः ॥ स्वमंत्रैरर्चयेन्नित्यंपत्रैःपुष्पैस्तथांबुभिरिति ॥ स्कांदे ॥ ॥ कामासक्तोथवाक्रुद्धःशालग्रामशिलार्चनात् ॥ भक्त्यावायदिवाभक्त्याकलौमुक्तिमवाप्नुयात् ॥ वैवस्वतभयंनास्तितथाच कलिकालजं ॥ यःकथांकुरुतेविष्णोःशालग्रामशिलाग्रतः ॥ शालग्रामशिलायास्तुप्रतिष्ठानैवविद्यते ॥ महापूजांतुकृत्वा दौपूजयेत्तांततोवुधइति ॥ शिवपूजनमपिकलौलिंगेस्छंडिलेवाकार्यं ॥ तथाचभारते ॥ सदातंयजतेयस्तुश्रद्धयामुनिपुंग व ॥ लिंगेवास्छंडिलेवापिशंकरंविधिपूर्वकं ॥ युगदोषंविनिर्जित्यरुद्रलोकेप्रमोदतइति ॥ भविष्ये ॥ बाणलिंगानिरा जेंद्रख्यातानिभुवनत्रये ॥ नप्रतिष्ठानसंस्कारस्तेषामावाहनंतथेति ॥ विष्णुधर्मोत्तरे ॥ प्रणवोच्चारणाच्चैवशालग्रामशिलार्च नात् ॥ ब्राह्मणीगमनाचापिशूद्रश्चांडालतांव्रजेत् ॥ वृहन्नारदीये ॥ स्त्रीणामनुपनीतानांशूद्राणांचजनेश्वर ॥ स्पर्शनेना धिकारोस्तिविष्णोर्वाशंकरस्यवेति ॥ शूद्रोवाऽनुपनीतोवास्त्रीवापिपतितोथवा ॥ केशवंवाशिवंवापिस्पृष्टानरकमश्नुतेइति ॥ ॥ पाद्मे ॥ ब्राह्मणक्षत्रवैश्यानांत्रयाणांमुनिसत्तम ॥ अधिकारःस्मृतःसद्भिःशालग्रामशिलार्चने ॥ स्त्रीशूद्रपतितादीनां पंढादीनांविकर्मिणां ॥ नैवाधिकारोविज्ञेयःशालग्रामशिलार्चने ॥ दीक्षायुक्तैस्तथाशूद्रैर्मद्यपानविवर्जितैः ॥ कर्त्तव्यंब्रा ह्मणद्वाराशालग्रामशिलार्चनमिति ॥ विष्णुधर्मोत्तरे ॥ कलौयच्छंतियेविष्णोस्तुलसीकाष्ठचंदनं ॥ विष्णुप्रीतिकरंमर्त्या उत्तरायांतितेभुवं ॥ योर्चयेन्मालतीपुष्पैर्नभूयस्तनपोभवेदिति ॥ स्कांदे ॥ कमलेकरवीरेद्वेतुलसीजातिकेतकी ॥ नाग

shrinath.udupa@gmail.com

केसरपीरंतीकल्हारंचंपकोत्पले ॥ नंद्यावर्तंचजूतिश्चमल्लिकावनमल्लिका ॥ कुंदमंदारकंचैवसौधिकंचैवकेसरं ॥ कारंटका शोकशजुंबिल्वंचमुनिपत्रकं ॥ पत्रमामलकंचैवयथालाभंसमर्चयेत् विल्वविधानंविहितपुष्पाभावे ॥ नरक्तचंदनंजातुगृ- ण्हीयाद्रक्तपुष्पकं ॥ बिल्वपत्रप्रसूनैर्वानार्चयेद्देवकीसुतं ॥ कार्तिकेकेतकीपुष्पंयेनदत्तंहरेःकलौ ॥ दीपदानंचदेवर्षेतारितं तेनवैकुलं ॥ द्वारकाशैलसंभूतंयस्तोयंपिबतेकलौ ॥ पापानितस्यनश्यंतिशतजन्मार्जितान्यपि ॥ घृतेशिरसिपीतेचसर्वा स्तुष्यंतिदेवताः ॥ प्रायश्चित्तंहिपापानांकलौपादोदकंहरेरिति ॥ आग्नेये ॥ अर्चनंसंप्रवक्ष्यामिविष्णोरमिततेजसः ॥ य- त्कृत्वामुनयःसर्वेपरंनिर्वाणमाप्नुयुः ॥ पौरुषेणप्रकर्तव्यंनित्यंतुहरिपूजनं ॥ आसनाद्युपचारैस्तुयथाशक्त्यानुभावतः ॥ चत्वा रोब्राह्मणैःपूज्यास्त्रयोराजन्यजातिभिः ॥ वैश्यैर्द्वावेवसंपूज्यौतथैकःशुद्रजातिभिरिति ॥ काम्येतु ॥ एकमूर्त्तिर्नपूज्यैवगृ हिणाभूतिमिच्छता ॥ अनेकमूर्तिसंपन्नःसर्वान्कामानवाप्नुयात् ॥ शालग्रामाःसमाःपूज्याविषमानकदाचन ॥ समेपुद्वित यंनेष्टंविषमेष्वेकमेवहीति ॥ व्यासः ॥ प्रतिमापटयंत्राणासदास्नानंनकारयेत् ॥ कारयेत्पर्वदिवसेयथामलनिवारणमि- ति ॥ वस्त्रस्यनप्रतिदिनंअपूर्वतानियमः ॥ तत्वसागरसंहितायां ॥ वस्त्रमभ्युक्षणाच्छुध्येदपरंतुदिनेदिनइति ॥ कौर्मे ॥ ॥ नविष्ण्वाराधनात्पुण्यंविद्यतेकर्मवैदिकं ॥ तस्मादनादिमध्यांतंनित्यमाराधयेद्धरिं ॥ अथवादेवमीशानंभगवंतंसनातनं ॥ ॥ आराधयेन्महादेवंभावपूतोमहेश्वरं ॥ मंत्रेणरुद्रगायत्र्याप्रणवेनाथवापुनः ॥ ईशानेनाथवारुद्रंत्र्यंबकेनसमाहितः ॥ पु- ष्पैःपत्रैःरथाद्विर्वाचंदनाद्यैर्महेश्वरं ॥ तथोन्नमःशिवायेतिमंत्रेणानेनवाजपेत् ॥ नमस्कुर्यान्महादेवंऋतंसत्यमितीश्वरं ॥ निवे

shrinath.udupa@gmail.com

दयीतचात्मानंयोब्रह्मणमितीश्वरे ॥ प्रदक्षिणांद्विजःकुर्यात्पंचब्रह्माणिवाजपेत् ॥ ध्यायीतदेवमीशानंव्योममध्यगतंशिवमिति ॥ शिवेकुंदमदंतिचजूतीबंधूककेतकी ॥ यंवारक्तंत्रिसंध्येद्वेहयारींवर्वरींसजेत् ॥ बुस्तृणमपि ॥ अत्रविशेषोबौधायनेद्रष्टव्यः ॥ देवीनांचार्कमंदारमादित्येतगरंतथा ॥ गणेशायचसूर्यायरक्तपुष्पमतिप्रियं ॥ कौमें ॥ योमोहादथवालस्यादकृत्वादेवतार्चनं ॥ भुंक्तेसयातिनरकंसूकरेष्वभिजायतइति ॥ अथगुरुपूजा ॥ मातापितृप्रभृतीन्गुरूननुक्रमेणाहि ॥ ॥ तेष्वेवनित्यंशुश्रूषांकुर्यात्प्रियहितेरतइति ॥ शैवे ॥ वस्त्राभरणमाल्यानिशयनान्यासनानिच ॥ प्रियाणिचात्मनोयानितानिदेयानिवैगुरोरिति ॥ अथपंचभागकृत्यं ॥ नृसिंहे ॥ पौरुषेणचसूक्तेनततोविष्णुंसमर्चयेत् ॥ वैश्वदेवंततःकुर्याद्बलिकर्मतथैवचेति ॥ शातातपः ॥ वैश्वदेवःप्रकर्त्तव्यःपंचसूनापनुत्तयेइति ॥ अथसायंप्रातरितिसूत्रं ॥ अस्यार्थः ॥ ॥ सायंशब्दोरात्रेर्लक्षकः ॥ प्रातःशब्दश्चान्होलक्षकः ॥ सिद्धस्य पक्वस्य ॥ होममंत्रानाह ॥ अग्निहोत्रेत्यादि ॥ सायमग्निः ॥ प्रातःसूर्यःप्रजापतिरुभयत्रेत्यर्थः ॥ सोमायवनस्पतयेइत्येकाआहुतिः ॥ अग्निर्गृहपतिः ॥ सोमोवनस्पतिरिति ॥ आदौवनस्पतेर्गुणत्वेनदृष्टत्वात् ॥ विश्वेभ्योदेवेभ्यइतिचैकाआहुतिः ॥ तदेवंब्रह्मणइतिदशमीआहुतिः ॥ एतावान्देवयज्ञः ॥ ॥ भूतयज्ञमाह ॥ स्वाहेत्यथबलिहरणमाहयागत्वादेवस्वाहाकारेलब्धेस्वाहाकारवचनमन्यत्रबलौस्वाहाकारविरहज्ञापनार्थंतेनचैत्यबलौनमस्कारएवभवति ॥ अथशब्दअनंतर्येदेवयज्ञाद्व्यवहितकालोत्तरेत्यर्थः ॥ एताभ्यःपूर्वोक्ताभ्योदशभ्यश्चकरोवक्ष्यमाणानांसमुच्चये ॥ एवकारस्तुपौनर्वचिनकः ॥ इंद्रपुरुषेभ्यइतींद्रादुत्तरतइदंबोध्यं ॥ उदगेंद्राद्बलेरिंद्रपुरुषेभ्योबलि

shrinath.udupa@gmail.com

हरेदितिकारिकोक्तेः ॥ एवंयमपुरुषादिबलिरपिप्रधानादुदग्वाच्यः ॥ ब्रह्मणइति ॥ एताभ्यइतिशब्देनोपात्तासुदशसुदे
वतास्वप्यंतेब्रह्मणइतियाआहुतिस्तस्याअनंतरंकिंचिदंतरालंमुत्काअद्भ्यइत्यादयोहोतव्याः ॥ यत्तु अंतरालंतत्रब्रह्मणइत्यादि
दिग्देवतामध्येजुहुयादित्यर्थः ॥ विश्वेभ्योदेवेभ्यःस्वाहा ॥ सर्वेभ्योभूतेभ्यःस्वाहा ॥ दिवाचारिभ्यःस्वाहेत्येतदपिमध्य
तएवबोध्यं॥ दिवेति ॥ अनेनवैश्वदेवस्यप्रातरेवारंभोनतुअग्निहोत्रादिवत्सायमितिसूचयति ॥ अन्यथासायंप्रातरित्युपक्रमानुरू
पमेवनिर्दिशेत् ॥ उत्तरतइति ॥ सर्वासामुत्तरतइत्यर्थः ॥ इतिभूतयज्ञः ॥ पितृयज्ञमाह ॥ स्वधेति शेषग्रहणादानंतर्य
लाभः ॥ दक्षिणादक्षिणस्यांदिशि ॥ स्वधापितृभ्यः ॥ इतिपितृयज्ञः ॥ इदंचयज्ञत्रयंवैश्वदेवइत्युच्यते ॥ अत्रकारिका ॥
॥ गृहस्छोवैश्वदेवाख्यंकर्मप्रारभतेदिवा ॥ तंत्रंनास्त्यत्रभगवद्वृत्तिकृद्वचनंयथा ॥ औपासनाग्निमन्यंवासमिध्याथहविर्भुजं ॥
॥ पर्यूह्यपरिषिच्याग्निमलंकृत्यचपूर्ववदित्यादि ॥ बलिहरणंचक्रकारंकुर्यादिति ॥ पंचस्वेतेषुविप्राणांमुख्याचक्राकृतिर्भवे
त् ॥ चक्राकारेणयोविप्रःसदाभूतबलिहरेत् ॥ सर्वपापविनिर्मुक्तोविष्णोःसायुज्यमाप्नुयादिति ॥ शौनकः ॥ अथगृहब
लिः ॥ तद्वह्यपरिशिष्टे ॥ अथास्यशेषेणगृहदेवताबलिर्द्वारिपितामहायप्रकीळेरुद्रायगृहप्राच्यादिप्रतिदिशंसनवग्रहायेंद्रायबल
भद्राययमविष्णुभ्यांस्कंदवरुणाभ्यां सोमसूर्याभ्यामश्विभ्यांवसुभ्योनक्षत्रेभ्योथमध्येवास्तोष्पतयेप्रागादिभित्तिमूलेषुसिध्यैवृत्यै
श्रियैकीर्त्यैवरुणायोदधानेऽश्विभ्यांदृषदुपलयोर्द्यावापृथिवीभ्यामुलूखलमुसलयोरथनिष्क्रम्यभूमावपआसिच्यचांडालपतितभूत
वायसेभ्योन्नंभूमौविकिरेद्येभूताःप्रचरंतिदिवानक्तंवलिमिच्छंतोविदुरस्यप्रेष्ठाः ॥ तेभ्योबलिंपुष्टिकामोददामिमयिपुष्टिंपुष्टिप

shrinath.udupa@gmail.com

तिर्ददात्वितिरात्रौचेन्नक्तंबलिमितिब्रूयादथप्रक्षालितपाणिपादआचम्यशांतापृथवीशिवमंतरिक्षमितिजपित्वान्यानिचस्वस्त्ययनानि ॥ ततोमनुष्ययज्ञपूर्वकंभुंजीतेति ॥ अथविशेषमाह ॥ शौनकः ॥ देवयज्ञान्नशेषंतद्गृहद्वारादिषुक्षिपेत् ॥ चंडालपतितादिभ्योभूतयज्ञान्नशेषतः ॥ पितृयज्ञान्नशेषेणवायसेभ्योबलिंहरेत् ॥ प्रक्षालितांघ्रिपाणिस्तुत्याचम्यप्रविशेद्गृहमिति ॥ इतिसंग्रहेदेवतार्चनादिप्रकरणं ॥ अथसंग्रहेमनुष्ययज्ञः ॥ मनुः ॥ अतिथिभ्योन्नदानंतुनृयज्ञःसतुपंचमइति ॥ ब्राह्मणभोजनपर्याप्तान्नशक्त्यभावेऽनुकल्पःस्मर्यते ॥ कौर्मे ॥ हंतकारमथाग्र्यंवाभिक्षांवाशक्तितोद्विजः ॥ ॥ दद्यादतिथयेनित्यंबुध्येतपरमेश्वरमिति ॥ अतिथिंपरमेश्वरबुध्यापूजयेदितिभावः ॥ भिक्षादिलक्षणंमनुराह ॥ ॥ ग्रासमात्रंभवेद्भिक्षाअग्र्यंग्रासचतुष्टयं ॥ चतुर्गुणंतुतत्कृत्यहंतकारोविधीयतइति ॥ अतिथिनिरीक्षणायकिंचित्कालंगृहांगणेतिष्ठेत् ॥ उक्तंचमार्कंडेये ॥ आचम्यचततःकुर्यात्प्राङ्मोद्वारावलोकनं ॥ मुहूर्त्तस्याष्टमंभागमुद्वीक्ष्योह्यतिथिर्भवेत् ॥ ॥ नामित्रमतिथिंकुर्यान्नैकग्रामनिवासिनं ॥ अज्ञातकुलनामानंतत्कालेसमुपस्थितं ॥ बुभुक्षुमागतंश्रांतंयाचमानमकिंचन ॥ ब्राह्मणंप्राहुरतिथिंसंपूज्यःशक्तितोबुधैरिति ॥ पराशरः ॥ दद्याच्चभिक्षात्रितयंपरिव्राड्ब्रह्मचारिणं ॥ इच्छायाचततोदद्याद्विभवेसत्यवारितमिति ॥ मूलकारः ॥ अन्यांश्चतपर्येत्सर्वाननाथांश्चतपस्विनः ॥ पक्षिणश्चैवचांडालान्पतितान्कृमिकीटकानिति ॥ व्यासः ॥ पंचयज्ञांस्तुयोमोहान्नकरोतिगृहाश्रमी ॥ तस्यनायंनचपरोलोकोभवतिधर्मतइति ॥ अथाहगौतमः ॥ कंडणीपेषणीचुल्लीउदकुंभीचमार्जनी ॥ पंचसूनागृहस्थस्यवर्ततेहन्यहन्यपि ॥ पयोदधिघृतैःकुर्यात्फलशाकोदकादिभिः ॥

shrinath.udupa@gmail.com

॥ अभावेयेनकेनापिकाष्ठमूलतृणादिना ॥ शाकंवायादिवापत्रंमूलंवायदिवाफलं ॥ संकल्पयेद्यदाहारस्तेनाग्नौजुहुयादापि ॥
॥ अकृत्वावैश्वदेवंतुभिक्षौभिक्षार्थमागते ॥ उध्दृत्यवैश्वदेवार्थंभिक्षांदत्वाविसर्जयेत् ॥ वैश्वदेवकृतंदोषंशक्तोभिक्षुर्व्यपोहति ॥
॥ नतुभिक्षुकृतंदोषंवैश्वदेवोव्यपोहति ॥ यतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभौ ॥ तयोरन्नमदत्वातुभुक्त्वाचांद्रायणंचरेत् ॥
॥ इतिसंग्रहेपंचयज्ञादिप्रकरणं ॥ अथसंग्रहेनित्यश्राद्धविधिः ॥ नित्यंशाकैःफलैर्वापियेनवावर्ततेस्वयं ॥ तेनैवभोजयेद्वि-
प्रंनित्यश्राद्धंतुकारयेत् ॥ एकंतुभोजयेद्विप्रंपित्र्यर्थंपंचयाज्ञिके ॥ तच्चषट्पौरुषंज्ञेयंपिंडदानविवर्जितं ॥ अतिथिर्यस्यभग्ना-
शोगृहात्प्रतिनिवर्तते ॥ सतस्यदुष्कृतंदत्वापुण्यमादायगच्छति ॥ मातापितागुरुर्भ्रातात्मजादीनःसमाश्रितः ॥ अभ्याग
तोतिथिश्चाग्निःपौष्यवर्गउदाहृतः ॥ इतिसंग्रहेनित्यश्राद्धविधिः ॥ अथधर्मप्रवृत्तौनित्यश्राद्धविधिः ॥ याज्ञवल्क्यः ॥
॥ नित्यश्राद्धंदैवहीनंनियमादिविवर्जितं ॥ दक्षिणारहितंचैवदातृभोक्तृविवर्जितं ॥ आवाहनंस्वधाकारंपिंडाशौकरणादिकं॥
॥ ब्रह्मचर्यादिनियमान्विश्वेदेवास्तथैवच ॥ नित्यश्राद्धेत्यजेदाताभोज्यमन्नंप्रकल्पयेत् ॥ भोक्त्रभावेतथान्नंवागोभ्यश्चैवनिवे
दयेत् ॥ षट्दैवंसंभवेच्छ्राद्धंकर्तव्यंप्रत्यहंद्विजैः ॥ नित्यकर्मसमाप्याथब्रह्मणःश्रद्धयान्वितः ॥ अपसव्येनकर्तव्यंनित्यश्र-
द्धमदैवतं ॥ पितॄनुद्दिश्यविप्रस्यभोक्तुमभ्यागतस्यच ॥ पादप्रक्षालनंकुर्यान्नामगोत्रंसमुच्चरेत् ॥ संभोज्यातिथिभृत्यांश्च-
दंपत्योःशेषभोजनं ॥ चित्राहुतिप्रदानांतंकृत्वाभोजनमाचरेत् ॥ सपंक्तौब्राह्मणस्यापिभुंजीयात्सहबंधुभिः ॥ इतिधर्मप्रवृ
त्तौनित्यश्राद्धविधिः ॥ संग्रहेभोजनविधिः ॥ मनुः ॥ भुक्तवत्सुतविप्रेषुस्वेषुभृत्येषुचैवहि ॥ भुंजीयातांततःपश्चादवाशि

shrinath.udupa@gmail.com

ष्टंतुदंपती ॥ पवित्रंविष्णुनैवेद्यंसुरासिद्धार्षिभिःस्मृतं ॥ अन्यदेवस्यनैवेद्यभुत्काचांद्रायणंचरेत् ॥ अग्राह्यंशिवनिर्माल्यंपत्रंपुष्पंफलंजलं ॥ शालग्रामशिलास्पर्शात्सर्वयातिपावित्रतां ॥ भोजनेइतिकर्तव्यतामाहबौधायनः ॥ उपलिप्तसमेस्थानेशुचौ श्लक्ष्णासमन्विते ॥ चतुरस्रंत्रिकोणंवावर्तुलंचार्धचंद्रकं ॥ कर्तव्यमानुपूर्व्येणब्राह्मणादिपुमंडलं ॥ व्यासः ॥ पंचार्द्रोभोजनं कुर्याप्राङ्मुखोमौनमास्थितः ॥ हस्तौपादौतथैवास्यमेषुर्पंचार्द्रतामतेति ॥ अश्वमेधिके ॥ आर्द्रपादस्तुभुंजीयात्प्राङ्मुख श्चासनेशुभे ॥ पादाभ्यांधरणींस्पृष्टापादेनैकेनवापुनरिति ॥ आयुष्मान्प्राङ्मुखोभुंक्तेनकदाचिदुदङ्मुखः ॥ प्रत्यङ्मुखः सदाश्नीयाद्यशश्चीदक्षिणामुखः ॥ अर्कद्विपर्वरात्रौचचतुर्दश्यष्टमीदिवा ॥ एकादश्यामहोरात्रौभुत्काचांद्रायणंचरेत् ॥ ॥ इतिपैठिनसिः ॥ सौवर्णेराजतेताम्रेपद्मपत्रपलाशयोः ॥ भाजनेभोजनंकुर्वन्त्रिरात्रंफलमश्नुते ॥ एकएवतुयोभुंक्तेविम लेकांस्यभोजने ॥ चत्वारितस्यवर्धंतेआयुःप्रज्ञायशोबलमिति ॥ पद्मपलाशभोजनंगृहीब्यतिरिक्तविषयं ॥ ग्रहस्छस्यनिषिद्धत्वा त् ॥ वृद्धमनुः ॥ ताम्रपात्रेनभुंजीतभिन्नकांस्येमलाविले ॥ पलाशपद्मपत्रेषुगृहीभुत्कैंदवंचरेत् ॥ पलाशोवल्लिपलाशः॥ ॥ कांस्यपात्रंगृहस्छैकविषयं ॥ करेचकर्पटेचैवआयसेताम्रभाजने ॥ वटार्काश्वत्थपत्रेषुभुत्काचांद्रायणंचरेत् ॥ सर्वपर्णेषु भुंजीयादेरंडेनकदाचन ॥ एरंडेपिचभुंजीयात्परकांस्यंविवर्जयेत् ॥ परकांस्येतुभुंजीयात्तुल्यंगोमांसभक्षणं ॥ प्रचेताः ॥ ॥ तांबूलाभ्यंजनंचैवकांस्यपात्रेचभोजनं ॥ यतिश्चब्रह्मचारीचविधवाचाविवर्जयेत् ॥ तत्प्राणाहुतिपर्यंतंभूमौस्छाप्यपश्चातुयं त्रिकायां ॥ तदाहव्यासः ॥ न्यस्तपात्रस्तुभुंजीतपंचग्रासान्महामुने ॥ शेषमुद्धृत्यभोक्तव्यंपित्र्यर्थंतुनचोद्धरेत् ॥ इत्युद्धृत्य-

shrinath.udupa@gmail.com

यंत्रादापात्रंनिक्षिप्येत्सर्थः ॥ पित्र्यर्थेतुभोजनेतुभूमौपत्रस्थापनमावश्यक ॥ पित्र्यर्थेतुनचोद्धरेदितिवचनात् ॥ पित्र्येकर्म
णिभुंजानोभूमौपात्रंनचालयेत्इति ॥ ब्राह्मे ॥ अन्नंदृष्ट्वाप्रणम्यादौप्रांजलिःकथयेत्ततः ॥ अस्माकंनित्यमस्त्वेतादितिभ-
क्त्वाथवंदयेत् ॥ गोभिलः ॥ अथप्राणाहुतिकल्पः ॥ व्याहृतिगायत्र्याभिमंत्र्य ॥ सत्यंत्वर्त्तेनपरिषिंचामीतिप्रातः ॥
ऋतंत्वासत्येनेतिसायं ॥ भविष्ये ॥ उध्दृत्यकिंचिदन्नाग्रंधर्मराजायवैबलिं ॥ दत्वाथचित्रगुप्तायेप्रेतेभ्यश्चेदमुत्सृजेत् ॥ यत्रकचन
संस्थानांक्षुत्तृष्णोपहतात्मनां ॥ प्रेतानांतृप्तयेक्षय्यमिदमस्तुयथासुखमिति ॥ दत्वातुचित्रगुप्तायहस्तंप्रक्षालयेद्विजः ॥ अक्षालित
करोभुंक्तेरौरवंनरकंव्रजेत् ॥ यस्तुजल्पतिभुंजानोविवादेषुकथासुच ॥ अधंसकेवलंभुंक्तेतस्मान्मौनंसमाचरेत् ॥ जिव्हयेवग्रहेदन्नं
दशनेननसंस्पृशेत् ॥ यथारसंतुजानातिजिव्हाप्राणाहुतौनृप ॥ तथासमाहितःकुर्यात्प्राणाहुतिमतंद्रितइति ॥ अश्नीयात्तन्म
नाभूत्वाभुंजीतमधुरंरसं ॥ लवणाम्लौतथामध्येकटुतिक्तादिकांस्ततः ॥ प्राग्द्रवंपुरुषोश्नीयान्मध्येचकठिनाशनः ॥ अंतःपु
नर्द्रवाशीतुबलारोग्येनमुंचति ॥ अष्टौग्रासायतेर्भक्ष्याःषोडशारण्यवासिनः ॥ द्वात्रिंशत्तुगृहस्थस्यत्वमितंब्रह्मचारिणः ॥
॥ इति ॥ आश्वमेधे ॥ वक्त्रप्रमाणपिंडांश्चग्रसेदेकैकशःपुनः ॥ वक्त्राधिकस्तुयःपिंडआत्मोच्छिष्टंतदुच्यते ॥ सदावासश
नंनाद्यान्नातिहिनंतुकर्हिचित् ॥ यथान्नेनव्यथानस्यात्तथाभुंजीतनित्यशः ॥ वृद्धमनुः ॥ पीत्वापोशनमश्नीयात्प्रात्रदत्तमग
र्हितं ॥ भार्याभृत्यकदासेभ्यउच्छिष्टंशेषयेत्ततइति ॥ उच्छिष्टशेषंघृतादिव्यतिरिक्तविषयं ॥ पुलस्त्यः ॥ भोजनंतुनिःशे-
षंकुर्यात्प्राज्ञःकथंचनं ॥ अन्यत्रदधिसत्काज्यपललक्षीरमध्वपइति ॥ एतच्चभोजनंसायंप्रातःकार्यं ॥ मनुः ॥ सायंप्रातर्द्वि

shrinath.udupa@gmail.com

जातीनामशनंश्रुतिचोदितं ॥ नांतराभोजनंकुर्यादग्निहोत्रसमोविधिःरिति ॥ अत्रसायंप्रातर्भुंजीतैव ॥ इतिनियम विधिः ॥ तेनसतिभोज्येसत्यांचभोजनशक्तौद्वेषादिनाभोजनमकुर्वन्प्रत्यवैतीतिमिताक्षरायांविज्ञानेश्वरः ॥ हरदत्तस्तुसायंप्रातरेवेतिपरिसंख्या ॥ साचयद्यपिदोषंजयतितथापिएकवाक्यतालोभात्सोढव्या ॥ यश्चपाणितलेभुंक्तेयश्चभुंक्तारसंयुतं ॥ प्रसुतांगृलिभिर्यश्चतस्यगोमांसवच्चतत् ॥ नाजीर्णेभोजनंकुर्यात्कुर्यान्नातिबुभुक्षितः ॥ नार्द्रवासानार्द्रशिरादेवालयगतोपिवा ॥ नप्रसारितपादस्तुपादारोपितापाणिमान् ॥ नवेष्टितशिराश्चापिनोत्संगकृतभाजनः ॥ ग्रासशेषंच नाश्नीयात्पीतशेषंपिबेन्नच ॥ शाकमूलफलेक्षूणांदंतैश्छेदनभक्षयेत् ॥ बहूनांभुंजतांमध्येनाश्नीयाच्चत्वरान्वितः ॥ वृथानविकिरेदन्नंनोच्छिष्टश्चक्वचिद्व्रजेत् ॥ बृहस्पतिः ॥ नस्पृशेद्रामहस्तेनभुंजानोन्नंकदाचन ॥ नपादौनशिरोवास्तिनपदाभाजनंस्पृशेदिति ॥ आदित्ये ॥ नोच्छिष्टंग्राहयेदाज्यंजगध्वाशिष्टंनसंसृजेत् ॥ शूद्रभुक्तावशिष्टंतुनाद्याद्रांडस्थितंत्वपीति ॥ कौर्मे ॥ नार्धरात्रेनमध्यान्हेनाजीर्णेनार्द्रवस्त्रधृक् ॥ नाभिन्नभांजनेचैवनभूम्यांनचपाणिषु ॥ नोच्छिष्टोघृतमाद्यान्नमूर्धानंस्पृशन्नापि ॥ नब्रह्मकीर्तयित्वापिनानिःशेषंनभार्यया ॥ नांगणेचनचाकाशेनचदेवालयादिषुइति ॥ सर्वेषामेवयागानामात्मयागःपरःस्मृतः ॥ योयेनविधिनाकुर्यात्सयातिब्रह्मणःपदमिति ॥ आत्रिः ॥ आचांतोप्यशुचिस्तावद्यावत्पात्रमनुद्धृतं ॥ उद्धृतेप्यशुचिस्तावद्यावन्नोमृज्यतेमही ॥ भूमावपिहिलिप्तायांतावत्स्यादशुचिःपुमान् ॥ आसनादुत्थितस्तस्माद्यावन्न स्पृशतेमहीमिति ॥ संग्रहेभोजनविधिः ॥ स्मृतिसारसमुच्चये ॥ प्राङ्मुखस्तुसमश्नीयात्प्रतीच्यांवायथासुखं ॥ उत्तरेपितृकृत्ये

shrinath.udupa@gmail.com

पुदक्षिणेतुयथामुखं ॥ अथभोजनेमंडलं ॥ बौधायनः ॥ चतुरस्रंत्रिकोणंचवर्तुलंचार्धचंद्रकं ॥ कर्तव्यमानुपूर्व्येणमंडलं ब्राह्मणादिषु ॥ अथकांस्यपात्रं ॥ एकएवतुयोभुंक्तेविमलेकांस्यभाजने ॥ चत्वारस्तस्यवर्धंतेआयुःप्रज्ञायशोबलं ॥ पार णाहेतथाश्राद्धेवर्जयेत्कांस्यभाजनं ॥ मोहाद्योयदिभुंजीतकृतंकर्मचनिष्फलं ॥ भोजनेपत्राणि ॥ रंभाकुटजमध्वाम्रजंबूप नसचंपकाः ॥ यज्ञोदुंबरपालाशब्रह्मपत्रपवित्रकं ॥ निषिद्धानि ॥ वटाश्वत्थार्कपर्णेषुकुंभीतिंदुकपर्णयोः ॥ कोविदार कदंबानांभुक्त्वाचांद्रायणंचरेत् ॥ करेचकर्पटेचैवशिलायांताम्रभाजने ॥ भिन्नकांस्येचवस्त्रेचनभुंजीयात्तथायसे ॥ शाका दिपुरतःस्थाप्यमध्येन्नंपरिवेषयेत् ॥ परिशिष्टंचगायत्र्याघृताक्तमभिमंत्रयेत् ॥ अन्नंमध्येप्रतिष्ठाप्यदक्षिणेघृतपायसं ॥ शा-
कादिपुरतस्थाप्यभक्षभोज्यंतुवामतः ॥ पात्रंधृत्वातुवामेनयावत्स्याद्भोजनंहितत् ॥ पाणिनादक्षिणेनैवपर्युक्ष्यपरिषेचयेत् ॥ ॥ स्मृतिः ॥ बदरीफलमात्रान्नमंगुल्यग्रैर्भुविक्षिपेत् ॥ यमधर्मायचित्रायभूतेभ्यश्चततोजलं ॥ मनुः ॥ चित्राहुतीरनुध्दृ त्यभुंक्तेयोग्रासपंचकं ॥ अघंसकेवलंभुंक्तेज्ञानतोज्ञानतोपिवा ॥ अपोशानमकृत्वातुयोभुंक्तेद्विजसत्तमः ॥ अभोज्यंतद्भवे दन्नंभुक्त्वाचांद्रायणंचरेत् ॥ मनुः ॥ आपोशनंकरेकृत्वापात्रेकृत्वातिलोदकं ॥ श्वानमूत्रसमंतोयंपुनःपूरयतेयादे ॥ आ-
पोशनार्थंयत्तोयंधृतंचेन्निःसृतंयादि ॥ हस्तंप्रक्षाल्यतोयेननपुनर्धारयेज्जलं ॥ प्राणाहुतींचहुत्वातुपश्चादन्नंविमर्दयेत् ॥ मर्दितं भोजयेद्यस्तुभुक्त्वाचांद्रायणंचरेत् ॥ घृतहीनंतुयोभुंक्तेनरश्चाहुतिपंचकं ॥ पश्चाद्धृतेनयोभुंक्तेभुक्त्वाचांद्रायणंचरेत् ॥ अनेन विधिनाविप्रोवाग्यतोभोजनंचरेदिति ॥ मनुः ॥ मधुपर्केचसोमेचयत्पशुप्राणाहुतीषुच ॥ आस्यहोमेपुसर्वेषुनोच्छिष्टंमनुर

shrinath.udupa@gmail.com

ब्रवीत् ॥ दक्षिणंतुपरित्यज्यवामेनीरंनिधापयेत् ॥ अभोज्यंतद्भवेदन्नंपानीयंचसुरासमं ॥ जलपात्रंचनिक्षिप्यमणिबंधेच दक्षिणे ॥ भुक्तिकालेतुविप्रोवैपिबेदन्येनपाणिना ॥ एकपंक्त्युपविष्टानांद्विप्राणांसहभोजने ॥ यद्येकोपित्यजेत्पात्रंशेषम न्नंनभोजयेत् ॥ भुंजानेषुचविप्रेषुयोग्रेपात्रंविमुंचति ॥ समूढोनरकंयातिब्रह्महासतुजायते ॥ अग्निनाभस्मनाचैवदर्भेणसलिलेनवा ॥ अंतरेद्वारदेशेतुपंक्तिदोषोनविद्यते ॥ एकपंक्त्युपविष्टानामन्योन्यंस्पर्शयेद्यदि ॥ भुक्तातदन्नमत्याज्यंगायत्र्याष्टशतंजपेत् ॥ भवेदुच्छिष्टसंस्पर्शोभोक्तुर्वाभोजनस्यवा ॥ अन्नंतदेवभोक्तव्यमत्याज्यंभाजनंस्थितं ॥ पुनरन्नंनभोक्तव्यंयदिभुंजीतकिल्बिषी ॥ ततश्चैवजपेद्देवींशतमष्टोत्तरंसुधीः ॥ शेषमुत्सृज्यभोक्तव्यंश्रुयतामंत्रकारणं ॥ तृप्तोदद्यादन्नशेषंभूमौदुर्गतितृप्तये ॥ भुक्तापीत्वातुयत्पात्रंरिक्तंत्यज्यतियोनरः ॥ सनरःक्षुत्पिपासार्तोभवेजन्मनिजन्मनि ॥ यत्रकचनसंस्थानां क्षुत्तृष्णोपहतात्मनां ॥ दुर्गतीनामयादत्तमक्षय्यमुपतिष्ठतु ॥ अर्धपिबतिगंडूषमर्धंत्यजतिभूमिषु ॥ प्रीणंतिपितरःसर्वेयेचान्येभूमिदेवताः ॥ यद्युच्छिष्टंदनाचांतोभुक्तवानासनाद्विजः ॥ सद्यःस्नानंप्रकुर्वीतनान्यथाप्रयतोभवेत् ॥ अंगिराः ॥ उच्छिष्टोच्छिष्टसंस्पृष्टःशुनाशूद्रेणवाद्विजः ॥ उपोष्यपरजनीमेकांपंचगव्येनशुध्यति ॥ श्वानंचशूद्रमुच्छिष्टंह्यनुच्छिष्टस्तुयःस्पृशेत् ॥ ॥ स्नानंविधीयतेतस्यपात्राणांचालनंविना ॥ स्मृतिः ॥ गंडूषभाशनात्पूर्वंहस्तंप्रक्षालयेद्विजः ॥ हतंदेवंचपित्र्यंचआत्मानं चोपपातकैः ॥ गौतमः ॥ रात्रौभोजनकालेषुयदिदीपोविनश्यति ॥ पात्रंधृत्वातुपाणिभ्यांभास्करंमनसास्मरेत् ॥ दृष्ट्वातेनपुनर्दीपंतच्छेषंभोजयेद्विजः ॥ पुनरन्नंनभोक्तव्यंयदिभुंजीतकिल्बिषी ॥ परपाकानिवृत्तस्तुपरपाकरतस्तुयः ॥ तयोरन्नं

shrinath.udupa@gmail.com

नभोक्तव्यंभुक्त्काचांद्रायणंचरेत् ॥ कुक्षौतिष्ठतितयस्यान्नंवेदाभ्यासेनजीर्यते ॥ कुलंतारयतेतेषांदशपूर्वान्दशापरान् ॥ भ्रष्ट
शौचेगताचारेविप्रेवेदविवर्जिते ॥ दीयमानंरुदत्सन्नंकिमयादुष्कृतंकृतं ॥ अथनिषिद्धान्नं ॥ ब्रह्मोदनेतथाचौलेसीमंतेप्रथ
मार्तवे ॥ मासिकेचतथाकृछ्रेनैवभोजनमाचरेत् ॥ गणान्नंगणिकान्नंचसूतकान्नंतथैवच ॥ यत्सन्नंचैवशूद्रान्नंनाश्नीयाद्विज
सत्तमः ॥ नग्नश्राद्धेनवश्राद्धेसपिंडीप्रेतकर्मसु ॥ प्रायश्चित्तेनभुंजीतभुक्त्काचांद्रायणंचरेत् ॥ वृंताकंकृष्णकालिंगंबिल्वोदुं
बरभिःसटाः ॥ एतानिसेवतेयस्तुतस्यदूरगतोहरिः ॥ अन्नंभुंक्तेयदायस्तुसुवर्णस्तेयमंदिरे ॥ इंद्रानुपूपणासूक्तंसहस्रंवैजपे
ज्जले ॥ अथवमनविधिः ॥ उत्तराचमनात्पूर्ववमनंयदिजायते ॥ स्नानंतत्रनकर्तव्यंगंडूषैःशुद्धिरिष्यते ॥ उत्तराचमनं
पीत्वावमनंयदिजायते ॥ तत्रस्नानेनशुद्धिःस्यादितिप्राहुर्मनीषिणः ॥ अथतांबूलविधिः ॥ तांबूलचर्वणंकुर्याद्भुत्कारात्रौ
तथैवच ॥ अभ्यंगेचैवमांगल्येदिवावाप्यथवानिशि ॥ पर्णमूलेभवेद्व्याधिःपर्णाग्रेपापसंभवः ॥ चूर्णपर्णहरेदायुःशिराबुद्धिं
विनाशयेत् ॥ पंचसप्ताष्टपर्णानिदशद्वादशवापिवा ॥ दद्यात्स्वयंचगृह्णीयादितिकैश्चिदुदीरितं ॥ मृताशौचेतथाश्राद्धेमा
तापित्रोर्मृतेहनि ॥ उपवासेचतांबूलंदिवारात्रौविवर्जयेत् ॥ पक्षश्राद्धेतथादर्शेयुगमन्वंतरादिषु ॥ श्राद्धंनिर्वर्त्यभुक्त्कातुतांबूलं
खादयेद्द्विजः ॥ अथसायंविधिः ॥ रवेरस्तमयात्पूर्वघटिकातुयदाभवेत् ॥ सायंसंध्यामुपास्याथकुर्याद्धोमंचपूर्ववत् ॥
॥ अथदीपाः ॥ रवेरस्तंसमारभ्ययावत्सूर्योदयोभवेत् ॥ यस्यतिष्ठेद्गृहेदीपस्तस्यनास्तिदरिद्रता ॥ इतिधर्मप्रवृत्तौनित्यक
र्मविधिः ॥ अथसंग्रहेतांबूलविधिः ॥ मार्कंडेयः ॥ भूयोप्याचम्यकर्तव्यंततस्तांबूलभक्षणामिति ॥ अदत्वातुमुखेपत्रंपूगं

shrinath.udupa@gmail.com

भक्षतियोनरः ॥ सप्तजन्मदरिद्रःस्यान्नांतकालेहरिंस्मरेत् ॥ वसिष्ठः ॥ सपूगंससुपत्रंचचूर्णेनचसमन्वितं ॥ अदत्वाद्विज-
देवेभ्यस्तांबूलंवर्जयेद्बुधः ॥ इतिसंग्रहेतांबूलविधिः ॥ अथप्रसंगात्संग्रहनिर्णयः ॥ तथाचमन्वादयः ॥ श्वचर्माणियथा
क्षीरमषेयंब्रह्मवादिभिः ॥ तद्वच्छूद्रमुखाद्वाक्यंनश्रोतव्यंकदाचन ॥ पंडितस्यापिशूद्रस्यशास्त्रज्ञानरतस्यच ॥ वचनंतस्य
नग्राह्यंशुनोच्छिष्टंहविर्यथा ॥ शूद्रोज्ञानबलेनैवब्राह्मणान्द्विषतेयदि ॥ सयातिनरकंघोरंयावदाभूतसंप्लवं ॥ अप्रणामगतेशू-
द्रेस्वीकुर्वीतिचयेद्विजाः ॥ सशूद्रोनरकंयातिब्राह्मणश्चतथैवच ॥ कृष्णसर्पाद्विजंनष्टंशूद्रसंसर्गसंयुतं ॥ गर्दभंजारजातंचदूर
तःपरिवर्जयेत् ॥ इतिशूद्रवाक्यादिनिषेधः ॥ अथग्रहणनिर्णयः ॥ सूर्यग्रहेतुनाश्नीयात्पूर्वयामचतुष्टयं ॥ चंद्रग्रहेतुया
मांस्त्रीन्बालवृद्धातुरैर्विनेति ॥ गौतमः ॥ वसिष्ठः ॥ ग्रस्तोदयेविधोःपूर्वंनाहर्भोजनमाचरेत् ॥ भृगुः ॥ ग्रस्तावेवास्तमानंतुरवीं
दूप्राप्नुतोयदि ॥ तयोःपरेद्युरुभयेस्नात्वाभ्यवहरेन्नरइति ॥ विष्णुधर्मोत्तरे ॥ अहोरात्रंनभोक्तव्यंचंद्रसूर्यग्रहोयदा ॥
॥ मुक्तिदृष्ट्वातुभोक्तव्यंस्नानंकृत्वाततःपरमिति ॥ कात्यायनः ॥ चंद्रसूर्यग्रहेभुक्त्वाप्राजापत्येनशुध्यति ॥ तस्मिन्नेवदिने
भुक्त्वात्रिरात्रेणैवशुध्यति ॥ दक्षः ॥ अयनेविषुवेचैवचंद्रसूर्यग्रहेतथा ॥ अहोरात्रोषितस्नात्वासर्वपापैःप्रमुच्यतइति ॥
॥ पुत्रीतुनोपवसेत् ॥ नारदः ॥ संक्रांत्यामुपवासंचकृष्णैकादशिवासरे ॥ चंद्रसूर्यग्रहेचैवनकुर्यात्पुत्रवान्गृही ॥ षट्त्रिं
शन्मते ॥ सूर्यग्रहोयदारात्रौदिवाचंद्रग्रहस्तथा ॥ तत्रस्नानंनकुर्वीतदद्याद्दानंनचक्वचित् ॥ इतिग्रहनिर्णयः ॥ विष्णु-
पुराणे ॥ पुनःपाकमुपादायसायमप्यवनीपते ॥ वैश्वदेवनिमित्तंतुपत्न्यासार्धंबलिंहरेत् ॥ अतिथिंचांगतंदृष्ट्वास्वशक्त्यापूजयेद्गु

shrinath.udupa@gmail.com

धः ॥ कृतपादादिशौचश्चभुक्त्वासायंततोगृही ॥ प्रदोषःपश्चिमोयामावेदाभ्यासेनवेनयेत् ॥ प्रहरद्वयशायीतुब्रह्मभूयायकल्पतइ-
ति ॥ अथवानप्रस्थधर्मः ॥ धर्माश्चविविधान्कृत्वास्वर्गमोक्षफलप्रदान् ॥ स्वधर्मेपुसुतान्स्थाप्यवानप्रस्थोभवेत्ततः ॥ मूलकारः॥
अनुज्ञाप्यसुहृद्बंधून्वनंगच्छेद्विजोत्तमः ॥ गृहीत्वाचाग्निहोत्रंहिसभार्योह्येकएववा ॥ अथाग्निहोत्रविधिः॥ दाराग्निहोत्रदीक्षांचकुरु
तेयोग्रजेस्थिते ॥ परिवित्तासविज्ञेयःपरिवितिस्तुपूर्वजः ॥ आचम्यप्राणानायम्यममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थसा
यमग्निहोत्रंतंडुलादिद्रव्येणहोष्यामितिसंकल्प्य ॥ ओमितितूष्णींचत्रिरुखिर्दक्षिणाग्निक्रमेणपर्युक्ष्य ॥ ऋतसत्याभ्यांत्वापर्युक्ष्यामी
तिसायं ॥ सत्यऋताभ्यांत्वेतिप्रातः॥ तंतुंतन्वन्नितिगार्हपत्यादिविछिन्नामुदकधारांहरेदाहवनीयात् ॥ अग्निष्टेतेजोमहार्षीरितिगा
र्हपत्येदर्भान्प्रज्वाल्य ॥ अंतरिज्वाक्षोंतारिताअरातयइतीत्रिःपर्यग्निकरणंकृत्वा ॥ प्रत्युष्टंरक्षःप्रत्युष्टाअरातयोनिष्टप्तंरक्षोनिष्टप्ता
अरातयइतिस्रुक्स्रुवंप्रतपेत् ॥ उत्तरतस्छाल्यांस्रुचमासाद्य ॥ ॐमुन्नयामीतिसायं ॥ ॐमुन्नेष्यामीतिप्रातः ॥ ॐमुन्न
येतियजमानः ॥ भूरिळाभुवरिळास्वारिळावृद्धइळेतिहविः ॥ स्रुवेणगृहीत्वास्छालीमभिमृश्यसमिधंस्रुचंचाध्यधिगा
र्हपत्यंदत्वाप्राणसंमितामाहवनीयसमीपेकुशेषूपसाद्यजान्वाच्यसमिधमादध्यात् ॥ रजतांत्वाग्निर्ज्योतिषंरात्रिमिष्टकामुपदधेस्वा
हेतिसायंहरिणींत्वासूर्यज्योतिषमहरिष्टकामुपदधेस्वाहेतिप्रातः ॥ रजतांत्वाग्निर्ज्योतिषंरात्रिमिष्टिकामुपदधे ॥ ऋषिणाते
नब्रह्मणातयादेवतयांगिरस्वध्रुवासीदेतिप्रातरनुमंत्र्य ॥ विद्युदसिविद्यमेपाप्मानमग्नौश्रत्थेतिसायमुपावेश्य ॥ वृष्टिरसिवृ-
श्चमेपाप्मानमप्सुश्रत्थेतिप्रातरुपवेश्य ॥ ॐभूर्भुवस्वरोमग्निर्ज्योतिरग्निस्वाहेतिसायं ॥ ॐभूर्भुवस्वरोंसूर्योज्योतिःसूर्यः

shrinath.udupa@gmail.com

स्वाहेतिप्रातःपूर्वाहुतिंहुत्वा ॥ ताअस्यसूददोहसइतिगार्हपत्यमवेक्षेत ॥ पशून्मेयच्छेत्यनुमंत्र्य ॥ प्रजापतयेस्वाहेत्युत्तरामाहुतिं जुहुयात् ॥ ततोयजमानः ॥ भूर्भुवःस्वःसुप्रजांप्रजाभिःस्यांसुवीरोवीरैःसुपोषःपोषैः ॥ अग्निमीळेतिसूक्तंजपित्वात्रिरनुकंप्य ॥ उन्मृज्यकुशमूलेषुनिमार्ष्टि ॥ पशुभ्यस्त्वेतितेषांदक्षिणतउत्तानाअंगुलीःकरोतिप्राचीनावीतिस्वधापितृभ्यइत्यापोनिनयेत् ॥ यज्ञोपवीतीत्यपउपस्पृश्य ॥ प्रजापतयेस्वाहेतिगार्हपत्येसमिधंमादध्यात् ॥ अग्नयेगृहपतयेस्वाहा ॥ प्रजापतयेस्वाहेतिगार्हपत्येआहुतिद्वयंजुहुयात् ॥ अग्नयेन्नादायान्नपतयेस्वाहेतिदाक्षिणाग्नौ ॥ प्रजापतयेतिपूर्ववत् ॥ ततोयजमानः ॥ अभयंवोभयंमेस्त्वितिजपेत् ॥ आयुषेत्वाप्राश्नामीतिहविःशेषंप्राशयेत् ॥ प्रक्षाचम्य ॥ सर्वदेवजनेभ्यःस्वाहेतिजलंत्रिःक्षिपेत् ॥ अथैनांकुशैःप्रक्षाल्यप्रागुदीच्योर्निनयेत् ॥ ऋतुभ्यःस्वाहा ॥ १ ॥ दिग्भ्यःस्वाहा ॥ २ ॥ ऋषिभ्यःस्वाहा ॥ ३ ॥ इतरजनेभ्यःस्वाहा ॥ ४ ॥ पृथिव्याममृतंजुहोमिस्वाहेतिपश्चात्गार्हपत्यस्यआहवनीयेप्रताप्यांतर्वेदिनिदध्यात् ॥ दक्षिणतस्तिष्ठन् ॥ दीदिहि ॥ दीदाहा॥ ॥ दीदिदाय ॥ आहवनीयादिषुतूष्णींसमिद्वयंजुहुयात्प्रत्येत्यउक्तंपर्युक्षणं ॥ सायमग्निहोत्रपाद्गुण्यार्थमनाज्ञातामितिमंत्रत्रयामिदंविष्णुरितिचजपेत् ॥ अग्नेनयसुपथारायेअस्मानितिवर्गद्वयेनप्रदक्षिणत्रयंकुर्यात् ॥ नमस्तेगार्हपत्यायनमस्तेदाक्षिणाग्नये ॥ ॥ नमआहवनीयायमहावेद्यैनमोनमः ॥ नमस्कारंकृत्वा ॥ यस्यस्मृत्येत्युक्ता ॥ अनेनहोमेनश्रीयज्ञपुरुषःप्रीय० ॥ इत्याग्निहोत्रनित्यहोमविधिः ॥ अपाक्रिकः ॥ समारोप्यब्राह्मणः ॥ प्रव्रजेत्गृहादिति ॥ अथचतुर्थः ॥ अंगिराः ॥ प्रव्रजेद्ब्रह्मचर्येवप्रव्रजेतगृहादापि ॥ वनाद्वाप्रव्रजेद्विद्वानातुरोवाथदुःखितश्चति ॥ दुःखितोव्याघ्रादिभिरितिमाधवः ॥ भारते ॥ उत्प-

shrinath.udupa@gmail.com

न्नेसंकटेघोरेतथाव्याघ्रादिसंकटे ॥ भयभीतस्यसंन्यासमंगिरामुनिरब्रवीत् ॥ आतुराणांतुसंन्यासेनविधिर्नैवचक्रिया ॥ प्रैषमा
त्रंसमुच्चार्यसन्यासंतत्रपूरयेदिति ॥ अथश्रुतिः ॥ यद्यातुरस्यान्मनसावाचावासन्यसेदिति ॥ अत्रहिज्ञानाद्यर्थतयाकाम्ये
सन्यासेसर्वांगोपसंहारासमर्थस्यातुरस्याधिकारासंभवात्तंप्रत्ययायप्राप्तःसएवसन्यासोनेनविधीयते ॥ विशिष्यविधिबला-
देर्वादांतराभावेपिफलवत्वस्वीकारः ॥ पापक्षयार्थकसंध्यावंदनादौशक्ताशक्तव्यवस्थायांगापेक्षानपेक्षयोर्दर्शनाच्च ॥ यदि
यदान्वयस्यापिरुच्यध्याहारादिभिः संभवइतिव्यवस्थापितमन्यत्रनचवेदानियमंलोकमपिचपरित्यज्यात्मानंअन्विच्छेदितिवा
क्यात्सन्यासस्यश्रवणांगत्वप्रतीतेरातुरस्यप्रधानश्रवणादसंभवादंगानुष्ठानंव्यर्थमितिवाच्यं ॥ गर्गीजनकादीनाश्रवणानुरो
धेनास्यवाक्यस्यदर्शपूर्णमासाभ्यामिष्ट्वासोमेनयजेतेतिवक्रममात्रपरत्वात् ॥ आतुरंप्रतिविधिबलादेवजन्मांतरीयोपिक्रमनिरू
पकः ॥ सएवजनकादेरितिकल्पतइतिदिक् ॥ अस्यधर्मानाहमात्स्ये ॥ अष्टौमासान्विहारःस्याद्यतीनांसंयतात्मनां ॥
॥ एकत्रचतुरोमासान्वार्षिकान्निवसेत्पुनः ॥ अविमुक्तेप्रविष्टानांविहारस्तुनविद्यते ॥ आत्रेः ॥ नतीर्थवासीनिवसंस्यान्नो
पवासपरोयतिः ॥ नवाध्ययनशीलस्यान्नव्याख्यानपरोभवेदिति ॥ अध्ययनंचकर्मकांडतन्मीमांसयोः ॥ वेदांतानांमि
मांसायास्तंप्रतिविधानादितिमाधवः ॥ आचारकांडे ॥ शिखांपौंड्रंचसूत्रंचसमयाचारमेवच ॥ पूर्वैराचरितंकुर्यादन्यथा
पतितोभवेत् ॥ इतिसन्यासाविधिः ॥ अथप्रदोषः ॥ प्रदोषश्चरात्रिर्विवक्षितेतिमाधवः ॥ मेधाकामस्त्रयोदश्यांसप्तम्यां
चविशेषतः ॥ चतुर्थ्यांचप्रदोषेषुनस्मरेन्नचकीर्तयेदिति ॥ षष्ठीचद्वादशीचैवअर्धरात्रोननाडिका ॥ प्रदोषोनत्वधीयीतत्

shrinath.udupa@gmail.com

तीयानवनाडिकेतिनिर्णयामृते ॥ गर्गोपि ॥ रात्रौयामत्रयादर्वाक्सप्तमीवात्रयोदशी ॥ प्रदोषःसतुविज्ञेयःसर्वविद्या विगर्हितः ॥ रात्रौनवसुनाडीषुचतुर्थीयदिदृश्यते ॥ प्रदोषःसतुविज्ञेयोवेदाध्ययनगर्हितः ॥ अत्रिः ॥ चतुर्थीप्रथमेया-मेसार्धयामेचसप्तमी ॥ यामद्वयंत्रयोदश्यांप्रदोषःसर्वघातकः ॥ अनध्यायेष्वध्ययनेप्रज्ञाआयुःप्रजाःश्रियं ॥ ब्रह्मवीर्यंश्रि यंतेजोनिकृंततियमःस्वयं ॥ मंत्रवीर्यक्षयभयार्दिद्रोवज्रेणहंतिच ॥ ब्रह्मराक्षसताचांतेनरकश्चभवेद्ध्रुवमितिप्रदोषविचारः ॥ ॥ होमंवैतानिकंकृत्वास्मार्तंकुर्याद्विचक्षणः ॥ स्मृतीनांवेदमूलत्वात्स्मार्तंकेचित्पुराविदुरितिभरद्वाजः ॥ व्यासः ॥ ॥ श्रौतंकर्मनचेच्छक्तःकर्तुंस्मार्तंसमाचरेत् ॥ तत्राप्यशक्तःकरणेसदाचारंलभेद्बुधः ॥ न्यायोपार्जितवित्तेनकर्तव्यंतुसदाद्वि जेति ॥ ब्रह्मचारीयतिश्चैवविद्यार्थीगुरुपोषकः ॥ अध्वगःक्षीणवित्तश्चषडेतेभिक्षुकास्मृताः ॥ भिक्षाहारोनिराहारोभिक्षा नैवप्रतिग्रहः ॥ अवधूताचपूताचसोमपानंदिनेदिने ॥ अथतिलतर्पणनिषेधकालः ॥ मरीचिः ॥ सप्तम्यांरविवारेचमा तापित्रोःक्षयेहनि ॥ तिलैर्यस्तर्पणंकुर्यात्सभवेत्पितृघातकः ॥ संग्रहे ॥ नंदायांभार्गवदिनेकृत्तिकासुमघासुच ॥ भरण्यां भानुवारेचगजच्छायाव्हयेतथा ॥ अयनद्वितयेचैवमन्वादिषुयुगादिषु ॥ पिंडदानंमृदाल्लानंनकुर्यात्तिलतर्पणं ॥ बौधायनः ॥ विवाहेचोपनयनेचौलेसतियथाक्रमं ॥ वर्षमर्धंतदर्धंचनित्येकेतिलतर्पणं ॥ संस्कारेषुतथान्येषुजातपुंसवनादिष्वितिस्मृत्यंतरे ॥ यावन्मासःसमाप्येततावत्पिंडांश्चवर्जयेत् ॥ वृत्थावनंतरंप्राज्ञस्तथैवतिलतर्पणमिति ॥ प्रतिप्रसवमाहकात्यायनः ॥ उपरागेपितुः श्राध्येपातेमायांचसंक्रमे ॥ निषेधेपीहसर्वत्रतिलैस्तर्पणमाचरेदिति ॥ अत्रव्यतीपातोवैधृतेरप्युपलक्षणं ॥ वृत्थमनु ॥ संक्रांत्यां

shrinath.udupa@gmail.com

दिनिमित्तेपुस्नानांतेतर्पणंतथा ॥ तिथिवारनिमित्तेपुतिलैस्तर्पणमाचरेदिति ॥ कात्यायनः ॥ योगृहीत्वाविवाहाग्निंगृहस्थश्छलतिमन्यते ॥ अन्नंतस्यनभोक्तव्यंवृथापाकोहिसस्मृतः ॥ यस्तुप्रव्रजतितोभूत्वासेवतेमैथुनंपुनः ॥ षष्टिवर्षसहस्राणिविष्टायांजायतेकृमिः शूद्रान्नंशूद्रसंपर्कःशूद्रेणचसहासनं ॥ शूद्राद्विद्यागमःकश्चिज्जलंतमपिपातयेत् ॥ शूद्रादादत्तनिर्वापंयेपचंत्यबुधाद्विजाः ॥ तेयांतिनरकंघोरंब्रह्मतेजोविवर्जिताः ॥ हस्तदत्तंचयेस्नेहाल्लवणंव्यंजनानिच ॥ दातारंनोपतिष्ठंतेभोक्ताभुंजतिकिल्बिषं ॥ आयसेनतुपात्रेणयदन्नमुपदीयते ॥ भोक्तातद्विद्वसमंभुंक्तेदाताचनरकंव्रजेत् ॥ अंगुल्यादंतकाष्ठंतुप्रत्यक्षंलवणंतुयत् ॥ मृत्तिकाभक्षणंयच्च समंगोमांसभक्षणैः ॥ पानीयंपायसंभक्षंघृतंलवणमेवच ॥ हस्तदंतेनगृण्हीयातुल्यंगोमांसभक्षणं ॥ अग्रतोनिवसेन्मूर्खोदूरतश्चशुणान्वितः ॥ गुणान्वितायदातव्यंनास्तिमूर्खेव्यतिक्रमः ॥ ब्राह्मणातिक्रमोनास्तिविप्रेवेदविवर्जिते ॥ ज्वलंतमग्निमुत्सृज्यनाहिभस्मनिहूयते ॥ संनिकृष्टमधीयानंब्राह्मणंयोव्यतिक्रमेत् ॥ भोजनेचैवदानेचदहेदासप्तमंकुलं ॥ देवद्रव्यविभागेनब्रह्मस्वहरणेनच ॥ कुलान्याशुविनश्यंतिब्राह्मणातिक्रमेणवै ॥ मादेहीतिवचोब्रूयादेवाग्निब्राह्मणेषुच ॥ तिर्यग्योनिशतंगत्वाचांडालेष्वभिजायते ॥ वाचायच्चप्रतिज्ञातंकर्मणानोपपादितं ॥ ऋणंतत्यर्धसंयुक्तंइहलोकपरत्रच ॥ विघसाशीभवेन्नित्यंनित्यंचामृतभोजनः ॥ यज्ञशेषामृतंज्ञेयंभुक्तंतुविघसंविदुः ॥ सव्यादंसात्परिभ्रष्टंनाभिदेशेव्यवस्थिते ॥ वस्त्रेसएकवासास्तंदेवेपित्र्येचवर्जयेत् ॥ हस्तौप्रक्षाल्यगंडूषंयःपिवेद्भोजनांतरे ॥ दैवंपित्र्यंतथात्मानंत्रयंसउपघातयेत् ॥ गणान्नंगणिकान्नंचयदन्नंग्रामयाचके ॥ स्त्रीणांप्रथमगर्भेषुभु० ॥ पक्षेवायदिवामासेयस्यगेहेत्तिनद्विजः ॥ भुत्कादुरात्मनस्तस्यचरेच्चां० ॥ सत्रिणांदीक्षितानांचयतीनां

shrinath.udupa@gmail.com

ब्रह्मचारिणां ॥ एतेषांसूतकंनास्तिऋत्विजांकर्मकुर्वतां ॥ अजीर्णेभ्युदितेवांतौश्मश्रुकर्मणिमैथुने ॥ दुःस्वप्नेदुर्जनस्पर्शेस्नानमेवविधीयते ॥ चैत्यवृक्षंचितायूपंशिवानिर्माल्यभोजनं ॥ वेदविक्रयिणंदृष्ट्वासचैलोजलमाविशेत् ॥ अग्न्यागोरगवांगोष्टेदेवब्राह्मणसंन्निधौ ॥ स्वाध्यायेभोजनेपानेपादुकेनैवधारयेत् ॥ खळक्षेत्रगतंधान्यंकूपवापीपुयज्जलं ॥ अग्राह्यादपितत्ग्राह्यंयच्चगोष्टगतंपयः ॥ योवेष्टितशिराभुंक्तेयोभुंक्तेदक्षिणामुखः ॥ सोपानक्तश्चयोभुंक्तेतद्वैरक्षांसिभुंजते ॥ यातुधानाःपिशाचाश्चराक्षसाः क्रूरकर्मणः ॥ हरंतिरसमन्नस्यमंडलेनविवर्जिते ॥ ब्राह्मणेचतुरस्रंस्याच्यस्रंवैबाहुजन्मनः ॥ वर्तुलंचविशःप्रोक्तंशूद्रस्याभ्युक्षणंस्मृतं ॥ नोत्संगेभाजनंकृत्वानोपाणौनचकर्पटे ॥ नासनेनचशय्यायांभुंजीतनमलार्दितः ॥ फाणितंगोरसंतोयंलवणंमधुकांजितं ॥ हस्तेनब्राह्मणोदत्वाकृच्छ्रचां० ॥ नवृथाशपथंकुर्यात्स्वल्पेप्यर्थेनरोत्तमः ॥ वृथादिशपथंकुर्यात्प्रेत्यचेहाविनश्यति ॥ कामिनीपुविवाहेपुगवांमुक्तौधनक्षये ॥ ब्राह्मणाभ्युपपत्तौचशपथेनास्तिपातकं ॥ आश्रमेतुयतिर्यस्यमुहूर्तमापिविश्रमेत् ॥ किंतस्यानेकतंत्रेणकृतकृत्यःसजायते ॥ ध्यैचिंतायांस्मृतोधातुर्श्चितातत्वसुनिश्चला ॥ एतध्यानमिदंप्रोक्तंसगुणंनिर्गुणंद्विधा ॥ अमृतंब्राह्मणस्यान्नंक्षत्रियान्नंपयःस्मृतं ॥ वैश्यस्यचान्नमेवान्नंशुद्रस्यरुधिरंस्मृताभिति ॥ काशीखंडे ॥ ॥ ब्रह्मचारीगृहस्छोवावानप्रस्छोथभिक्षुकः ॥ एषामाधारभूतोसौग्रहस्छोनान्यथेतिच ॥ अग्निशुश्रूषणरतःपंचयज्ञपरायणः ॥ षट्कर्मानिरतोनित्यंदेवपित्रातिथिप्रियः ॥ पूर्वाण्हेदैविकंकर्मकर्तव्यंकर्मकांडवत् ॥ मध्यंदिनेमनुष्याणांपितृणामपराण्हिके ॥ देवैर्मनुष्यैःपितृभिस्तिर्यग्भिश्चोपगृह्यते ॥ ग्रहस्छःप्रथमंयस्मात्तस्माछ्रेष्ठोगृहाश्रमीति ॥ संग्रहेतां

shrinath.udupa@gmail.com

वूलादिप्रकरणंसमाप्तं ॥ मंत्रार्थमनुसंधानोगायत्रींजपेदितिवचनात्तदर्थमाह ॥ प्रणवोब्रह्मपरः ॥ भवत्यस्माद्भूतानीतिभूः ॥ अधिकरणेक्विप् ॥ भावयतिस्थापयतिविश्वमितिभुवः ॥ अंतर्भावितण्यर्थादसुनिर्गुणाभावस्छांदसः ॥ सुष्ठुरइतिभाप्नुवन्त्येतादितिस्वः ॥ ऋधातोःकर्मणिविच्वाबहुलकात् ॥ महपूजायां ॥ अस्मात्असुनिमहःपूज्यं ॥ जनजनने ॥ तप-आलोचने ॥ आभ्यांकर्तर्यसुन् ॥ सत्यंकालत्रयबोध्यं ॥ सवितुःप्रेरकस्यवरेण्यंभजनीयंभर्गःसंसारभर्जनात्सच्चिदानंदात्मकरूपंधीमहिध्यायेम ॥ यःसवितानोधियःप्रचोदयात्प्रेरयेत् ॥ पंचमलकारः ॥ आपःव्यापकं ॥ ज्योतिश्चिद्रूपं ॥ रसःसुखं ॥ अमृतंमोक्षः ॥ इदंब्रह्मेति ॥ ॐअंगीकुर्वेध्यायामीत्यर्थः ॥ अग्निश्चेत्यस्यायमर्थः ॥ माइतिमांएतेरक्षतां ॥ मन्युःक्रोधाभिमानिनीदेवता ॥ तथाचभगवान्व्यासः ॥ अभिमानव्यपदेशास्त्विस्यत्रसूत्रयत् ॥ मन्युपतयोजितक्रोधामहात्मानः ॥ शिश्नाशिश्नेन ॥ सुपांसुलुगित्यादिनाडादेशः ॥ इदंपापजातंमांतत्कर्तारंचाहकारंअमृतयोनौमोक्षकारणेअग्न्याख्येज्योतिषिपरब्रह्मणिजुहोमिप्रक्षिपामितदर्थमिदमभिमंत्रितंजलंस्वाहा ॥ मदीयवक्त्राग्नौहुतमस्तु ॥ एतेनसूर्यश्चेत्यपिव्याख्यातं ॥ आपःपुनंत्विस्यार्थः ॥ आपःपृथिवीमच्छरीरं ॥ यच्छरीरंसापृथिवीत्यारण्यकेउक्तेः ॥ साचपृथिवीमांल्लिंगशरीरंपुनातु ॥ किंच ॥ ब्रह्मणोवेदस्यपातेः ॥ परमात्मानंपुनंतु ॥ पुनात्वितिव्यत्ययेनबहुवचनं ॥ ब्रह्मवेदः ॥ पूतापूतमित्यर्थः ॥ सुपांसुलिगितिपूर्वसवर्णः ॥ उच्छिष्टंताम्रामित्तकंपापंसर्वंपरित्येशेषः ॥ मांपुनंतुतदर्थस्वाहा ॥ अभिमंत्रितंउदकंप्राणाग्नौजुहोमीत्यर्थः ॥ इतिमंत्रार्थः ॥ अथशिवपूजनं ॥ भवंदेवंतर्पयामि ॥ १ ॥ शर्वंदेवं० ॥ २ ॥ उग्रं-

shrinath.udupa@gmail.com

दे० ॥ ३ ॥ रुद्रंदेवंत॥ ॥ ४ ॥ भीमंदे० ॥ ५ ॥ इशानंदे० ॥ ६ ॥ पशुपतिंदे० ॥ ७ ॥ महांतंदे० ॥ ८ ॥ भवस्यदेवस्य प० ॥ ९ ॥ शर्वस्यदेवस्यपत्नींतर्पयामीत्यादि ॥ पुरुषसूक्तेनवामदेवायेत्यादिभिःपूजयेत् ॥ इतिश्रीवाजपेयीभट्टोजीदीक्षितविरचितेधर्मप्रवृत्तौधर्मसंग्रहेधर्मप्रवृत्त्याद्यवलोक्यसारांशमुद्धृत्यआन्हिकप्रयोगःसमाप्तः ॥ अथधर्मप्रवृत्तौगर्भाधानशयनविधिः ॥ स्वगृहेप्राक्शिरःकुर्याच्चसुरेदक्षिणाशिरः ॥ प्रत्यङ्मुखःप्रवासेचनकदाचिदुदक्शिरः ॥ दिपेनष्टेतुयःसंगंकुरुतेमानवोयदि ॥ यावज्जन्मदरिद्रत्वंलभतेनात्रसंशयः ॥ चंदनानुविलिप्तांगोधृत्वापुष्पाणिदंपती ॥ तांबूलचर्वणंकृत्वाप्रदीपेमैथुनंचरेत् ॥ ऋतौतुगर्भसिक्तत्वात्स्नानंमैथुननिसृतं ॥ अनृतौतुयदागच्छेच्छौचंमूत्रपरीषवदितिगर्भाधानं ॥ अथपुंसवनं ॥ ॥ व्यासः ॥ तृतीयेगर्भसंस्कारंमासेपुंसवनंभवेत् ॥ आद्यगर्भेनविज्ञातस्तृतीयेमासिवैयदि ॥ चतुर्थेगर्भमासेसीमंतोन्नयनंषष्टाष्टमयोर्वेतिसूत्रं ॥ स्मृतिः ॥ आधानादष्टमेमासिसीमंतोन्नयनंभवेत् ॥ नवमेमासिवाकुर्याद्यावत्गर्भविमोचनं ॥ पुंसवनेचसीमंतेतथाचौलोपनायने ॥ गोदानेस्नानउद्वाहेनांदीश्राद्धंपुरोदिने ॥ अथगर्भिणीधर्माः ॥ भूम्यांचैवोच्चनीचायामारोहणावरोहणे ॥ नदीप्रतरणंचैवशकटारोहणंतथा ॥ उग्रौषधंतथाक्षारंमैथुनंभारवाहनं ॥ कृतेपुंसवनेचैवगर्भिणीपरिवर्जयेत् ॥ अथगर्भिणीपतिधर्माः ॥ पुंसोभार्यागर्भिणीयस्यचास्तिसूनोश्चौलंक्षौरकर्मात्मनश्च ॥ गेहारंभस्तंभसंस्थापनंचवास्तौस्नानंदूरयात्रांनकुर्यात् ॥ वाहनंदहनंचैववपनंसिंधुदर्शनं ॥ पर्वतारोहणंचैवनकुर्याद्गर्भिणीपतिः ॥ दक्षः ॥ ॥ ऋतुद्वयेव्यतीतेतुनकुर्यान्मौंजिबंधनं ॥ अग्न्याधानंगयाश्राद्धंवपनंचविवर्जयेत् ॥ गर्भिण्यामपिभार्यायांसूनोश्चौलंनकार

shrinath.udupa@gmail.com

येत् ॥ भिन्नभार्यातुयस्येहनदोषश्चौलकर्मणि ॥ सूनोर्मातरिगर्भिण्यांचूडाकर्मनतस्यवै ॥ उर्ध्वंतुपंचमान्मासान्नकुर्यान्मौं-
जिबंधनं ॥ अष्टमासात्परंचैवनकुर्याच्छ्रात्धभोजनं ॥ श्मश्रुकर्मतथाचैवकेचिदाहुर्मनीषिणः ॥ अथजातकर्म ॥ जातेसु
तेपिताकुर्यान्नांदीश्राद्धंविधानतः ॥ जातकर्मतथाकुर्यादन्यैरालंभनंपुरा ॥ देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनां ॥ आयां-
तितदहस्तस्मात्पुण्यंपूज्यंचसर्वदा ॥ जातेसुतेवगाह्याथश्राद्धंकुर्याद्विधानतः ॥ जातकर्मविधानेनकुर्यादानादिकंततः ॥
॥ यावन्नच्छिद्यतेनालंतावद्द्यात्स्वशक्तितः ॥ अशौचेपिप्रकर्तव्यंग्रहणेचयथाविधिः ॥ जातानुपंचमेषष्ठेनिशीथेबलिमाह
रेत् ॥ अर्चयेदष्टदिक्पालान्गीतवाद्यस्वशास्त्रकैः ॥ कृत्वाजागरणंरात्रौप्रदीपैःशांतिपाठकैः ॥ द्वारद्वितीयभागेतुपुत्तलै
श्चापिकज्जलैः ॥ प्रथमेदिवसेषष्ठेदशमेचैवसर्वदा ॥ त्रिष्वाशौचेनकुर्वीतसूतकेपुत्रजन्मनि ॥ दद्यात्तुप्रथमेदानंषष्ठेवापंच-
मेपिवा ॥ दशमेबलिदानंस्यादशदानंतथैवच ॥ अथनामकरणं ॥ कारिकायां ॥ द्वादशेनामकरणंनांदीश्राद्धेकृतेभवे
त् ॥ पुंसांयुग्माक्षराणिस्युर्विपरीतानियोषितां ॥ मनुः ॥ नामधेयंदशम्यांतुद्वादश्यांवापिकारयेत् ॥ पुण्येनक्षत्रादिव
सुमुहूर्त्तेवागुणान्विते ॥ आवत्सरंनैवदोषोमूढयोर्गुरुशुक्रयोः ॥ मलमासेपितत्कुर्यादुक्तकालेनदोषभाक् ॥ अपत्नीककुमा
रोपवेशनं ॥ पारिजाते ॥ संस्कार्यःपुरुषोवापिस्त्रीवादक्षिणतोभवेत् ॥ संस्कारकस्तुसर्वत्रातिष्ठेदुत्तरतःसदा ॥ स्मृसंत
रे ॥ जातेनामकरेचैवह्यन्नप्राशनकर्मणि ॥ निष्क्रमेचैवचौलेतुपत्नीपुत्रस्तुदक्षिणे ॥ गर्भाधानेपुंसवनेसीमंतोन्नयनेतथा ॥
॥ वधूप्रवेशनेचैवपुनःसंधानएवच ॥ पूजनेमधुपर्केचकन्यादानेतथैवच ॥ कर्मस्वेतेषुवैभार्यादक्षिणेतूपवेशयेत् ॥ कन्यापु

shrinath.udupa@gmail.com

त्रविवाहेचगोदानेव्रतबंधने ॥ आशिवादाभिषेकेचपवित्रोत्तरतोभवेत् ॥ अथनिष्क्रमणं ॥ ज्योतिः ॥ ग्रहान्निष्क्र मणंसूनोश्चतुर्थेमासिकारयेत् ॥ यात्रोक्तसमयेमासितृतीयेप्रथमेपिवा ॥ पंचमेमासिकर्तव्यंशिशोश्चैवोपवेशनं ॥ संपूज्यसू करंभूमिकुमारंचोपवेशयेत ॥ व्रीहिश्यामाकगोधूमान्माषमुद्गतिलायवाः ॥ एषामुपरिराशीनांववस्त्रंप्रसार्यचे ॥ अथअन्न प्राशनं ॥ षष्ठाष्टदशमेमासिद्वादशेवान्नमाचरेत् ॥ अयुग्मेमासिवैस्त्रीणामितिकैश्चिदुदीरितं ॥ अथचौलं ॥ तृतीयेवत्सरेचौ लंकुर्वीतास्योत्तरायणे ॥ शुक्लेपक्षेशुभर्क्षेतुकृत्वाभ्युदयिकंततः ॥ यथाचारंतुकेषांचिदुपनीतासहेष्यते ॥ स्वस्त्यादिवाचये त्पूर्ववृद्धिपूर्तेषुकर्मसु ॥ मनुः ॥ चूडाकर्मद्विजातीनांसर्वेषामेवधर्मतः ॥ प्रथमेद्वेतृतीयेवाकर्तव्यंश्रुतिचोदनात् ॥ तृ-तीयेप्रथमेवाब्देपंचमेसप्तमेपिवा ॥ चौलकर्मद्विजःकुर्यात्कुलधर्मानुसारतः ॥ चौलवतोनियमानाहमदनपारिजाते ॥ न-ग्नःस्नात्वाचतुर्भुक्त्वावृषभारोहणंतथा ॥ त्रिरात्रिमशुचित्वात्तुत्रिभिःपक्षैर्व्यपोहति ॥ भक्ष्याभक्ष्येतथापेयेवाच्यावाच्येतथा नृते ॥ अस्मिन्नकालेनदोषस्यात्सयावन्नोपनीयते ॥ अनुपनीतस्तुयोविप्रोमद्यंमोहात्पिबेद्यदि ॥ तस्यकृच्छ्रत्रयंपित्रा भ्रात्रावान्यथवातथा ॥ अथचूडादिनिषेधः ॥ चूडाकर्मशिशोर्मातागर्भिणीयदिवाभवेत् ॥ गर्भस्यवापिपत्तिःस्याद्दंप-त्योर्वाशिशोरपि ॥ शिशोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत् ॥ गतेतुपंचमेवर्षेगर्भिण्यामपिकारयेत् ॥ शिशोर्मातरि-गर्भिण्यांनचौलंनोपनायनं ॥ पंचमात्प्राङ्निषेधोयंवर्षादूर्ध्वंनदुष्यति ॥ अथशिशुलक्षणं ॥ शिशुस्त्वन्नप्राशनात्प्रागाचौ लंबालकःस्मृतः ॥ कुमारकस्तुविज्ञेयश्चौलादामौंजिबंधनात् ॥ शिशोरभ्युक्षणंप्रोक्तंबालस्याचमनंस्मृतं ॥ रजस्वलादिसं

shrinath.udupa@gmail.com

स्पर्शेस्नानाच्छुद्धःकुमारकः ॥ अथकर्मलोपप्रायश्चित्तं ॥ आरभ्याधानमाचौलात्कर्मातीतंतुकर्मणां ॥ आज्यंव्याहृतिभिर्हुत्वाप्रायश्चित्तंसमाचरेत् ॥ एतेष्वेकैकलोपेतुपादकृच्छ्रंसमाचरेत् ॥ चौलकर्मण्यतिक्रांतेपादकृच्छ्रद्वयंचरेत् ॥ अथाक्षरस्वीकारः ॥ द्वितीयजन्मतःपूर्वमक्षराभ्यासमाचरेत् ॥ मौंजीबंधनतःपश्चाद्वेदारंभोविधीयते ॥ अथनक्षत्राणि ॥ मृगादिपंचस्वपिभेषुमुलेहस्तादिकेचित्रतयेश्विनीषु ॥ पूर्वात्रयेचश्रवणत्रयेचविद्यासमारंभमुशंतिसिध्यै ॥ विद्यारंभेशुभःप्रोक्तोजीवज्ञासितवासराः ॥ मध्यमौसोमसूर्यौचनिंद्यश्चैवशनिःकुजः ॥ अथोपनयनं ॥ मनुः ॥ गर्भाष्टमेब्देकुर्वीतब्राह्मणस्योपनायनं ॥ गर्भादेकादशेराज्ञोगर्भात्तुद्वादशेविशः ॥ उपनयनकर्ता ॥ पितैवोपनयेत्पूर्वंतदभावेपितुःपिता ॥ तदभावेपितृभ्रातासकुल्योगोत्रजोगुरुः ॥ इदंदूरस्थितविषयं ॥ स्मृत्यर्थसारे ॥ औरसःपुत्रिकापुत्रःक्षेत्रजोरूढजस्तथा ॥ कानीनश्चपुनर्भूजोदत्तःक्रीतश्चसप्तमः ॥ दत्ताद्याचसहोढाजस्त्वापित्र्यःसुतस्तथा ॥ एतेद्वादशपुत्राश्चसंस्कार्याःस्युर्द्विजातयः ॥ ॥ ज्योतिःशिरोमणौ ॥ द्विपंचसप्तनवमस्थितोजीवःशुभप्रदः ॥ व्रतबंधेतुपुत्रस्यकन्यायाश्चकरग्रहे ॥ वृद्धवसिष्ठः ॥ ॥ आचार्यस्यबलंश्रेष्ठंबटोरंत्याष्टमोयदि ॥ नविचार्यबलंतत्रकारयेदुपनायनं ॥ अथआचार्यः ॥ मुख्यकालस्तुबलवान्व्रतेगोचरवृत्थितः ॥ कालातिक्रमणेचैवव्रतशुद्ध्यिन्नाचरेत् ॥ अथोपनयनेप्रतिबंधः ॥ नांदीश्राद्धेकृतेपश्चादुल्कापाताग्निवृष्टिषु ॥ सूतकादिनिमित्तेषुनकुर्यान्मौंजिबंधनं ॥ अथमातारिरजस्वलायांनिर्णयः ॥ प्रचेताः ॥ यस्यमांगलिकंकार्ययस्यमातारजश्चला ॥ तदानतत्प्रकर्तव्यंमायुःक्षयकरंहितत् ॥ नांदीश्राद्धेकृतेपश्चात्मातायदिरजश्चला ॥ मौंजिबंधंनकुर्वीतगार्ग्य

shrinath.udupa@gmail.com

स्यवचनंतथा ॥ पद्मत्रिंशन्मत्ते ॥ मात्रासहैवभुंजीतऊर्ध्वमातारजस्वला ॥ व्रतबंधःप्रशस्तस्यादिसाहभगवान्यमः ॥ नांदीश्रा
त्थेकृतेपश्चात्कन्यामातारजस्वला ॥ कन्यादानंपिताकुर्यादित्यांगिरसभाषितं ॥ अथअनुप्रवचनं ॥ उपनीतोहिकुर्वीतसा-
यंसंध्यामुपक्रमात् ॥ अग्निकार्यंततःकुर्यादौपनायनिकानले ॥ अथब्रह्मचारीनियमः ॥ क्षारादिवर्जमश्नीयाद्ब्रह्मचारीदिनत्र
यं ॥ अधःशायीचतुर्थेन्हिमेधाजननमाचरेत् ॥ मेखलामजिनंदंडंवस्त्रंयज्ञोपवीतकं ॥ पालाशसंनिधौत्याज्यंनवान्यानिच
धारयेत् ॥ स्मृत्यर्थसारे ॥ सदाधार्यंद्विजैश्लक्ष्णंकौपीनंकटिसूत्रकं ॥ कौपीनमहतेधार्यंखंडंवावस्त्रपार्श्वयुक् ॥ कौपीनं
कटिसूत्रंचयत्तेस्याद्ब्रह्मचारिणः ॥ ग्राह्यंनैवग्रहस्थस्यश्रौतेस्मार्तेचकर्मणि ॥ अथमहानाम्नी ॥ नवामौंजीनवंदंडंदत्वास्विष्ट
कृताद्यथा ॥ संवत्सरंचरेदेतत्पूर्णाब्देतूत्तरायणे ॥ अथोपाकर्मकारिका ॥ अध्यायानामुपाकर्मश्रावण्यांश्रवणेनतत् ॥
॥ तन्मासेहस्तसंयुक्तंपंचम्यांचतदिष्यते ॥ शाकलः ॥ मासद्वयमुपाकर्मनभवेद्यादिवैतदा ॥ आषाढश्रावणेकुर्यात्यस्तेवा
कर्कटेरवौ ॥ संक्रांतौग्रहणेचैवमूढयोर्गुरुशुक्रयोः ॥ उपाकर्मनकर्तव्यंमृतकेमूतकेपिच ॥ गर्गः ॥ अर्धरात्रादधस्ताच्चेत्सं
क्रांतिर्ग्रहणंभवेत् ॥ उपाकर्मनकर्तव्यंपरतश्चेन्नदोषभाक् ॥ गुरुभार्गवयोर्मौढ्येबाल्येवार्धिकेपिवा ॥ तथाधिमासेसंप्राप्ते
मलमासादिषुद्विजः ॥ प्रथमोपाकृतिर्नस्यात्कृतंचापिविनाशकृत् ॥ प्रसाद्धिकंतुयत्कर्मक्रियमाणंनदुष्यति ॥ अथोत्सर्ज
नं ॥ मनुः ॥ पुष्येतुछंदसांकुर्याद्धिरुत्सर्जनंबुधः ॥ माघस्यशुक्लपक्षेवापूर्वार्ण्हेप्रथमेहनि ॥ उत्सर्जनंभवेत्तच्चेदुक्तकालेन
वैयदि ॥ उपाकरणकालेतुकुर्यादुत्सर्जनंबुधः ॥ अथअनध्यायाः ॥ पक्षद्वयचतुर्दश्यावष्टमीद्वितथैवच ॥ प्रतिपदेदर्शपू

shrinath.udupa@gmail.com

र्णावनध्यायाःप्रकीर्तिताः ॥ चातुर्मास्यद्वितीयासुयुगमन्वंतरादिषु ॥ अष्टकासुचसर्वासुतथासोपपदासुच ॥ अयनेविषु
वचैवश्रवणेद्वादशीतथा ॥ शयनीबोधनीचैवद्वादशीःपरिकीर्तिताः ॥ द्वितीयामेतपक्षस्यसाभवेत्प्रेतसंज्ञका ॥ आ-
श्विनस्यतुयाशुक्लाद्वितीयाप्रेतसंज्ञका ॥ भरणीप्रेतपक्षस्याद्वितीयापितथैवच ॥ अनध्यायास्त्विमेप्रोक्ताइतिनिगमहर्षिभिः ॥
॥ अथनैमित्तिकमाह ॥ शंकाचतुर्दशीचैवतथाचाख्याचतुर्दशी ॥ नद्यांतेभूमिचलनेज्योतिषांचोपमार्जने ॥ एतानका
लिकान्विद्यादनाध्यामृतावपि ॥ चातुर्मास्यद्वितीयाआह ॥ शुचावूर्जेतपस्येचयाद्वितीयाविधुक्षये ॥ चातुर्मास्यद्वितीया
स्ताःप्रवदंतिमहर्षयः ॥ अथयुगादयः ॥ माधेपंचदशीकृष्णानभस्येचत्रयोदशी ॥ तृतीयामाधवेशुक्लानवम्यूर्जेयुगादयः ॥
॥ अथमन्वादयः ॥ आश्वयुक्शुक्लनवमीद्वादशीकार्तिकीसिता ॥ तृतीयाचैत्रमास्यसिताभाद्रपदस्यच ॥ श्रावणस्याष्ट
मीकृष्णापौषस्यैकादशीसिता ॥ सितापाढस्यदशमीमाघमासस्यसप्तमी ॥ श्रावणस्याप्यमावास्याज्येष्ठेपंचदशीसिता ॥
॥ आषाढीकार्तिकीमाघीचैत्रीमन्वादयस्मृताः ॥ अथाष्टकाः ॥ मार्गेपौषेतथामाघेनभस्येफाल्गुनेतथा ॥ कृष्णपक्षेष्टका
स्तिस्रःसप्तम्यादियथाक्रमं ॥ अथसोपपदाः ॥ ज्येष्ठशुक्लद्वितीयाचाश्विनीदशमीसिता ॥ चतुर्थीद्वादशीमाघेएताःसोप
पदाःस्मृताः ॥ माघकर्कटसंक्रांतीद्वेउदग्दक्षिणायने ॥ अथचैवतुलामेषौविषुवौतौमकीर्तितौ ॥ चतुर्दश्यांयदादीपंप्रा
गस्ताद्दृश्यतेरवेः ॥ अनध्यायंप्रकुर्वीतत्रयोदश्यांतुसर्वदा ॥ अथप्रदोषः ॥ षष्ठीचद्वादशीचेत्स्यादर्धरात्रादयोयदि ॥ नवना
ड्यस्तृतीयाचेत्प्रदोषोमुनिभिस्मृतः ॥ अथगोदानं ॥ गोदानंस्नातकंचैवसमावर्तनकंतथा ॥ चौलोपनयनंचैवनकुर्याद्राक्षि

shrinath.udupa@gmail.com

णायने ॥ अथसमावर्तनं ॥ अथैतान्युपकल्पयीतेतिसूत्रं ॥ कारिकोक्तंचमधुपर्कादिस्वसूत्रोक्तंसर्वकार्यं ॥ मनुः ॥
॥ गुरुणानुमतःस्नात्वासमावृत्तोयथाविधि ॥ उद्वहेतद्विजोभार्यांसवर्णांलक्षणान्वितां ॥ यस्यास्तुनभवेद्भ्रातानविज्ञायेतवा
पिता ॥ नोपयछेतुतांप्रज्ञःपुत्रिकाधर्मशंकया ॥ समानप्रवरांकन्यांसपिंडांचैकगोत्रजां ॥ नैवतांवरयेत्प्राज्ञोमातृवत्परिकी
र्तिता ॥ वाग्दानंचप्रदानंचवरणंपाणिपीडनं ॥ सप्तपदीतिपंचांगोद्वाहनाभिःपरिकीर्तितः ॥ अथवैदिः ॥ हस्तोल्लिता
चतुर्हस्ताचतुरस्रासमंततः ॥ स्तंभैश्चतुर्भिःसंयुक्तावेवाहेवैदिकास्मृता ॥ वृत्यमनुः ॥ एकत्वंसंगताभर्तुःपिंडैगोत्रेचसूतके ॥
॥ स्वगोत्राद्भ्रश्यतेनारीविवाहात्सप्तमेपदे ॥ ग्रहप्रवेशहोमंतुहोमंचैतानिकंचहि ॥ एकतंत्रेणवाकुर्यादेकस्मिन्ननलेपिवा ॥
॥ अथरात्रिभागः ॥ रात्रित्रिभागंकुर्वीतद्वौभागौपूर्ववासरे ॥ भागमेकंपरेन्हिस्याद्विवाहेसूतकेक्रतौ ॥ विवाहौपासनात्पू
र्वमनलेशांतिमागते ॥ परिणीयादिकंकृत्वाहोमशेषंसमाचरेत् ॥ अथऋतुमतीविचारः ॥ प्रयोगपारिजाते ॥ विवाह
होमेप्रकृतिकन्यायदिरजस्वला ॥ त्रिरात्रंदंपतीस्यातांपृथक्शय्यासनासने ॥ चतुर्थेहनिसुस्नातातस्मिन्नग्नौयथाविधिः ॥
॥ विवाहहोमंकुर्याच्चुकन्यादानादिकंतथा ॥ चतुर्थमध्येकन्याचेभवेद्यदिरजस्वला ॥ त्रिरात्रमशुचिस्त्वेकाचतुर्थेहनिशुध्य
ति ॥ अथचतुर्थी ॥ चतुर्थीमध्येज्ञायतेदोषोयदिवरस्यचेत् ॥ दत्तामपिपुनर्दद्यात्पितान्यस्मैविदुर्बुधाः ॥ आचार्यः ॥
॥ प्रवरैक्यादिदोषाःस्युःपतिसंगादथोयदि ॥ दत्तामपिहरेद्दद्यादन्यस्मैशंतिकेचन ॥ हेमाद्रौ ॥ कलौतुपुनरुद्वाहंवर्जयेदि
तिगालवः ॥ कस्मिंश्चिद्देशइच्छंतिनतुसर्वत्रकिंचन ॥ इतिपुनरुद्वाहः ॥ ग्रहप्रवेशः ॥ विवाहमारभ्यवधूप्रवेशोमध्येशुभःषो

shrinath.udupa@gmail.com

डशवासरस्य ॥ निषित्थवारास्तिथियोगदोषोनतत्रचैवंसुनयोवदंति ॥ आषोडशदिनादर्वाङ्नववध्वाःप्रवेशने ॥ तिथिवा सरतारागंदोषस्तत्रनाविद्यते ॥ वधूप्रवेशोनदिवाप्रशस्तोनृपप्रवेशोननिशिप्रशस्तः ॥ दिवाचरात्रौचग्रहप्रवेशोसंकीर्तितः स्याद्त्रिविधप्रवेशः ॥ अथदेवकोत्थापनं ॥ समेचदिवसेकुर्यादेवकोत्थापनंबुधः ॥ षष्ठंचविषमंनेष्टंसुत्कापंचमसप्तमौ ॥ ॥ स्मृत्यर्थसारे ॥ वरेदेशांतरगतेत्रीनृतून्संप्रतीक्ष्यवै ॥ कन्यान्यस्मैप्रदातव्यावाग्दानेचकृतेसति ॥ पंचत्वंचनरोगछेद्वाग्दानेयदिवैकृते ॥ कन्यान्यस्मैप्रदातव्यातथासप्तपदात्पुरा ॥ कृतेसप्तपदेभर्तुःवियोगोयदिजायते ॥ नदेयापुनरन्यस्मैकलौकन्यामनीषिभिः ॥ अथप्रतिकूलंस्मृतिचंद्रिकायां ॥ कृतेवाङ्निश्चयेपिस्यान्मृत्युर्भस्यगोत्रिणां ॥ तदानमंगलंकार्यं नारीवैधव्यदंध्रुवं ॥ प्रतिकूलेकालमाह ॥ पितुर्मातुश्चकन्याश्चवर्षमर्धंतदर्धकं ॥ सुतभ्रातोःसार्धमासमन्येषांमाससंमितं ॥ तदंतेशांतिकंकृत्वायथोक्तेनविधानतः ॥ पुनश्चैवाथवाग्दानंकृत्वालग्नंविधीयते ॥ पितरिमृतेनिषेधः ॥ मृतेजनन्यांजनकेवर्षं वर्षार्धमेवच ॥ नकुर्याच्छुभकर्माणिकुलधर्मास्तथैवच ॥ पितुरद्धमिहाशौचंषण्मासंमातुरेवच ॥ मासत्रयंतुभार्यायास्तदर्धंभ्रातृपुत्रयोः ॥ अन्येषांतुसपिंडानांमासमेकमुदाहृतं ॥ उक्तकालविधिर्यावत्तावन्नैवशुभाःक्रियाः ॥ दशाहानंतरंप्रोक्तमाशौचं यद्विजन्मनां ॥ शुभार्थमेवजानीयात्कृतेपिहिसपिंडने ॥ यावदाशौचमारभ्यसपिंडीकरणंभवेत् ॥ विवाहादीनिसर्वाणिशुभकार्याणिवर्जयेत् ॥ मृतेपित्तरियस्याथमृतायांवापिमातरि ॥ नकुर्याच्छुभकर्माणिवर्षवर्षार्धमेवच ॥ व्रतबंधंविवाहंचनकुर्याच्छोभनंसुतः ॥ वर्षवर्षार्धकंचैवकृतेपिहिसपिंडने ॥ विवाहादिप्रकुर्वीतयदामहतिसंकटे ॥ सपिंडीकरणादूर्ध्वंमासिका

shrinath.udupa@gmail.com

न्यपकर्ष्यच ॥ कन्यायाश्चातिकालश्चेद्वरस्यापिभवेद्यदि ॥ तस्योद्वाहेनदोषोस्तितथाचौलोपनायने ॥ शुभकर्माणिकार्याणि निवृतेसूतकेहितु ॥ इत्युक्तंतत्सपिंडानांकेचिन्नेच्छंतिमानवाः ॥ व्याघ्रः ॥ प्रेतक्रियामनिर्वर्त्तनकुर्याच्छोभनक्रियां ॥ विधिर्भवेत्सपिंडानांनापरेषामयंविधिः ॥ अथविवाहादिसूतकोत्पत्तिः ॥ चौलेचैवोपनयनेविवाहेचमहामखे ॥ त्रिषड्दशैकविंशत्या प्रारंभेनास्तिसूतकं ॥ तथाच ॥ एकविंशत्यहर्यज्ञेविवाहेदशवासराः ॥ त्रिषट्चौलोपनयनेनांदीश्राद्धंपुरोदिने ॥ प्रारंभो वरणंयज्ञेसंकल्पोव्रतसत्रयोः ॥ नांदीश्राद्धंविवाहादौश्राद्धेपाकपरिक्रिया ॥ व्रतयज्ञविवाहेषुश्राद्धेहोमेजपार्चने ॥ प्रारब्धेसूतकंनस्यादनारब्धेतुसूतकं ॥ प्रारंभादूर्ध्वमाशौचेविवाहःकार्यएवतु ॥ व्रतादौसूतकेचैवप्रारंभेनास्तिसूतकं ॥ वृत्यशौनकः ॥ ऋत्विजांदीक्षितानांचयज्ञियंकर्मकुर्वतां ॥ कर्मणिक्रियमाणेतुमध्येचेत्सूतकंभवेत् ॥ यावत्कर्मसमाप्तिःस्यात्तावन्नाप्नोतिसूतकं ॥ विनानेत्रैकमन्येषुकर्मस्वाशौचमिष्यते ॥ विश्वरूपनिबंधः ॥ विवाहादिषुमध्येचेत्सूतकेसतिचांतरा ॥ ॥ पूर्वसंकल्पितद्रव्यंदीयमानंनदुष्यति ॥ विवाहोत्सवयज्ञेषुत्यंतरासूतसूतके ॥ शेषमन्नंपरैर्देयंदाताभोक्ताचनस्पृशेत् ॥ ॥ सूतकेपिचग्राह्याणि ॥ नांदीश्राद्धेकृतेचैवयावन्मातृविसर्जनं ॥ दर्शश्राद्धंक्षयश्राद्धंस्नानंसीतोदकेनच ॥ अपसव्यंस्वधाकारंनित्यश्राद्धंतथैवच ॥ ब्रह्मयज्ञंचाध्ययनंनदीसीमातिपातनं ॥ उपवासंव्रतंचैवश्राद्धभोजनमेवच ॥ नैवकुर्युःसपिंडाश्चमंटपोद्वासनावधि ॥ मंटपोद्वासनात्पूर्वंनांदीश्राद्धेकृतेयदि ॥ येकुर्वंतिनरामोहादपमृत्युंव्रजंतिते ॥ सपिंडानैवकुर्वीरन्नैकग्रामेगृहेपिच ॥ नैवदेशांतरेदोषःस्वधाकारोभवेद्यदि ॥ नांदीश्राद्धेकृतेचैवापित्रोःश्राद्धेकृतेपिच ॥ मोहादुपवसेद्य

shrinath.udupa@gmail.com

स्तु नरकंप्रतिपद्यते ॥ पित्रोःप्रत्यब्दिकेप्राप्तेनांदीश्राद्धंनकारयेत् ॥ यदिमोहाद्द्विजःकुर्यान्मांगल्यमशुभंभवेत् ॥ सपिंडा नैवकुर्वीरनिति ॥ अथवर्ज्यानाह ॥ स्नानंसचैलंतिलमिश्रकर्मप्रेतानुयानंकरकप्रदानं ॥ अपूर्वतीर्थामरदर्शनंचविवर्जयेन्मं गलमद्धमेकं ॥ मासषट्कंविवाहादिव्रतप्रारंभणंनरः ॥ जीर्णभांडादिनत्याज्यंगृहसंमार्जनंतथा ॥ ऊर्ध्वंविवाहात्पुत्रस्यत थाचव्रतबंधनात् ॥ आत्मनोमुंडनंचैववर्षंवर्षार्धमेवच ॥ विवाहोपनयादूर्ध्वंवर्षंवर्षार्धमेवच ॥ नदद्यान्करकान्पिंडान्न तिलैरर्चयेत्पितॄन् ॥ वृत्यैरपिचकर्तव्यंमातापित्रोर्मृतेहनि ॥ पिंडनिर्वापणंकार्यंपितृव्यादेरपिंडनं ॥ मातापितृणामद्धेतु विवाहादिषुसर्वदा ॥ तिलपिंडैस्तुकर्तव्यमन्यश्राद्धेविवर्जयेत् ॥ स्मृत्यंतरेविस्तरोज्ञेयः ॥ अथैकोदरीविवाहः ॥ प्रत्युद्वा होनैवकार्यश्चैकस्मिन्नुदुहितृद्वयं ॥ नचैकजन्ययोःपुंसोर्विवाहंचोपनायनं ॥ एकजन्येतुकन्येद्वेपुत्रयोर्नैकजन्ययोः ॥ कन्ये द्वेतुनचैकस्मिन्प्रदद्यात्तुकदाचन ॥ एकमातृप्रसूतानामेकस्मिन्वत्सरेयदि ॥ विवाहान्नैवकुर्वीतिवदंतिमुनयोन्यथा ॥ ज्योतिः ॥ ॥ एकोदरप्रसूतानामेकस्मिन्नेववत्सरे ॥ नकुर्यान्मंगलंत्रीणिविवाहंचोपनायनं ॥ चकाराच्चौलं ॥ एकस्मिन्मंटपेप्येकोन कुर्यान्मंगलत्रयं ॥ यदिभिन्नोदराणांस्यात्समाप्येकंपुनर्भवेत् ॥ भिन्नोदराणामेकस्मिन्नकुर्यान्मंटपेपिता ॥ समाप्यमंगलंचै कंपुनःकुर्याच्चनांदिकं ॥ अथयामलेज्योतिः ॥ एकस्मिन्वत्सरेचैववासरेपिचमंटपे ॥ कर्तव्यंमंगलंस्वस्रोर्भ्रात्रोर्यमलजातयोः ॥ ॥ संकटे ॥ तथाचस्मृतिः ॥ नचैकजन्ययोःपुंसोर्विवाहस्त्वेकवत्सरे ॥ अद्धभेदेशुभंकेचित्प्राहुर्महतिसंकटे ॥ कृतेचौलो पनयनेभवेद्यावद्दिनत्रयं ॥ कन्यादानंनकर्तव्यमत्राहुरितिसूरयः ॥ व्रतबंधनमेकस्यतथैकस्यविवाहकं ॥ एकस्मिन्नपिवा

shrinath.udupa@gmail.com

न्यस्मिन्नादिनेकुर्यात्तुवैपिता ॥ मध्येचेद्व्रतबंधस्यविवाहायदिवाभवत् ॥ अभिलाषोमुहूर्तस्यकन्यायावावरस्यच ॥ कन्या विवाहमध्येचेद्विवाहस्यात्सुतस्यतु ॥ पितैवतुतदाकुर्यादितिकैश्चिदुदीरितं ॥ इत्थंभवेद्यदातत्रकथंस्यान्मातृपूजनं ॥ नांदी-श्राद्धंभवेदेकंहोममंत्राःपृथक्पृथक् ॥ सारावल्यां ॥ चौलंमुंडनमेवोक्तंवर्जयेद्वरणात्परं ॥ ऋतुत्रयंपुनर्यावन्नकुर्यालघुमंग लं ॥ कुलेऋतुत्रयादर्वाङ्मंडनान्नतुमंडनं ॥ प्रवेशेनिर्गमःपश्चान्नकुर्यान्मंगलत्रयं ॥ पुनर्विवाहोर्ध्वमृतुत्रयेपिविवाहकार्यंदुहि तुश्चकुर्यात् ॥ नमुंडनाच्चापिहिमुंडनंचगोत्रैकतायांयदिनाब्धभेदः ॥ कुलेऋतुत्रयादर्वाङ्मंडनानतुमुंडनं ॥ अब्धभेदेपिकु र्वीतमंडनान्मुंडनंभवेत् ॥ पुत्रोद्वाहान्नैवपुत्रीविवाहस्याद्दतुत्रये ॥ अब्धांतरामुंडनंचनैकदामुंडनद्वयं ॥ फाल्गुनेचैत्रमासेतुपु त्रोद्वाहोपनायने ॥ अब्धभेदेनदोषस्यादित्याचार्योब्रवीद्यथा ॥ गर्गः ॥ दोषस्यादूर्ध्वमुद्वाहात्कुलेचेदुपनायनं ॥ नदोषःपु रुषोद्वाहादूर्ध्वंकन्याविवाहके ॥ व्याघ्रः ॥ पुत्रोद्वाहात्परंदोषोदुहितुःस्याद्विवाहिके ॥ नैवदोषःसपिंडेपुनदोषोभिन्नमातृ के ॥ भृगुः ॥ फाल्गुनेचेद्विवाहस्याच्चैत्रेचैवोपनायनं ॥ अब्धभेदाच्चकुर्वीतनतुत्रयविलंघनं ॥ अथपरिवेत्तादि ॥ स्मृत्यर्थ सारे ॥ पितृव्यपुत्रेसापत्नेवरदारासुतादिषु ॥ विवाहाधानयज्ञादौपरिवेत्तादिदूषणं ॥ पंढांधबधिरस्तब्धजडगद्गदपंगुषु ॥ ॥ कुष्ठवामनरोगार्त्तशुष्कांगविकलांदिषु ॥ स्तब्धेपुंस्त्वेनरहितेशयनस्थेनिरिंद्रिये ॥ मूकोन्मत्तेषुसर्वेषुनदोषःपरिवेदने ॥ ॥ कन्याविषयेप्रयोगपारिजाते ॥ एकमातृप्रसूतानांपुत्रिणांपरिवेदने ॥ दोषस्यात्सर्ववर्णेषुनदोषोभिन्नमातृषु ॥ विवाहा नाधिकारस्याज्ज्येष्ठकन्यास्थितायदा ॥ तदनुज्ञांविनावापिकनिष्ठासुद्वहेत्तदा ॥ कालप्रतीक्षणंनस्याद्रजोदोषेनदोषभाक् ॥

shrinath.udupa@gmail.com

॥ परिवित्तोभवेद्यस्तुपतितःकन्यकापिच ॥ अथासंस्कृतकन्यारजादोषविचारः ॥ स्मृत्यर्थसारे ॥ असंस्कृतातुयाकन्या रजसातुपरिप्लुता ॥ भ्रातरःपितरस्तस्याःपतिताःस्युर्नसंशयः ॥ इतिहासे ॥ पितुर्गृहेतुयाकन्यारजःपश्यत्यसंस्कृता ॥ ॥ साकन्यावृषलीज्ञेयातत्पतिर्वृषलीपतिः ॥ अथस्त्रीणांरजोदोषविचारः ॥ रागजंरोगजंचैवकालजंद्रव्यजंतथा ॥ स्त्रीणां चैवरजःप्रोक्तंकालजंदोषकृद्भवेत् ॥ अकालेयदिचेत्स्त्रीणांतद्रजोनैवदुष्यति ॥ पंचाशद्वर्षादूर्ध्वनदोषः ॥ याज्ञवल्क्यः ॥ ॥ रजस्रावेतुनारीणांरजोदोषोदिनत्रयं ॥ चतुर्थादिवसेस्नातास्पर्शनादावशुद्धिदा ॥ शुत्थाभर्तुश्चतुर्थेन्हिस्नानेनस्त्रीरजस्व ला ॥ दैवैकर्मणिपित्र्येचपंचमेहनिशुध्यति ॥ अष्टादशाहेयदिचेद्दिनद्वयमेकोनविंशेत्रिदिनंततःपरं ॥ रजोयुताष्टादशवास रेपुनःप्रायेणयायौवनशालिनीवधूः ॥ ज्यहेणसाशुध्यतिदैवापित्र्ययोरजोनयुक्तंशुचिमाप्लवेसति ॥ रजस्वलायदिस्नातापुनरेवर- जस्वला ॥ अष्टादशदिनादर्वागशुचित्वंनविद्यते ॥ ऋतुकालेव्यतीतेतुयदिनारीरजस्वला ॥ तत्रस्नानेनशुद्धिस्यादष्टादश दिनात्परं ॥ दिनाच्चेत्षोडशादर्वाङ्नारीयाचातियौवना ॥ पुनारजस्वलापिस्याच्छुद्ध्यास्नानेनकेचन ॥ रात्रेःकुर्याच्त्रिभागास्तु द्वौभागौपूर्ववासरे ॥ ऋतौसूतेमृतेचैवज्ञेयोंशांशःपरेहनि ॥ अन्यःपक्षः ॥ रात्रावेवसमुत्पन्नेमृतेरजसिसूतके ॥ पूर्वमेवादिनं ग्राह्यंयावन्नोदयतेरविरिति ॥ काश्चिद्देशाचारमाह ॥ अथद्वितीयविवाहनिमित्तंस्मृत्यर्थसारे ॥ अप्रजांदशमेवर्षेस्त्री प्रजांद्वादशेत्यजेत् ॥ मृतप्रजांपंचदशेत्यस्त्वप्रियवादिनीं ॥ स्मृत्यंतरे ॥ व्याधितास्त्रीप्रजावंध्यात्युन्मत्ताविगतार्तवा ॥ ॥ अदुष्टालभतेत्यागंतीर्थतोनतुधर्मतः ॥ तीर्थतोयोनितइत्यर्थः ॥ अग्निस्त्विष्टादिशुश्रूषांबहुभार्यःसवर्णया ॥ कारयेत्तद्धुत्वे

shrinath.udupa@gmail.com

चज्येष्ठयागर्हितानचेत् ॥ सुरूपांसुप्रजांचैवसुभगामात्मनःप्रियां ॥ धर्मानुचारिणींभार्यानलभेद्विजसत्तमः ॥ अथाग्निसंयोगः ॥ जीवत्यांज्येष्ठपत्न्यांचकथंस्त्रीपुनरुद्वहेत् ॥ कृत्वासंगल्यसूत्रांतंमधुपर्कादिपूर्ववत् ॥ सर्वंकनिष्ठभार्यायाहवनंतत्रचैवहि ॥ कनिष्ठभार्यायाःसर्ववैवाहिकंहवनंचज्येष्ठभार्याग्नौकुर्यादित्यन्वयः ॥ विधेवज्ज्येष्ठभार्याग्नौकुर्याद्वैवाहिकंचयत् ॥ तदभावेलौकिकाग्नौसर्व वैवाहिकंभवेत् ॥ वक्ष्येहमग्निसंयोगंपत्न्योर्ज्येष्ठकनिष्ठयोः ॥ निदध्याज्ज्येष्ठभार्याग्निंस्थंडिलेदक्षिणेचतं ॥ तदुत्तरेकनिष्ठाग्निं स्थंडिलेतंनिधायच ॥ पृथक्स्थंडिलयोरग्निंसमाधाययथाविधि ॥ तंत्रंकृत्वाज्यभागांतमन्वाधानादिकंततः ॥ जुहुयाज्ज्येष्ठ भार्याग्नौसमन्वारब्धआहुतीः ॥ अग्निमीळइत्यादिभिर्होमः ॥ स्विष्टकृतादिसमाप्याग्निंसमारोप्य ॥ समिध्याग्निंसमारोप्य अयंतेयोनिइत्यृचा ॥ प्रत्यवरोहेत्सनयाकनिष्ठाग्नौनिधायतां ॥ आज्यभागांतंमंत्रादिकृत्वारभ्यतदादितः ॥ अग्नावग्निश्च रति०इत्यादि ॥ अथोपासनार्तीतप्रायश्चित्तं ॥ कारिका ॥ नित्यहोमेत्वतिक्रांतेसंस्कृत्याग्निंचपूर्ववत् ॥ चतुष्कृत्वाशृ- हीताज्यंसनस्वत्याजुहोत्यथ ॥ अर्वाक्त्रिरात्राज्जुहुयादयाश्चेदासप्तरात्राच्चमनस्वतींच ॥ एकादशाहेसहतंतुमत्यास्याद्वादशा हेध्रुवमाग्निनाशः ॥ सूतकांतरितेवन्हौमनोयाभूर्भुवःस्वरों ॥ मध्येपर्वाणिसंप्राप्तेपुनःसिद्धिर्विधीयते ॥ आद्वादशादिनादर्वा क्प्रायश्चितंकथंभवेत् ॥ तंत्रंकृत्वाज्यभागांतमयादित्यादिसप्तमं ॥ दिवसाद्वादशादूर्ध्वंकुर्यात्होमंविवाहवत् ॥ प्रातर्हो मोथवासायंप्रमादान्नकृतोयादे ॥ हुत्वाज्यात्तदाभिश्चाज्यमतीतेप्याहुतीर्हुनेत्तृतीये ॥ अथपुनःसंधानं ॥ श्वोदक्यापतितः शूद्रोरक्तंमूत्रंपुरीषकं ॥ स्पृशेदग्निंसमेत्यंचेत्पुनराधानमिष्यते ॥ समिधश्चेत्प्रतप्तायानाशस्यात्पुतएवचा ॥ पुनराधानमिछं

shrinath.udupa@gmail.com

तिकेचिद्यज्ञावेदोजनाः ॥ सामित्यतापनात्पूर्वमग्निश्चेदुपशाम्यति ॥ पुनराधानवत्कुर्यादयाश्चेत्सादिसप्तकं ॥ इतिपुनराधानं ॥
॥ अथाविधुरौपासनं ॥ तदाहुर्वाचापत्नीकोग्निहोत्रमितिश्रुतिः ॥ तथाचस्मृतिः ॥ मृतायामपिभार्यायांवैदिकन्नस्रजे द्रुधः ॥
॥ उपाधिनापिसत्कर्मयावज्जीवंसमाचरेत् ॥ अन्येकुशमयीपत्नींकृत्वातुगृहमेधिनः ॥ अग्निहोत्रमुपासीतयावज्जीवमनुव्रताः ॥
॥ अथविधिमाह ॥ उत्धृत्यमाग्निप्रणवेनचादौप्रस्याग्निरुपसामित्यृचाहरेत् ॥ निधायपृष्टादिविसंक्रमेणततस्तुहोमास्तिसृभिःस-
मिद्भिः ॥ लेखादयोनैवचयत्सवितुर्विश्वानिनोध्यानइमेत्रमंत्राः ॥ आरोपणंचाप्यपरापेणंचत्युत्पत्तिरेवविधुरानलस्यां ॥
॥ इत्थंकृत्वाततोहोमंसायंप्रातर्विधीयते ॥ प्रतपेत्सामिधंवापिपाणीवायुगपत्तपेत् ॥ प्रस्रवरोहणंनैवनचैवारोहणंतथा ॥
॥ विधुरस्यविधिःकैश्चिदुक्तोयामितिसूरिभिः ॥ अथमृतभार्यस्यपुनर्विवाहविषयेसंग्रहः ॥ प्रमदामृतवत्सरादितःपुनरुद्वा
हविधियदाभवेत् ॥ विषमेपरिवत्सरेशुभःसमवर्षेतुमृतिप्रदोभवेत् ॥ पत्नीवियोगेप्रथमेचवर्षेनचेद्द्विवर्षेपुनरुद्वहेत्सः ॥
॥ अयुग्ममासेतुशुभप्रदःस्याद्वाशिष्टगार्ग्यादिपराशराद्याः ॥ इत्यादि ॥ अथार्कविवाहः ॥ अकृत्वार्कविवाहंतुतृतीयां
यादिचोद्वहेत् ॥ विधवासाभवेत्कन्यातस्मात्कूर्याद्विचक्षणः ॥ अर्कसंनिधमागत्यकुर्यात्स्वस्त्यादिवाचनं ॥ नांदिश्राद्धंहि
रण्येनह्यष्टवर्गान्प्रपूजयेत् ॥ इत्यादि ॥ अथपुण्याहवाचनं ॥ द्वात्रिंशदंगुलंदीर्घसमंताच्चतुरस्रकं ॥ रेखेद्वेरेकतःकोः-
णेइतिकुर्वीतपार्श्वयोः ॥ कोष्ठानिकारयेत्तत्रद्वात्रिंशत्संख्ययान्वितं ॥ पदवत्पार्श्वयोस्तस्यपुरतोगजशुंडवत् ॥ पश्चिमेक-
लशाकारंनिर्मितंब्रह्मणापुरा ॥ तदेवस्वस्तिकंचेतिप्रवदंतिमहर्षयः ॥ इत्यादि ॥ अथषोडशकर्माण्यहभाष्यकारः ॥

shrinath.udupa@gmail.com

॥ गर्भाधानंपुंसवनंसीमंतोजातकर्मच ॥ नामनिष्क्रमणंचान्नप्राशनंचौलकर्मच ॥ तथोपनयनंचैवमहानाम्नीमहाव्रतं ॥
॥ उपनिषद्वगोदानंसमावर्तनकंततः ॥ विवाहांग्नेष्टिकंचेतिसंस्काराःषोडशैवतु ॥ एतेवैमुनिभिःप्रोक्ताःकर्तव्याहिद्विजन्म
ना ॥ अथनांदीश्राद्धं ॥ स्वपितृभ्यःपितादद्यात्सुतसंस्कारकर्मसु ॥ यावद्विवाहःपुत्रस्यतावदेवहितत्सुतः ॥ नांदीश्रा
द्धंपिताकुर्यादाद्येपाणिग्रहेबुधः ॥ अतऊर्ध्वंसुतःकुर्यात्पितॄणांतत्थिवैपितुः ॥ मनुः ॥ श्राद्धंतुमातुःपूर्वस्यापितॄणांतदनंत
रमिति ॥ अथपादप्रक्षालनं ॥ अप्रवाहोदकस्नानमिति ॥ नग्नश्राद्धेनवश्राद्धेसपिंडेप्रेतकर्मसु ॥ तिष्ठतःक्षालनंकुर्या-
दन्यत्रोपविशोद्भवे ॥ श्राद्धेयज्ञेविवाहेचदीक्षायामागतेगुरौ ॥ तिष्ठतःक्षालनंकुर्यान्निराशाःपितरोगताः ॥ विवाहोत्स
वयज्ञेषुश्राद्धेचैवतुसर्वदा ॥ विप्राणामुपविष्टानांपादौप्रक्षालयेत्सदा ॥ पादप्रक्षालनंप्रोक्तंउपविश्यासनेद्विजान् ॥ तिष्ठ-
तांक्षालनंचेत्स्यान्निराशाःपितरोगताः ॥ तिष्ठन्प्रक्षालयेत्पादौदेवेपित्र्येचकर्मणि ॥ देवाहव्यंनगृण्हंतिकव्यंनापितरस्तथा ॥
॥ अथविवाहमासानाह ॥ माघफाल्गुनवैशाखज्येष्ठमासाःशुभावहाः ॥ विवाहोमार्गशीर्षेपिदेवलस्यमतेननु ॥ पौषेतुम
करस्थेर्केचैत्रेमीनगतेरवौ ॥ आषाढेमिथुनादित्येकेप्याहुःकरपीडनं ॥ मीनराशिगतेसूर्येविंशतिर्वासरेयदि ॥ विवाहःशु-
भदश्चैत्रेनतुमेषेकदाचन ॥ मार्गेमासितथाज्येष्ठेविवाहंचोपनायनं ॥ ज्येष्ठपुत्रदुहित्रोस्तुयत्नेनपरिवर्जयेत् ॥ नजन्मधिष्ण्ये
नचजन्ममासिनजन्मकालीनादिनेविदध्यात् ॥ ज्येष्ठेनमासिप्रथमस्यसूनोस्तथासुतायाआपिमंगलानि ॥ अथज्येष्ठत्रयं ॥
॥ ज्येष्ठेनज्येष्ठयोःकार्यंनृनार्योःपाणिपीडनं ॥ तयोरेकतरज्येष्ठंज्येष्ठमासेपिकारयेत् ॥ ज्येष्ठपंचकमाचार्यस्त्यजेज्ज्येष्ठचतु-

shrinath.udupa@gmail.com

ष्टयं ॥ ज्येष्ठत्रयंनिषिद्धंस्याज्ज्येष्ठद्वयंतुमध्यमं ॥ अथवरगुणानाह ॥ ज्योतिःसारे ॥ कुलंशीलंवपुर्विद्याववयोवित्तंस-
नाथतां ॥ गुणाःसप्तवरेयस्मिन्तस्मिन्कन्यामदीयते ॥ अंधोमूकःक्रियाहीनोह्यपस्मारीनपुंसकः ॥ दूरस्थःपतितःकुष्टी
दीर्घरोगीवरोनसः ॥ अथकन्यागुणाः ॥ रूपंशीलंकुलंकांतिवयोवित्तंसनाथतां ॥ यस्यांसप्तगुणावध्यांवृणुयात्तांचबुद्धि
मान् ॥ इतिधर्मप्रवृत्तौगर्भाधानादिपंचदशसंस्कारप्रकरणं ॥ अथसप्तमपंचमयोःसापिंड्यंतत्रसगोत्रमनुराह ॥ लेपभाजश्चतुर्था
द्याःपित्राद्याःपींडभागिनः ॥ पिंडदःसप्तमस्तेषांसापिंड्यंसप्तपौरुषं ॥ अत्रत्रुटिः ॥ अन्यत्रभट्टोजीदीक्षितस्यसापिंड्य
निर्णयेद्रष्टव्यं ॥ गुरोःसगोत्रप्रवरानोद्वाह्याक्षत्रियोर्द्वयोः ॥ सगोत्रोह्यनभिज्ञैश्चविप्रैराचार्यगोत्रजां ॥ असंभ्रज्ञातबंधूनामा
चार्यप्रवरास्मृताः ॥ पक्षेचास्मिन्विवाहेपिसगोत्रैःसहनेष्यते ॥ अज्ञानादथवाज्ञानाद्यस्तुवैयादिचोद्वहेत् ॥ समानप्रवरांकन्यां
मातृवत्परिपालयेत् ॥ बौधायनः ॥ सगोत्रप्रवरांकन्यांपरिणीयपतेद्द्विजः ॥ अयंबौधानोक्तेनप्रायश्चितेनशुध्यति ॥
अकामतःपरिणयनेकृच्छ्रं ॥ प्रजोत्पादनेचांद्रायणं ॥ प्रजायाभारद्वाजगोत्रांतर्भावः ॥ कामतःपरिणयनेगुरुतल्पव्रतंचरेत् ॥
प्रजानांचांडालेपुक्षिपेत् ॥ परित्यज्यतांजननीमिवपरिपालयेत् ॥ अत्रापित्रुटिः ॥ भट्टोजिदीक्षितगोत्रप्रवरनिर्णयेद्रष्टव्यं ॥
॥ अथजीवत्पितृकश्राद्धविधिः ॥ अमाश्राद्धंगयाश्राद्धंश्राद्धंचापरपाक्षिकं ॥ नजीवत्पितृकःकुर्यात्तिलैःकृष्णैश्चतर्पणं ॥
अन्यत्सर्वंजीवत्पितृकनिर्णयेद्रष्टव्यं ॥ अथसापत्नमातृविषयंसारावल्यां ॥ एकभर्तृकपत्नीनामपुत्रानिधनंगताः ॥ अन्यस्या
पुत्रवत्त्वेतुकर्तारौभर्तैवतत्रतु ॥ सापत्नजननीयस्यपितुश्चेज्जीवतोमृता ॥ अपुत्रायादिसावापितस्याःकार्याःकथंक्रियाः ॥ एके

shrinath.udupa@gmail.com

नैवप्रकर्तव्यंज्येष्ठपत्नीसुतेनच ॥ जन्मज्येष्ठेनवामातुःसापत्न्याअपिकर्मयत् ॥ कृत्वासौवपनंपुत्रःपित्रोस्तुजीवतोरपि ॥
सापत्न्यमातुःकुर्वीतपैतृमेधिककर्मच ॥ चकारात्प्रतिसांवत्सरादिकुर्यात् ॥ मृतामातरिजीवत्यांसापत्नजननीयदि ॥
पितामह्यादिभिःकुर्यात्प्रत्यब्दंनतुतर्पणं ॥ अथबहुपत्नीकपुत्रविषयं ॥ एकभर्तृकपत्नीनांसर्वासांसंतिवैसुताः ॥ पितुर्मरण
कालेतुज्येष्ठपत्नीसुतोग्रजः ॥ अथकर्माधिकारिणःपुत्रानाहयाज्ञवल्क्यः ॥ औरसोधर्मपत्नीजस्तत्समःपुत्रिकांसुतः ॥
क्षेत्रजःक्षेत्रजातस्तुसगोत्रेणेतरेणवा ॥ गृहेप्रच्छन्नउत्पन्नोगूढजस्तुसुतःस्मृतः ॥ कानीनःकन्यकाजातोमातामहसुतःस्मृतः ॥
अक्षतायांक्षतायांवाजातःपौनर्भवःसुतः ॥ दद्यान्मातापितावार्यंसपुत्रोदत्तकोभवेत् ॥ क्रीतश्चताभ्यांविक्रीतःकृत्रिमस्यात्स्व
यंसुतः ॥ दत्तान्मातुःस्वयंदत्तोगर्भेदत्तःसहोढजः ॥ उत्सृष्टोगृह्यतेयस्तुसोपविद्धोभवेत्सुतः ॥ पिंडदोषंहरश्चैषांपूर्वाभावे
परःपरः ॥ मनुः ॥ एतत्तेभिहिताःपुत्राःप्रसंगादन्यबीजजाः ॥ यस्ययोबीजजोजातस्तस्यतेनेतरस्यतु ॥ प्रयोगपारिजाते ॥
ज्येष्ठएवसुतःकुर्यादविभक्तैःसहानुजैः ॥ पित्रोरेवाब्दिकंश्राद्धमन्येषांतुनतैःसह ॥ प्रत्यब्दंपार्वणेनैवविधिनाक्षेत्रजौरसौ ॥
कुर्यात्तामितरेकुर्युरेकोद्दिष्टंसुतादयः ॥ औरसःपार्वणेनैवपित्रोरेवविधीयते ॥ दत्तपुत्रादयःसर्वेप्येकोद्दिष्टविधानतः ॥
द्व्यामुष्यायणकादद्युर्द्वाभ्यांपिंडोदकेतथा ॥ श्राद्धंकुर्युस्तयोश्चैवपित्रोर्भ्रातृगृहीतयोः ॥ यस्ययोबीजतोजातस्तस्यैवंपार्वणं-
स्मृतं ॥ एकोद्दिष्टमथान्येषांविधिरेषउदाहृतः ॥ पितुश्चैवगृहीतुश्चमातुश्चैवतथैवतु ॥ दत्तःकुर्यात्तयोरेवनान्येषांतुकदाचन-
॥ अथान्येधिकारिणः ॥ पुत्रःपौत्रश्चतज्जश्चपुत्रिकापुत्रएवच ॥ पत्नीभ्रातायतज्जश्चापितामातास्नुषातथा ॥ भगिनीभा-

shrinath.udupa@gmail.com

गिनेयश्चसपिंडोधनहार्यपि ॥ एतेष्वभिहिताःकैश्चित्पूर्वाभावेपरःपरः ॥ अथानुपनीताधिकारः ॥ विश्वरूपे ॥ असं-
स्कृतेनपुत्रेणपत्न्यावापिसपिंडनं ॥ अग्निदाहःप्रकर्तव्योह्यन्यत्सर्वंप्रकल्पयेत् ॥ कुर्यादनुपनीतोपिमंत्रवत्पैतृमेधिकं ॥ यद्य
सौकृतचूडस्याद्यादिस्याच्चुत्रिवत्सरः ॥ कृतचूडस्तुकुर्वीतत्युदकंपिंडमेवच ॥ स्वधाकारंप्रयुंजीतवेदोच्चारंनकारयेत् ॥
कृतचूडोनोपनीतःपित्रोःश्रात्धंसमाचरेत् ॥ उदाहरेत्स्वधाकारंनतुवेदाक्षराण्यसौ ॥ मनुः ॥ नह्यस्मिन्यूज्यतेकर्मकिंचि
दामौंजिबंधनात् ॥ नाभिव्याहरयेद्ब्रह्मस्वधानिनयनादृते ॥ स्वधानिनयनंप्रेतकार्यमित्यर्थः ॥ पुत्रेसतिनिषेधः ॥ पुत्रे
षुविद्यमानेषुनान्योवैकारयेत्स्वधां ॥ अनुकल्पेदपुत्रस्यश्रात्धंकुर्यात्सनाथकं ॥ प्राणत्यागोभवेद्यत्रतीर्थेवास्वगृहेपिवा ॥
प्रेतकार्याणितत्रैवकुर्यादन्यत्रनैवतु ॥ अथपुत्रविषये ॥ पत्नीकुर्यादपुत्रस्यपुत्रिकापुत्रएववा ॥ कनीयान्भ्रातृजोवापिपू
र्वाभावेपरःपरः ॥ अथवपनविधिः ॥ आचार्यः ॥ निषेधेसत्यपिक्षौरंपित्रोरेवमृतेहनि ॥ वापयेयुःसुताःपित्रोर्मरणश्र
वणेपिच ॥ संवर्तः ॥ गंगायांभास्करक्षेत्रेमातापित्रोर्मृतेहनि ॥ आधानेयज्ञकालेचषट्सुचैवपनंस्मृतं ॥ सेतुबंधश्चगोकर्ण
निवृत्तिःश्रीगिरिस्तथा ॥ विरूपाक्षस्तथाकाशीक्षेत्रंभास्करसंज्ञितम् ॥ मातामहपितृव्याणांमातुळाग्रजयोर्गुरोः ॥ श्वशुराचार्य
योःस्वामीपत्न्योर्वापीपितृष्वसुः ॥ मातृष्वसुर्भगिन्याश्चत्युपाध्यायस्यचैवाहि ॥ एषांकेचिद्बुधाःप्राहुर्गर्भवानपिवापयेदिति
कर्मकतृविषयं ॥ तथाचव्याघ्रः ॥ विभक्तावाविभक्तावापित्रोस्तुमरणेसुताः ॥ वपनंकुर्युरन्येषांकुर्यात्कर्तासयोभवेत् ॥
॥ अथप्रथमेहनिकर्ता ॥ सगोत्रोवान्यगोत्रोवायादिस्त्रीयादिवापुमान् ॥ प्रथमेहनियोदद्यात्सदशाहंसमापयेत् ॥ अस्थि

shrinath.udupa@gmail.com

संचयनात्पूर्वंपुत्रोयदिसमागतः ॥ तदादिसकलंकर्मपुत्रःकुर्याद्यथाविधि ॥ दहनाग्निविचारः ॥ स्मृतिसारे ॥ दहनंचाहिताग्नेस्तुकुर्यात्तेनाग्निनासुतः ॥ अनाहिताग्निविधिवद्दहेदौपासनाग्निना ॥ विधुरंविधवांचैवदहेत्प्रेतंकुशाग्निना ॥ ॥ यतिप्रस्थौकपालाग्नौतुपाग्निर्बालकन्ययोः ॥ आश्वलायनः ॥ आत्मारोपशरीरस्थनविनश्यतिपावकः ॥ ॥ शवदेहेथनष्टेपिदक्षिणःपाणिरास्तिचेत् ॥ लौकिकाग्निस्छापयित्वापाणिंपुत्रेजपेद्यजुः ॥ उपावरोहजातेतितूष्णींमानौन यातिसः ॥ स्याद्ब्रादशगृहीतेनतूष्णींतुजुहुयाद्धृतं ॥ हस्तस्छादप्रपद्येतप्रेतमाद्यंतिविक्रियाः ॥ स्नानंप्रेतस्यपुत्राद्यैर्वस्त्राद्यैः पूजयेत्ततः ॥ नग्नदेहंदहेन्नैवकिंचिदेयंपरित्यजेत् ॥ प्रमादादग्निविच्छित्तिःपत्नीवेत्स्यात्वसंन्निधौ ॥ प्रेतस्यदहनंकुर्यात्कथं पुत्रोथवान्यजः ॥ प्रायश्चित्ताहुतीर्हुत्वापक्षेहोमाहुतीरपि ॥ दहेत्प्रेतंततःपुत्रस्तेनवौपासनाग्निना ॥ द्विपत्न्यसंसृष्टाग्निविधिः ॥ नभवेदग्निसंयोगःपत्न्योर्जेष्ठकनिष्ठयोः ॥ ज्येष्ठायादिमृतापूर्वमग्निहोत्रेणतांदहेत् ॥ पूर्वमेवहियाभार्याकानिष्ठायादिवामृता ॥ निर्मथ्याग्निंदहेत्तेनवन्हिनाविधिवच्चतां ॥ भार्ययोरग्निसंयोगजातेज्येष्ठकनिष्ठयोः ॥ यदिकाचिन्मृताभार्या दाहस्तस्याःकथंभवेत् ॥ संसृष्टाग्निंविभज्याथदक्षिणोत्तरयोरपि ॥ ज्येष्ठायादक्षिणोभागःकनिष्ठायास्तथोत्तरः ॥ बहवोयदिभार्याश्चेत्भागास्युस्तादृशाअपि ॥ यस्याएवयथाभागस्तंतंभागंवियोजयेत् ॥ दाहादिकर्मकुर्वीतमंत्रवत्पतुमेधिकं ॥ प्रथमेहनियःपुत्रःसदशाहंसमापयेत् ॥ अथनवश्राद्धानि ॥ प्रथमेन्हतृतीयेन्हिपंचमेसप्तमेतथा ॥ नवमैकादशेचैवनवश्राद्धंप्रकीर्तितं ॥ यदिरात्रौभवेत्तस्यसमाप्तिर्दहनस्यचेत् ॥ परेहन्युदितेसूर्येकार्यास्तस्योदकक्रियाः ॥ तिलोदकंतथापिंडानवश्रा

shrinath.udupa@gmail.com

द्धानियानिच ॥ नकुर्याद्रात्रौसंध्यायांयदिस्यान्निष्फलभवेत् ॥ उत्तरायांशिलापात्रंकर्तृद्रव्यविपर्यये ॥ पूर्वदत्तांजलिंदद्या
त्पिंडांश्चापितथैवतु ॥ तत्रमध्येदर्शेविचारः ॥ पित्रोराशौचमध्येतुयादिदर्शःसमागतः ॥ तावदेवोत्तरंतंत्रंपर्यवस्यत्यथेहा
त्परं ॥ अंतर्दशाहेदर्शश्चेत्तत्रसर्वंसमापयेत् ॥ पित्रोस्तुयावदाशौचंदद्यात्पिंडांस्तिलांजलीन् ॥ दशाहमध्येदर्शश्चेत्पिंडदा
नंतिलोदकं ॥ औरसःप्रयहंदद्यान्नचदर्शेसमापयेत् ॥ प्रागूर्ध्ववाऽन्यहादर्शेदशाहमध्येऔरसः ॥ पितरौतुविनान्येषांदर्शे-
चैवसमापयेत् ॥ दशाहमध्येयादिदर्शआगतेदद्यादशाहेतिलवारिपिंडान् ॥ पुत्रीसुतोदत्तकऔरसोवाशेषाःसुतास्तत्रसमापये-
युः ॥ देशांतरास्थितैपुत्रैःक्रियाःकार्यायथाविधि ॥ विभक्तैर्वाविभक्तैर्वासंयुक्तैर्दहनांविना ॥ दशाहाभ्यंतरेपित्रोर्मरणंश्रू
यतेयदि ॥ पुत्रेणैवाथवान्येनमंत्रवद्वन्हिदग्धयोः ॥ प्रेतशब्देनशिष्टास्युःकर्तव्यंषोडशादिकं ॥ सपिंडीकरणंचैवयथाका
लसमुद्भवं ॥ मंत्राग्निनैवदग्धस्यपिंडदानोदकंक्रियाः ॥ नकृतास्युःप्रमादाद्वादशाहाभ्यंतरेयदि ॥ अथैकस्मिन्दिनेकर्म
यदाकर्तुमुपक्रमेत् ॥ पिंडोदककक्रियाःकार्याश्चाशौचंदहनंविना ॥ अथास्थिसंचयनं ॥ कुजसंदार्कशुक्रेषुगुरौनंदात्रिपाद-
भे ॥ पूर्वोत्तरापुष्यहस्तेनास्थिसंचयनंचरेत् ॥ त्रिपुष्करं ॥ त्रिपदभतिथिर्भद्राजायतेवासरेगुरौ ॥ रवौभौमेचमुनिभिः
प्रोक्तंतत्त्रिपुष्करं ॥ नंदाभद्राकामभूतभौमार्करविजेगुरौ ॥ शुक्रेमघायांरोहिण्यांपंचकेद्वित्रिपादभे ॥ भनत्रयंमेतदाह
मस्थिसंचयनंतथा ॥ नकुर्याद्यदिचेदाहंकृतंदानंप्रदापयेत् ॥ विशाखायाम्यदितिषुपुष्येपूर्वोत्तरात्रये ॥ हस्तेत्वासवेचै
वपुष्येसंचयनंयदि ॥ भद्रेतुभूमिदानंस्याद्धेमदानंत्रिपादभे ॥ वारेतथादिदैवत्येवासोदानंविधीयते ॥ विभक्तैरपिप्रेतस्य

shrinath.udupa@gmail.com

श्राद्धमेकमेवकार्यं ॥ तदुक्तमनंताचार्यैः ॥ विभक्तावाविभक्तावाकुर्युश्राद्धमदैवतं ॥ मवालुचततोन्यत्रनाधिकारःपृथग्विधः ॥ अदैवतंनवश्राद्धादिषोडशांतं ॥ नवश्रात्थंसपिंडंचश्राद्धाण्यपिचषोडश ॥ एकेनैवतुकार्याणिसंविभक्तधनेष्वपि ॥ ॥ तथाचमनुः ॥ वृषोत्सर्गसुतःकुर्यात्पित्रोश्चैकादशेहनि ॥ अथवापुण्यकालेतुविधिनावृषमुत्सृजेत् ॥ वृषोत्सर्गसुतोमातुः कुर्यादेकादशेहनि ॥ सहोमंविधिवच्चैवापितर्यपिचजीवति ॥ पतिमत्याःसपुत्रायावृषोत्सर्गसमापयेत् ॥ इतिकेचिद्वदंत्यन्येनकार्यइतिकेचनेतिवृषोत्सर्गः ॥ अथाद्यश्रात्थं ॥ असपिंडक्रियाकर्मद्विजातेःसंस्थितस्यच ॥ अदैवंभोजयेच्छ्राद्धंपिंडमेकंच निर्वपेत् ॥ आद्यश्राद्धमशुद्धोपिकुर्यादेकादशेहनि ॥ कर्तुस्तात्कालिकीशुद्धिरशुद्धःपुनरेवसः ॥ ब्राह्मणंभोजयेदाद्यहोतव्यमनलेपिच ॥ पुनश्चभोजयेद्विप्रद्विरावृतिर्भवेदिति ॥ आद्यादिषोडशश्राद्धंकुर्यादेकादशेहनि ॥ एकोदिष्टविधानेन देवहीनंतुतद्भवेत् ॥ आद्यश्राद्धंनकुर्वीतमोहादेकादशेहनि ॥ दाहादिसकलंकर्मपुनःकुर्याद्यथाविधि ॥ सपिंडीकरणं यावत्तावत्स्यादेकमेवहि ॥ विभक्तैर्वाविभक्तैर्वाकार्यमेतत्क्रियादिकं ॥ अथसपिंडीकरणं ॥ सपिंडीकरणंकुर्यात्सदैवंद्वादशेहनि ॥ तदभावेत्रिपक्षादौद्व्यथचैकादशेहनि ॥ मृतेपितरियस्याथविद्यतेचपितामहः ॥ तेनदेयास्त्रयःपिंडाःप्रपितामहपूर्वकं ॥ त्रयाणामपिपिंडानामेकेनापिसपिंडने ॥ पितृत्वमश्नुतेप्रेतइतिधर्मोव्यवस्थितः ॥ पितुःपुत्रेणकर्तव्यंपित्रापुत्रस्यनकचित् ॥ यदिस्नेहेनवाकुर्यात्सपिंडीकरणंविना ॥ अथव्युत्क्रमः ॥ गालवः ॥ व्युत्क्रामाद्यचसापिंड्यंवियोगाद्यच्चकारितं ॥ तत्सापिंड्यंपुनःकुर्याद्व्युत्क्रमाद्यच्चतत्सुतः ॥ पितामहेजीवतिपिताचेन्मृतःसव्युत्क्रमः ॥ पुत्राभावेशाकलः ॥

shrinath.udupa@gmail.com

॥ पुत्राभावेस्वयंपत्नीस्वभर्तृणाममंत्रकं ॥ सपिंडीकरणंकुर्यात्ततःपार्वणमेवच ॥ गालवः ॥ अपुत्रेसंस्थितःकर्तानभवेच्छ्राद्धकर्मणि ॥ तत्रपत्न्येवकुर्वीतसापिंड्यंपार्वणंतथा ॥ पार्वणमितिसर्वत्रत्रिपुरुषोद्देशश्राद्धमित्यर्थः ॥ आचार्यः ॥ ॥ अपुत्रायांमृतायांतुपतिःकुर्यात्सपिंडनं ॥ श्वश्रादिभिःसहैवास्याःसपिंडीकरणंभवेत् ॥ स्मृतिसारे ॥ अपुत्रायोषितःपिंडंभर्तृपिंडेनियोजयेत् ॥ पत्यौजीवतिचेद्यस्याःश्वश्रादिषुनियोजयेत् ॥ कालादर्शे ॥ पत्न्याःकुर्यादपुत्रायापतिर्मात्रादिभिःसह ॥ सापिंडमनुयातेतुजनकेनसहात्मजः ॥ अथानुगमनेबौधायनः ॥ पिंडत्वनुगतायाश्चभर्तुःपिंडेनयोजयेत् ॥ प्राक्प्रत्यग्विभजेद्वैधात्त्रैकैकंविभजेद्त्रिधा ॥ प्राग्भागात्पितृपिंडेपुसंयोज्याविधिवत्ततः ॥ प्रत्यग्भागांस्तथामातृपिंडेषुचयथाक्रमं ॥ ॥ कृतेपिंडादिसापिंड्येमातुःश्राद्धंपृथग्विधाः ॥ अष्टकादौतथामातुःपितामह्यादिभिःक्रमात् ॥ अथब्रह्मचारीसपिंडीकरणं ॥ गोभिलः सपिंडीकरणंकेचित्कथंस्यात्ब्रह्मचारिणः ॥ वस्वादिपितृरूपेपुयोजयेत्ब्रह्मचारिणं ॥ अथासन्निधानेज्येष्ठसपिंडनाविचारः ॥ गोभिलः ॥ ज्येष्ठःसपिंडनंकुर्याद्दशाहेनुजैःसह ॥ यदिचेत्सन्निधौनस्यात्संनिधिस्छोनुजोपिवा ॥ व्याघ्रः ॥ ज्येष्ठेनवाकनिष्ठेनकृतंचेदौरसेनयत् ॥ सगुणंस्यात्सापिंडांतमन्येनकृतमन्यथा ॥ आचार्यः ॥ दशाहाच्चेद्भहिःपित्रोर्मरणंश्रूयतेयदि ॥ कृत्वासौवपनंदद्यादर्भग्रंथौतिलोदकं ॥ नोत्तरीयंपिंडदानंनवश्राद्धंनवेदिका ॥ नैवं कुर्याच्छिलांपात्रंकृतेयस्यसपिंडने ॥ पितृशब्देनतच्छ्राद्धंकुर्यादेकादशेहनि ॥ सपिंडीकरणंनामतंत्रंपार्वणवद्भवेत् ॥ ॥ संवर्तः ॥ यवीयसाकृतेश्राद्धेसपिंडीकरणेयदि ॥ कनिष्ठेनापिकर्तव्यंसपिंडीकरणंपुनः ॥ कृतेकनीयसावापिश्राद्धेयस्यस

shrinath.udupa@gmail.com

पिंडने ॥ ज्येष्ठोपिहिसुतःकुर्यात्सपिंडीकरणंपुनः ॥ सपिंडीकरणंनामश्राद्धंपार्वणवद्भवेत् ॥ अर्घ्यसंयोजनंचैवपिंडसंयोजनं नच ॥ द्वितीयादीनिसर्वाणिमासिकान्यपिकारयेत ॥ निवर्त्यसकलंप्रेतकर्मकालांतरेपिचेत् ॥ ऊनादीनिचवर्षाणिमासिका न्यपिकारयेदितिप्रेतकर्माकृतविषयं ॥ अथासंनिधानपुत्रविषये ॥ शाकलः ॥ पित्रोर्मरणकालेतुनचेत्स्यात्सन्निधौसुतः ॥ अन्यःकुर्यादशाहांतंनतुसर्वकदाचन ॥ तथाचस्मृतिः ॥ देशांतरस्थौपितरौश्रुतौचेदन्योनकुर्यात्सकलंचपैतृकं ॥ दाहंविना चाथतिलोदकादिज्येष्ठस्तुकुर्यादनुजैःसपिंडनं ॥ कौशिकः ॥ पुत्रंविनाकृतेन्येनदाहादिप्रेतकर्माणि ॥ प्रेतकर्मपुनःकुर्या-दौरसोदहनंविना ॥ गोभिलोपि ॥ अन्येनकेनचित्पित्रोःकृतेपिहिसपिंडने ॥ विनादाहंपुनःकर्मज्येष्ठःकुर्यात्सहानुजैः॥ ॥ अनुमासिकं ॥ सपिंडीकरणंश्रात्वंकृत्वास्यादूनमासिकं ॥ नशोधयेदिनंतत्रव्याघ्रस्यवचनंयथा ॥ विधवायाश्चपुत्राया जीवपत्न्यास्तथैवहि ॥ मासिकानिव्रतस्थस्यनैवोर्ध्वस्युःसपिंडनात् ॥ व्रतस्थोब्रह्मचारी ॥ त्रिपक्षेद्वादशेपक्षेचतुर्विंशति पक्षके ॥ पक्षत्रिपंचकेचैवह्यंतमध्यादिपंचके ॥ स्मृतिः ॥ ऊनंस्याद्वादशाहेथत्रिपक्षैकादशेदिने ॥ षष्ठाहेद्वादशेपक्षेप-क्षादौचतुर्विंशके ॥ ऊनंत्रैपक्षिकंचैवत्यूनषण्मासिकंतथा ॥ ऊनाब्दंप्रतिमासेथकुर्याच्छ्राद्धानिषोडश ॥ प्रतिमासेमृताहेतु यावत्संवत्सरंभवेत् ॥ तावदेवहिकुर्वीतश्राद्धंमासिकसंज्ञिकं ॥ सपिंडीकरणादूर्ध्वसदैवंपार्वणेनतु ॥ मृताहेमासिकंकुर्यात्प्र तिमासेतुवत्सरं ॥ अपकृष्याथवोत्कृष्यमासिकान्येवकारयेत् ॥ त्रीणिचैवार्घ्यपात्राणिपिंडांस्त्रीनेवनिर्वपेत् ॥ सपिंडीक रणादूर्ध्वंयानिश्राद्धानिषोडश ॥ स्वस्वकालेस्युरूनानिनान्यथाद्यंविनैवतु ॥ प्रथमाब्दैकर्तव्यं ॥ दर्शश्राद्धंगयाश्राद्धंश्रा-

shrinath.udupa@gmail.com

त्थंचापरपक्षिकं ॥ प्रथमोद्धेतुकुर्वीतसपिंडीकरणेकृते ॥ नित्यनैमित्तिकंश्राद्धंतीर्थश्राद्धादिकंचयत् ॥ सपिंडीकरणादू
र्ध्वंपुत्रःकुर्याद्यथाविधिः ॥ सपिंडीकरणोर्ध्वमेकोद्दिष्टमेकोद्दिष्टविधानं ॥ निर्णयार्णवे ॥ सपिंडीकरणादूर्ध्वंपार्वणंयत्प्र-
दीयते ॥ भ्रात्रेभगिन्यैःपुत्रायस्वामिनेमातुलायच ॥ मित्रायगुरवेश्राद्धमेकोद्दिष्टंनपार्वणं ॥ एकोद्दिष्टंकनिष्ठानांज्येष्ठानां
पार्वणंस्मृतं ॥ माधवीये ॥ एकमुद्दिश्ययच्छ्राद्धमेकोद्दिष्टंप्रकीर्त्तितं ॥ त्रीनुद्दिश्यतुयच्चद्धिपार्वणंमुनयोविदुः ॥ पितृव्य
स्याप्यपुत्रस्यभ्रातुश्चैवाग्रजन्मनः ॥ मातामहानामप्येवंपार्वणंश्राद्धमाचरेत् ॥ एकमातृप्रसूतानामेकश्चेत्पुत्रवान्भवेत् ॥ सर्वे
तेनैवपुत्रेणपुत्रिणोमनुरब्रवीत् ॥ प्रतिसंवत्सरंकार्यमातापित्रोर्मृतेहनि ॥ पितृव्यस्याप्यपुत्रस्यभ्रातुर्ज्येष्ठस्यचैवाहि ॥ सपि
डीकरणादूर्ध्वमेकोद्दिष्टंभवेद्यदि ॥ सदैवंभोजयेच्छ्राद्धंपिंडमेकंतुनिर्वपेदितिकश्चिदेशाचारः ॥ अथसंवत्सरविमोकश्राद्धं ॥
॥ तत्राहवृद्धशौनकः ॥ अद्वस्यांतेविमोकाख्यंश्राद्धंप्रथमवत्सरे ॥ कुर्यात्पार्वणवच्चैवव्याघ्रस्यवचनंयथा ॥ संवत्सरवि
मोकाख्यमकृत्वाप्रथमाब्दिकं ॥ यःश्राद्धंकुरुतेमोहात्कृतंप्राकर्मनिष्फलं ॥ प्राकर्मप्रेतकार्यादिकमित्यर्थ ॥ यःकरोतिवि
नापुत्रंश्राद्धंविमोकसंज्ञिकं ॥ मृतश्चेद्यदिकर्तास्यश्राद्धलोपोभवेदिह ॥ पित्रोश्राद्धंविनामातुःसपत्न्याअपिलुप्यते ॥ तन्न
कर्तव्यमन्येननष्टेकर्तरिवैयादि ॥ पित्रोश्राद्धंविनान्येषांनकुर्याच्छ्राद्धमेवाहि ॥ कर्तामृतश्चेज्ज्येष्ठस्यादनुजैःकार्यमेवंतु ॥ पि-
त्रोःश्राद्धंविनान्येषांयदिस्नेहेनपार्वणं ॥ एकोद्दिष्टंभवेद्वापिपिंडदानंकृताकृतं ॥ अथपितामहश्राद्धं ॥ पितामहस्ययच्छ्रा
द्धंषोडशादिसपिंडनं ॥ अपुत्रस्यतुकर्तव्यंपौत्रेणप्रथमाब्दिकं ॥ पृथक्प्रसाब्दिकंतस्यवर्षेवर्षेनतद्भवेत् ॥ पित्रासहैवतच्छ्रा

shrinath.vdupa@gmail.com

त्यंवत्सरादौभवेत्पितुः ॥ तथाचस्मृतिः ॥ पितामहःपितुःपश्चात्पंचत्वंयदिगच्छति ॥ पौत्रेणैकादशाहादिकर्तव्यंश्राद्धषो
डशं ॥ नतत्पौत्रेणकर्तव्यंपुत्रवांश्चेत्पितामहः ॥ पितुःसपिंडनंकृत्वाकुर्यान्मासानुमासिकं ॥ अथविभक्तश्राद्धं ॥ तत्रा-
नंताचार्यः ॥ विभक्तास्तुपृथक्कुर्युःप्रतिसंवत्सरादिकं ॥ एकेनैवाविभक्तेपुकृतंसर्वैस्तुतत्कृतं ॥ भ्रातृणामविभक्तानामे
कोधर्मःप्रवर्तते ॥ विभागेसतिधर्मोपिभवेदेषांपृथक्पृथक् ॥ सर्वैरनुमतंकृत्वाज्येष्ठेनैवतुयत्कृतं ॥ द्रव्येणैवाविभक्तेनसर्वैरे-
वकृतंभवेत् ॥ तथाचस्मृतिः ॥ पित्रोःश्राद्धंपृथक्कुर्युःसंविभक्ताधनेनच ॥ एकत्रयदिकुर्वीरन्पतितास्युर्नसंशयः ॥ अवि
भक्तश्राद्धं ॥ सापत्न्यभ्रातरःकुर्युरविभक्ताःपृथक्पृथक् ॥ अमावास्यादिकंचैवपितुःप्रत्याब्दिकंविना ॥ संग्रहे ॥ अ-
विभक्ताःसुताःपित्रोरेकःकुर्यान्मृताह्निकं ॥ देशांतरेपृथक्कुर्युर्दर्शश्राद्धानुमासिकं ॥ ग्रामांतरंव्रजेयुश्चेदविभक्ताःसुतायदि ॥
॥ दर्शंचमासिकंश्राद्धंकुर्युःपित्रोःपृथक्पृथक् ॥ अविभक्ताःपृथग्ग्रामास्वस्वार्जितधनाशनाः ॥ कुर्युस्तेभ्रातरःश्राद्धंमाता
पित्रोःपृथक्पृथक् ॥ अथमृताहविषयेस्मृतिः ॥ अज्ञानाद्वाप्रमादाद्वायोमृताहमतिक्रमेत् ॥ श्वानयोनिशतंगत्वाचांडालः
स्यात्पुनःपुनः ॥ रजस्वलायांभार्यायांमृताहंयःपरित्यजेत् ॥ सनरोनरकंयातियावदाभूतसंप्लवं ॥ तथाच ॥ मृतस्यवा
थकर्तुर्वायदिभार्यारजस्वला ॥ योतिक्रमेन्मृताहंतुरौरवंनरकंव्रजेत् ॥ आब्दिकेसमनुप्राप्तेयस्यभार्यारजस्वला ॥ पंचमेह
नितच्छ्राद्धंनतुकुर्यान्मृतेहनि ॥ भार्याकर्त्रीचेत्ताद्विषयं ॥ स्मृतिः ॥ अपुत्रातुयदाभार्यासंप्राप्तेभर्तुराब्दिके ॥ रजस्वला
भवेच्छ्राद्धंकुर्यात्तत्पंचमेहनि ॥ अथान्नश्राद्धविधिः ॥ सपिंडंयासिकंचैवह्यमावास्यादिकंचयत् ॥ अन्नेनैवतुकर्तव्ययस्य-

shrinath.udupa@gmail.com

भार्यारजस्वला ॥ अपत्निकःप्रवासीस्याद्यस्यभार्यारजस्वला ॥ सित्वान्नेनैवकुर्वीतपित्रोःप्रथमाब्दिकादिकं ॥ श्राद्धविघ्ने
द्विजातीनामामश्राद्धंप्रकीर्तितं ॥ अमावास्यादिनियतंमाससंवत्सराद्ते ॥ अथामश्राद्धं ॥ आपद्यनग्नौतीर्थेचप्रवासेपुत्र-
जन्मनि ॥ आमश्रात्थंद्विजःकुर्यात्पित्रोःप्रथमाब्दिकंविना ॥ तीर्थेनग्नौप्रवासेचश्रात्थमन्नेनकारयेत ॥ अमावास्यादिकंश्रै
वकेचिदेवंवदंतिहि ॥ सित्वान्नेतुविधिर्यःस्यादामश्राद्धेप्ययंविधिः ॥ आवाहनादिसर्वस्यात्पिंडदानंतथैवच ॥ दद्याद्यत्र
द्विजातिभ्यःश्रुतंवाश्रुतमेववा ॥ तेनाग्नौकरणंकुर्यात्पिंडस्थानेतुनिर्वपेत् ॥ अन्नाख्यंभोजनांगंतुयत्कर्मविकिरंतथा ॥ उच्छि
ष्टभागिनांभागमामश्रात्थेविवर्जयेत् ॥ स्मृत्यंतरे ॥ आमश्रात्थंयदाकुर्यात्पिंडदानंकथंभवेत् ॥ गृहपाकात्समुद्धृत्यसक्तुभिः
पायसेनवा ॥ अथहिरण्यश्रात्थं ॥ अन्नाभावेद्विजःकुर्याच्छ्राद्धमामेनवैयतः ॥ तदभावेहिरण्येनअदैवंपार्वणेनतु ॥
॥ अन्नाद्विगुणमामंस्यात्थिरण्यंचचतुर्गुणं ॥ तदभावात्ततस्तस्यपर्याप्तंवापिकारयेत् ॥ अथविधिः ॥ संकल्पंसू-
क्तपठणंद्विजाश्चनियमांस्तथा ॥ भाजनासादनंचैवह्यग्नौकरणमेवच ॥ आवाहनार्घ्यविकिरंपदक्षिणापितृस्तुतिः ॥
॥ विसर्जनाछादनेचेहमश्रात्थेविवर्जयेत् ॥ अथैकस्मिन्दिवसेश्रात्थानि ॥ एककालेगतासूनांबहूनामथवा-
द्वयोः ॥ तंत्रेणश्रपणंकुर्याच्छ्रात्थंचैवपृथक्पृथक् ॥ भवेद्यदिसपिंडानांयुगपन्मरणंतथा ॥ संबंधासक्तिमा
लोक्यव्युक्रमाच्छ्राद्धमाचरेत् ॥ कृत्वापूर्वमृतस्यादौद्वितीयस्यततःपुनः ॥ कुर्यात्पश्चात्तृतीयायसन्निपातेष्वयंक्रमः ॥
॥ अशक्तविषयेउक्तमेतत् ॥ ननुशक्तविषये ॥ श्राद्धद्वयंनकुर्वीतपाकेनैकेनकश्चन ॥ यदियःकुरुतेमोहाच्छ्राद्धं

shrinath.udupa@gmail.com

तस्यवृथाभवेत् ॥ शक्तौसत्यांपृथक्कुर्यात्पृथक्पाकेनवैक्रमात् ॥ निर्वृत्तैकंपुनःकुर्यादर्चयित्वाथवाभवेत् ॥ पित्रोःश्राद्धेतुसं प्राप्तेनचेत्पर्युषितेपिवा ॥ पितृपूर्वंसुतःकुर्यादन्यत्रासनियोगतः ॥ अथसहगमनं ॥ एकाचित्यांसमारूढौदंपतीनिधनंगतौ ॥ ॥ तयोःश्राद्धंपृथक्कुर्यादेकस्मिन्काल्एवतु ॥ पृथक्पाकेनवैश्राद्धंपित्रोरपिपृथक्पृथक् ॥ वैश्वदेवादिकंसर्वंपृथगेवविधीयते ॥ वैश्वदेवादिकमितिविश्वेदेवार्घ्यौकरणपिंडविकिरादिकमित्यर्थः ॥ स्मृत्यंतरे ॥ निमंत्र्यादौपितुःश्राद्धेदैवेपित्र्येचवैद्विजान् ॥ निमंत्रयेत्ततोमातुःश्राद्धेविप्रान्यथाक्रमं ॥ प्रक्षाल्यपैतृकेपादौद्विजानामथमातृके ॥ उपक्रमेदर्चनांतमेवं स्यान्मातृकेपिच ॥ अथैकास्मिन्दिनेश्राद्धद्वयंनिषिद्धं॥सुधार्णवे ॥श्राद्धंकृत्वातुतस्यैवपुनःश्राद्धंनतादिने ॥ नैमित्तिकंतुकर्तव्यंनिमित्तानुक्रमोदयं ॥ श्रात्यंकृत्वापुनःश्रात्यंनकुर्यादेकवासरे ॥ यदिनैमित्तिकंनस्याद्देकोद्देशेभवेद्यदि ॥ द्वेवहूनिनिमित्ता निजायेरन्नेकवासरे ॥ नैमित्तिकानिकार्याणिनिमित्तोत्पत्यनुक्रमात् ॥ श्राद्धंस्यादेकदैवत्यमेकमुद्दिश्यवैयदि ॥ श्राद्धद्वयंनकर्तव्यमेकस्मिन्नेववासरे ॥ कालादर्शे ॥ नित्यदार्शिकयोश्चोदकुंभमासिकयोरपि ॥ दार्शिकस्ययुगादेश्चदार्शिकाल भ्ययोगयोः ॥ दार्शिकस्यचमन्वादेःसंप्राप्तेश्राद्धकर्मणि ॥ प्रसंगादितरस्यापिसिद्धेरुत्तरमाचरेत् ॥ नित्यश्राद्धदार्शिक युगमन्वाद्यलभ्ययोगेषुषट्पुरुषात्मकमेकदैवत्यंभवति ॥ उदकुंभमासिकयोःप्रत्याब्दिकेत्रिपुरुषात्मकमेकदैवत्यंतस्मादे तादृशंश्राद्धद्वयंत्रयंवानकर्तव्यमित्यर्थः ॥ देवताभेदेसतिश्राद्धत्रयंवाकर्तव्यमेव ॥ तत्रसएवाह ॥ नित्यस्यचोदकुंभस्यानित्यमासिकयोरापि ॥ दर्शस्यचोदकुंभस्यदर्शमासिकयोरापि ॥ नित्यस्यचाब्दिकस्यापिदर्शचाब्दिकयोरापि ॥ युगमन्वाब्दि

shrinath.udupi@gmail.com

कयोश्चमन्वाद्याब्दिकयोरपि ॥ प्रत्याब्दिकस्यचैवैत्यैकोद्दिष्टस्यैवाहितस्यच ॥ संपातेदेवताभेदाच्छ्राद्धयुग्मंसमाचरेत् ॥
॥ दर्शेप्रत्याब्दिकेप्राप्तेश्राद्धंस्यात्तत्रवैकथं ॥ आदौप्रत्याब्दिकंश्राद्धंकुर्यादर्शेततःपरंश्राद्धेसपिंडसंप्राप्तेपिंडहीनेतुवैयदि ॥
श्राद्धंकृत्वासपिंडंतुपिंडहीनमथाचरेत् ॥ सपिंडंपिंडसहितंश्राद्धमित्यर्थः ॥ प्रत्याब्दिकयदाश्राद्धंयुगमन्वंतरादिकं ॥ प्रा-
प्तंचेतच्चकुर्वीतनैवदर्शेयुगादिकं ॥ श्राद्धेनैवकृतेनेहबहुदैवत्यकेनच ॥ सिद्धिस्यादल्पदैवस्यश्राद्धस्यचाविनाब्दिकं ॥ अथ
श्राद्धमहिमा ॥ श्राद्धकालेषुसर्वेषुश्राद्धंकुर्वीतमानवः ॥ आयुःप्रजायशःकीर्तिःप्रजाश्रीश्चविवर्धते ॥ श्रद्धयाक्रियतेश्राद्ध
मन्नेनाच्छादनेनच ॥ दक्षिणावायथाशक्तिश्राद्धंचैवप्रशस्यते ॥ आकाशेतारकासंख्यातृणसंख्यामहीतले ॥ श्राद्धकाले
तुदानस्यपुण्यंवक्तुंनशक्यते ॥ सौवर्णंवायथारौप्यंतदभावेथताम्रजं ॥ तत्कालएवदत्तंचेतृप्यास्युःपितरोध्रुवं ॥ अज्ञा
नाद्वाप्रमादाद्वानास्तिकादथवायदि ॥ निराशाःपितरस्तस्यतत्कालेचेन्नदीयते ॥ अथामश्राद्धं ॥ दक्षिणाद्विगुणादेययायथाचा-
र्यायदीयते ॥ पितृयज्ञेपिदातव्यापितुस्थानविशेषतः ॥ यच्चसंकल्पितंद्रव्ययंदितस्मैनदीयते ॥ सयातिनरकंघोरंयावदाभूत-
संप्लवं ॥ सूतके ॥ श्राद्धेहनिक्षणेदत्तंसुसंकल्प्ययथाविधिः ॥ पादप्रक्षालनादूर्ध्वंविभाणांनास्तिसूतकं ॥ यदिस्यात्सू
तकंश्राद्धेपादप्रक्षालनादधः ॥ श्राद्धकर्मनकर्तव्यमित्येवंकौशिकोब्रवीत् ॥ ऋष्यशृंगः ॥ आब्दिकेचैवसंप्राप्तेह्याशौचंजा
यतेयदि ॥ आशौचेतूव्यतिक्रांतेतत्रश्राद्धंविधीयते ॥ व्याघ्रः ॥ पित्रोःप्रत्याब्दिकेप्राप्तेसूतकंयदिजायते ॥ निवृत्ते
सूतकेश्राद्धंकुर्यादेकादशेहनि ॥ तत्रापिकरणासंभवेदर्शेवाकुर्यात् ॥ दैवात्प्रत्याब्दिकश्राद्धेत्वंतराम्रियेतसूतके ॥ आशौचा

॥ ४२ ॥

shrinath.udupa@gmail.com

नंतरंकुर्यात्तन्मासेंदुक्षयेपिवा ॥ तदहश्चेत्प्रदुष्यतकेनचित्सूतकादिना ॥ सूतकानंतरंकुर्यात्पुनस्तदहरेववा ॥ मृता
हेनैभवेच्छ्राद्धंदैवात्प्रत्याब्दिकंयदि ॥ एकादश्यांचकृष्णायांकुर्याद्दर्शेतदान्हिवा ॥ गोभिलः ॥ प्रत्यब्देतुव्यतिक्रांतेप्र
मादात्कार्यमेवतत् ॥ दर्शाष्टम्यांचकृष्णायामेकादश्यांतदान्हिवा ॥ अथयदिमृताहमासोनज्ञायतेतद्विषये ॥ हेमाद्रौ ॥
॥ नज्ञायतेमृताहश्चेत्प्रोषितेसंस्थितेसति ॥ मासश्चेत्प्रतिविज्ञातस्तदर्शेस्यादथाब्दिकं ॥ श्राद्धविघ्नसमुत्पन्नेप्यविज्ञाते
मृतेहनि ॥ एकादश्यांतुकर्तव्यंकृष्णपक्षेविशेषतः ॥ यदामासोनविज्ञातोविज्ञातंदिनमेवतु ॥ तदाचापाढकेमासेमासेवात
दिनंभवेत् ॥ दिनमासानाविज्ञातौमरणस्ययदापुनः ॥ प्रस्थानमासदिवसैग्राह्यौपूर्वोक्तयादिशा ॥ अथब्रा
ह्मणाभावे ॥ पात्राभावेपरंकृत्वापितृयज्ञविधिंनरः ॥ निर्दिश्याप्यन्नमुद्धृत्ययत्रपात्रंततोनयेत् ॥ सर्वाभावेक्षिपे
दग्नौगवेदद्यात्तदप्सुच ॥ नतुप्राप्तस्यलोपोस्तिपैतृकस्याविशेषतः ॥ अथद्रव्याभावे ॥ अग्निनावादहेत्कक्षंश्राद्धकालेसमाग
ते ॥ तस्मिन्नुपवसेदन्हिजपेद्वाश्राद्धसंहितां ॥ सर्वाभावेवनंगत्वाकक्षामूलप्रदर्शकः ॥ सूर्यादिलोकपालानामिदमुच्चैःपठि
ष्यति ॥ नमेस्तिवित्तंनधनंनचान्यच्छ्राद्धोपयोगिस्वापितृन्नतोस्मि ॥ तृप्यंतुभक्त्यापितरौममैतौभुजौकृतौवर्त्मनिमारुतस्य ॥
॥ अथश्राद्धकालः ॥ याज्ञवल्क्यः ॥ अमावास्याष्टकावृद्धिःकृष्णपक्षेयनद्वयं ॥ द्रव्यंब्राह्मणसंपत्तिर्विषुवःसूर्यसंक्रमः ॥
॥ व्यतीपातोगजच्छायाग्रहणंचंद्रसूर्ययोः ॥ श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्रकीर्तिताः ॥ अथषण्णवत्यः ॥ अमायुगम
नुक्रांतिधृतिपातमहालयाः ॥ अन्वष्टकाश्चतिथयःषण्णवत्यःप्रकीर्तिताः ॥ षण्णवत्यइतिश्राद्धविशेषः ॥ अथश्राद्धदैवता-

shrinath.udupa@gmail.com

नि ॥ त्रिदैवसंमृताहेथपट्दैवसंतुदार्शिके ॥ वृत्थौतुनवदैवसंमष्टकासुतथैवच ॥ दर्शेनसेयुगादौचमन्वादौग्रहणेतथा ॥ ॥ संक्रांतिषुभरण्यांचषट्दैवसंविधीयते ॥ शातातपः ॥ नांदीमुखेष्टकाश्राद्धेगयायांचमृतेहनि ॥ मातुःश्रात्थंसुतःकुर्या दन्यत्रपतिनासह ॥ विश्वादर्शे ॥ मातुर्गयाष्टकावृत्थिमृताहेषुमहालये ॥ श्रात्थंकुर्यात्पृथक्दैवंतंत्रंवानुगतावापि ॥ अत्र काश्चिद्विशेषः ॥ प्रयोगसारे ॥ अष्टकासुचवृत्थौचगयायांचमृतेहनि ॥ चंद्रसूर्योपरागेतुव्यतीपातेमहालये ॥ मातुःश्रा द्धंपृथक्कुर्यादन्यत्रपतिनासह ॥ पितरोयत्रपूज्यंतेतत्रमातामहाअपि ॥ वृद्धौतुनवदैवसंपट्दैवसंतुदार्शिके ॥ महालयेग याश्राद्धेज्ञेयंद्वादशदैवतं ॥ प्रयोगसारे ॥ आषाढ्याःपंचमेपक्षेश्राद्धंकुर्यादिनेदिने ॥ उद्दिश्यनवदैवसमित्येवंमनुरब्रवीत् ॥ ॥ अथैकस्मिन्दिनेकुर्यात्सर्वानुद्दिश्ययत्नतः ॥ महालयात्मकंश्रात्थंतद्वयासदृशंभवेत् ॥ अथपिंडरहितश्राद्धानि ॥ हेमा द्रौ ॥ संक्रांतौग्रहणेपातेयुगमन्वंतरादिषु ॥ भरण्यांवापिकुर्वीतश्राद्धंपिंडैर्विनैवतु ॥ संग्रहे ॥ मन्वादौचयुगादौचग्रह- णेचंद्रसूर्ययोः ॥ संक्रांतिषुचसर्वासुश्राद्धंपिंडंविनाभवेत् ॥ पिंडहीनंतुयच्छ्राद्धंसंकल्पाख्यंप्रचक्षते ॥ तच्चापिहिद्विजःकु- र्यादित्येवंमुनयोब्रुवन् ॥ आवाहनार्घ्यपिंडांश्चविकिरोच्छिष्टपिंडकौ ॥ स्वधोक्तिमग्नौकरणंसंकल्पेसप्तवर्जयेत् ॥ अथश्रा- द्धेनियमः ॥ दंतधावनतांबूलक्षौराभ्यंगमभोजनं ॥ स्त्रीपरान्नंचश्राद्धकर्ताविवर्जयेत् ॥ अत्रकश्चिद्विशेषः ॥ आम श्रात्थेतथानित्येकाम्यश्राद्धेमहालये ॥ निषित्थंनैवतांबूलमितिशातातपोब्रवीत् ॥ दर्शेचापरपक्षेचक्रांतौमनुयुगादिषु ॥ ॥ श्राद्धंकृत्वाततोभुक्तांबूलंखादयेद्द्विजः ॥ यस्तुपितृष्वतृप्तेषुतांबूलंयदिखादयेत् ॥ भवेत्पुत्रःसपापिष्ठोनिराशाःपितरो

shrinath.kdupa@gmail.com

गताः ॥ श्राद्धकालेषुसर्वेषुश्राद्धकर्तातुयोद्विजः ॥ नकुर्यात्क्षारमध्यंगतथैवस्त्रीनिषेवणं ॥ अथापरपक्षः ॥ पारिजाते ॥
॥ कन्यागतेसवितरियान्यहानितुषोडश ॥ क्रतुभिस्तानितुल्यानितेषुदत्तमथाक्षयं ॥ अहःषोडशकंयत्तुशुक्लप्रतिपदासह ॥
चंद्रक्षयाविशेषेणसापिदर्शात्मिकास्मृता ॥ आदौमध्येवसानेचयत्रकन्यांव्रजेद्रविः ॥ सपक्षःसकलःपूज्यःश्राद्धषोडशकंप्रति
॥ नभस्यापरपक्षेतुश्राद्धंकुर्यादिनेदिने ॥ नैवनंदादिवर्जस्यान्नैववर्ज्याचतुर्दशी ॥ नभस्यापरपक्षेतुमृताहनिपितुर्यदि ॥
करोतितत्रयःश्राद्धंपितॄणामक्षयंभवेत् ॥ भरणीप्रेतपक्षस्यमहतीपरिकीर्तिता ॥ अस्यांश्राद्धंकृतंयेनसगयाश्राद्धकृत्भवेत् ॥
॥ नंदाभृग्वर्कभौमेषुचतुर्दश्यांत्रिजन्मसु ॥ एषुश्राद्धंनकुर्वीतगृहीपुत्रधनक्षयात् ॥ नित्यनैमित्तिकेकाम्येश्राद्धंयस्तुमघादि
षु ॥ दद्यात्तज्ज्येष्ठपुत्रस्यनाशस्यादितिनिश्चितं ॥ प्राजापत्येचपौष्णेचमघायांभार्गवेतथाः ॥ यस्तुश्राद्धंप्रकुर्वीतत्तस्यपुत्रो
विनश्यति ॥ मघायांचत्रयोदश्यांकन्यासंस्छेादिवाकरे ॥ पिंडदानंपरित्यज्यश्राद्धंतत्रविधीयते ॥ याज्ञवल्क्यः ॥ प्र-
तिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशीं ॥ शस्त्रेणतुहतायेतुतेभ्यस्तत्रप्रदीयते ॥ समत्वमागतस्यापिपितुःशस्त्रहतस्यच ॥ एको
दिष्टंसुतःकुर्याच्चतुर्दश्यांमहालये ॥ चतुर्दश्यांतुयच्छ्राद्धंसपिंडीकरणेकृते ॥ एकोद्दिष्टविधानेनतत्कुर्याच्छस्त्रघातिनां ॥ सपिं
डीकरणादूर्ध्वंमृतस्यावित्तुदादाभिः ॥ कुर्याद्भूतेप्रेतपक्षेत्वेकोद्दिष्टंसुतःपितुः ॥ निषिद्धानिपरित्यज्यतिथिवारादिकानिच ॥
॥ अथैकस्मिन्दिनेकुर्याच्छुभेवापिमहालयं ॥ पारिजाते ॥ अमावास्यांभरण्यांचद्वादश्यांपक्षमध्यके ॥ यथातिथिंचन
क्षत्रंवारंचनविचारयेत् ॥ अपुत्रोनग्निकश्चैवविधवाब्रह्मचारिणः ॥ दर्शेमहालयंकुर्युर्नकुर्यात्पुत्रवान्गृही ॥ अन्नाभावेद्विजा

shrinath.udupa@gmail.com

भावेतीर्थेचैवमहालये ॥ एकंवाप्याशयेद्विप्रमर्घ्यादिंपिडान्पृथक्पृथक् ॥ अथसन्यासिश्राद्धं ॥ स्मृत्यर्थसारे ॥ नकुर्यात्पार्वणादन्यत्ब्रह्मीभूतायभिक्षवे ॥ त्रिदंडग्रहणादेवमेतत्वंनैवजायते ॥ एकादशाहेसंप्राप्तेपुत्रःकुर्वीतसत्क्रियां ॥ दंडग्रहणमात्रेणनैवप्रेतोभवेद्यतिः ॥ अतःपुत्रेणकर्तव्यंपार्वणंतस्यसर्वदा ॥ एकोद्दिष्टंनकुर्वीतयतीनांचैवसर्वदा ॥ अहन्येकादशेतेषांपार्वणंतुविधीयते ॥ सपिंडीकरणात्तेषांनकर्तव्यंसुतादिभिः ॥ प्रतिमासितुकर्तव्यंमृताहेमासिकादिकं ॥ सन्यासिनोप्यब्दिकादिपुत्रःकुर्याद्यथाविधिः ॥ महालयेतुयच्छ्राद्धंद्वादश्यांपार्वणेनतु ॥ ब्रह्मनिष्ठेचसन्यस्तेपितर्युपरतेश्रुते ॥ सपिंडीकरणंनैवनाशौचंनोदकीक्रया ॥ अहन्येकादशेप्राप्तेपार्वणंतुविधीयते ॥ सपिंडीकरणंनैवकर्तव्यंतुसुतादिभिः ॥ सद्यःसन्यसनादेवप्रेतत्वंन्नैवजायते ॥ एकोद्दिष्टंनकर्तव्यंसन्यस्तानांकदाचन ॥ पार्वणंतुसदातेषामेषधर्मःसनातनः ॥ तत्रशौनकः ॥ ब्रह्मीभूतेचसन्यस्तेतातेचनिधनंगते ॥ नतस्यसूतकंकार्यसपिंडैस्तुसुतादृते ॥ ब्रह्मीभूतस्यतस्मात्तुकर्तव्यंनावशिष्यते ॥ दशाहेतुव्यतिक्रांतेपुत्रःकुर्यात्तुपार्वणं ॥ प्रत्यब्दंपार्वणंकुर्यादेषधर्मःसनातनः ॥ द्वादशाहमनुध्यायन्कुर्याच्छिष्यःसमाहितः ॥ असंस्कृतंविशीर्णंचयत्रदेशेकलेवरं ॥ धर्मलोपोभवेत्तत्रदुर्भिक्षंमरणादिकं ॥ उशनाः ॥ यतौमृतेचसंपन्नंनाशौचंनोदकक्रिया ॥ नदुःखंनैवशोकश्चज्ञातीनांगोत्रिणामपि ॥ वृषोत्सर्गोनदाहश्चविपन्नेस्याद्दुरौमृतौ ॥ सुतेनवपनंकार्यमितिबौधायनेस्मृतं ॥ अश्वत्थस्थापनंकार्ययतीनांमस्तकोपरि ॥ अश्वत्थस्थापितोयेनस्छापितोपिमहेश्वरः ॥ दर्शनात्स्पर्शनात्तस्यसर्वंनश्यतिपातकं ॥ कुटीचकंतुप्रदहेत्बहूदकंजलेक्षिपेत् ॥ हंसंचैवतुनिक्षिप्यपरहंसंविकीरयेदितिव्यासवचनं ॥

shrinath.udupa@gmail.com

श्राद्धांतएव ॥ तथाचस्मृतिः ॥ पित्र्यर्थंनिर्वपेत्पाकंवैश्वदेवार्थमेवच ॥ वैश्वदेवन्नपित्र्यर्थंनदर्शेवैश्वदेविकं ॥ सत्यव्रतः ॥ ॥ अग्नौकरणहोमंतुहुत्वाहुनेदशाहुतीः ॥ पृथक्पाकेनवैदर्शेविधिरेषउदाहृतः ॥ अग्नौकरणासंभवेविशेषमाह ॥ दर्शेवि-सर्जनादर्वागुत्तराचमनात्परं ॥ वैश्वदेवंततःकुर्यात्केचिदेवंवदंतिहि ॥ अनाहिताग्नेर्योदर्शेश्राद्धंकृत्वाविधानतः ॥ पितृ शेषेणवैकुर्याद्वैश्वदेवंततोद्विजः ॥ अथाहिताग्निविषयं ॥ पक्षांतकर्मनिर्वर्त्यवैश्वदेवंतुसाग्निकः ॥ पिंडदानंततःकुर्याततो-न्वाहार्यतेबुधः ॥ प्रत्यब्देमासिकेचैवश्राद्धंकृत्वाविधानतः ॥ तच्छेषेणैवकुर्वीतवैश्वदेवंद्विजोत्तमः ॥ चशब्दादष्टकादिष्व पिज्ञेयं ॥ मांडव्यः ॥ यद्येकस्मिन्नहन्येवश्राद्धानिस्युर्बहूनिचेत् ॥ कृत्वाश्राद्धानिसर्वाणिवैश्वदेवंचरेदपि ॥ अथदौहि त्रप्रतिपच्छ्राद्धं ॥ सत्यव्रतः ॥ मातामहोविपद्येतयदिचेत्पुत्रवानपि ॥ कुर्यान्मातामहश्राद्धंसपिंडंपार्वणेनाहि ॥ व्याघ्रः ॥ ॥ कुर्यान्मातामहश्राद्धंप्रतिपद्याश्विनेसिते ॥ सपितापिसपिंडंतुजीवत्यपिचमातुले ॥ दौहित्राख्यंचयच्छ्राद्धंकचिदेशेप्रचक्ष ते ॥ सर्वत्रनायमाचारोवदंतिमुनयोहितत् ॥ पुत्राभावेपत्न्यभावेपिबहुकर्तृविषयं ॥ आचार्यः ॥ पुत्रत्वेवहवोयस्यक र्तारोभातृजादयः ॥ यदिस्युःकेनकर्तव्याह्यपुत्रस्यचवैक्रिया ॥ एकएवतुकुर्वीतप्रत्यब्दंप्रेतकर्मच ॥ भ्रातृजोज्येष्ठएवापिस त्सुवैबहुकर्तृषु ॥ गर्गः ॥ ज्येष्ठश्चेत्संनिधौनस्यादनुजोवापिसत्क्रियां ॥ यःस्यात्प्रियतमोयस्यसोपिवाबहुकर्तृषु ॥ व्याघ्रः ॥ ॥ पुत्रत्वेभावितोयस्तुप्रियकारीचपालितः ॥ सएवकुर्यात्प्रसद्धंअपुत्रस्यचवैक्रियां ॥ इतिश्रीनारायणभट्टविरचितायांधर्म प्रवृत्तौनानाविधश्राद्धप्रकरणं ॥ अथाशौचविधिरभिधीयते ॥ जातकंमृतकंचैवद्विविधंसूतकंस्मृतं ॥ स्रावःपातःप्रसूति-

shrinath.udupa@gmail.com

श्चत्रिविधंजातकस्यतु ॥ मासत्रयेचतुर्थेचगर्भस्यस्त्रावइष्यते ॥ पातःस्यात्पंचमेषष्ठेप्रसूतिःसप्तमादिषु ॥ मासंख्यादिनं मातुःस्त्रावेसूतकमिष्यते ॥ स्नानेनैवविशुध्यंतिसपिंडाश्चापिवैपिता ॥ पातेमातुर्यथामासस्तावदेवदिनंभवेत् ॥ सूतकंतुसपिंडानांपितुश्चत्रिदिनंभवेत् ॥ प्रसूतौचैवसर्वेषांदशाहंसूतकंभवेत् ॥ क्षत्रियस्यद्वादशाहंविट्शूद्रौपक्षमासके ॥ त्रिदिनंयत्र विप्राणांक्षत्राणांस्याच्चतुर्दिनं ॥ विशांपंचादिनंतत्रशूद्राणांचदिनाष्टकं ॥ नालच्छेदनतःपूर्वजीवंजातोमृतोयादि ॥ मातुः पूर्णमथान्येषांपितुश्चात्रिदिनंसमं ॥ मृतस्यप्रसवेचैवंनालच्छेदनतःपरं ॥ मातुःपितुश्चसर्वेषांज्ञातीनांपूर्णसूतकं ॥ पूर्णामितिद शाहमित्यर्थः ॥ चतुर्थेदशरात्रंस्यापट्टनिशाःपुंसिपंचमे ॥ षष्ठेचतुरहाच्छुद्धिःसप्तमेपुदिनत्रयं ॥ आद्यंसपिंडेषुदशाहमुक्तंस होदकानांसुदिनत्रयंस्यात् ॥ सगोत्रजानांदिनमाप्लुतिर्वानलेपभाजंदुहितुश्चशावं ॥ मृतकंमृतकेनैवसूतकंसूतकेनच ॥ शावेनशुध्यतेसूतिःशावंसूत्यानशुध्यति ॥ सूतिरितिसूतकंस्रावमितिमृतकंचेत्यर्थः ॥ नतुल्यमधिकंजाताच्छावमल्पंभवेद्यदि ॥ शुध्यतेजातकेनैवतुल्येधिक्यंस्वकालतः ॥ जातसूतकान्नतुल्यन्नाधिकंतस्माज्जातकाच्छावं ॥ अल्पंयदिभवेज्जाताःसूतकेनै वशावंशुध्यतितुल्यंवाअधिकंवाशावंचेत्स्वकालेनैवशुध्यतीत्यर्थः ॥ तुल्यंकल्पेनशुद्धिस्यादल्पंचैवाधिकेनतु ॥ शुद्धिरल्पेनाधि कस्यनभवेत्तुकदाचन ॥ दशाहेस्तमयादर्वाक्द्वितीयंसूतकंभवेत् ॥ पूर्वेणसूतकेनैवद्वितीयंतुविशुध्यति ॥ रात्रौचेत्प्रथमेयामे द्वितीयंसूतकंभवेत् ॥ उर्ध्वंदिनद्वयंप्रोक्तमर्धरात्रादधोपिच ॥ अर्धरात्रादधोपिचेत्सूतकंतत्रापिदिनद्वयमेवेत्यर्थः ॥ तृतीयेप्र हरेवापियदिस्यात्सूतकंपुनः ॥ तदात्रिरात्रमाशौचंसर्वेषामेवनिश्चितं ॥ सूतकायायदाशौचंतथाचैवाग्निदस्यतु ॥ मृतस्य

shrinath.udupa@gmail.com

॥ अथश्राद्धेब्राह्मणानियमाः ॥ कारिका ॥ शुचीनिमंत्र्यद्वौदैवेत्रीन्विप्रान्पितृकर्माणि ॥ दैवेपित्र्येथवैकैकंसपिंडीकरणंविना ॥ बृहत्पराशरः ॥ प्राङ्मुखौदैविकौविप्रौपैत्र्येत्रयउदङ्मुखाः ॥ एकैकोवोभयत्रस्यादसंपत्तावितिक्रमः ॥ संपत्तावर्ग्यपात्राणामेकैकस्यत्रयत्रयः ॥ पित्रादेर्ब्राह्मणाःभोक्ताचत्वारोवैश्वदेविके ॥ वृत्तिकारः ॥ सत्क्रियांदेशकालौचद्रव्यं ब्राह्मणसंपदः ॥ पंचैतान्विस्तरोहांतितस्मान्नेहेतविस्तरं ॥ द्वौदेवौप्राक्त्रयःपित्र्येउदगेकैकमेववा ॥ मातामहानामप्येवंतंत्रं वावैश्वदेविकं ॥ याज्ञवल्क्यः ॥ यद्येकंभोजयेच्छ्राद्धेदैवंतत्रकथंभवेत् ॥ अन्नंपात्रेसमुधृत्यसर्वस्यप्रवृतस्यच ॥ देवतायतनंकृत्वाततःश्राद्धंसमाचरेत् ॥ प्रास्येदन्नंतदग्नौतुदद्याद्वाब्रह्मचारिणे ॥ प्रयोगसारे ॥ आमंत्रणागतंविप्रंनिवारयतिदुर्मतिः ॥ ब्रह्महत्यामवाप्नोतिशूद्रयोनिपुजायते ॥ आमंत्रितस्तुयोविप्रोभोक्तुमन्यत्रगच्छति ॥ नरकाणांशतंगत्वाचांडालेष्वभिजायते ॥ श्राद्धकर्तापरश्राद्धंदर्शेचेद्यस्तुभुंजति ॥ नरकंप्रतिपद्येतकर्ताभोक्तातथैवच ॥ भ्रातरौपितृपुत्रौचतथाश्रोत्रियमेवच ॥ द्विजमप्यनधीतारंश्राद्धयज्ञेविवर्जयेत् ॥ भ्रातरौपितृपुत्रौतुनैकवर्गेनिमंत्रयेत् ॥ पृथक्वर्गेथवादैवेचैतानपिनियोजयेत् ॥ ब्राह्मणान्वेदसंपन्नान्पितॄन्भ्रातॄन्सुतानपि ॥ पृथक्वर्गेनयुंजीतनविप्रान्वेदनिवर्जितान् ॥ एकैकमपिविप्रंतुवर्गेवर्गेनियोजयेत् ॥ दैवेपित्र्येथवान्यास्मिन्नविप्रंवेदवर्जितम् ॥ अथश्राद्धदेशः ॥ दक्षिणेप्रवणेदेशेतीर्थादौस्वगृहेपिवा ॥ भूसंस्कारादिसंयुक्तेश्राद्धंकुर्यात्प्रयत्नतः ॥ परकीयप्रदेशेतुपितॄणांनिर्वपेत्तुयः ॥ तद्भूमिस्वामिपितृभिःश्राद्धकर्मविहन्यते ॥ अटवीपर्वताःपुण्यानदीतीर्थानियानिच ॥ देवखाताश्चगर्ताश्चस्वामीतेपुनाविद्यते ॥ पुनःश्राद्धविधिः ॥ प्रमादादकृतंचेत्स्यादग्नौकरणमेवच

shrinath.udupa@gmail.com

अकृतंपिंडदानंहिपुनःश्राद्धंसमाचरेत् ॥ पितृपात्रंचलेत्स्थानात्पिताचेद्भ्रमतेयदि ॥ स्पृशेत्पिंडांश्चमार्जारःपिंडोभिन्नःपितुर्यदि ॥ अग्नौकृतौतुनाशोग्नेःश्राद्धमध्येभवेद्यदि ॥ उपोष्यतादिनंकर्तापुनःश्राद्धंपरेहनि ॥ आपिंडदानपर्यंतन्नांकिंचिदपिवैभवेत् ॥ प्रमादाच्चेद्भवेत्तत्रपुनःश्राद्धंसमाचरेत् ॥ अत्रविशेषवचनं ॥ श्राद्धेचमनेसति ॥ अकृतेपिंडदानेचापिताचेद्भ्रमतेयदि ॥ कृत्वापाकंपुनःकुर्यात्श्राद्धंतत्रविधानतः ॥ मार्जारमूषकस्पर्शेपिंडेभिन्नेपितुर्यदि ॥ पुनःपिंडाःप्रदातव्यास्तेनपाकेनतत्क्षणात् ॥ पितामहादिदेवानांब्राह्मणोवमतेयदि ॥ सर्वमन्नंसमादायहुनेदग्नौतुलौकिके ॥ प्रणवेनाहुतिंचादावंतेस्याद्भूर्भुवस्वरोम् ॥ आहुतीर्जुहुयात्त्रिंशन्मंत्रैःप्राणादिपंचकैः ॥ द्वात्रिंशदाहुतीरेवहुत्वापिंडान्प्रदापयेत् ॥ सर्वेषांशाखिनामेवंविधिरेषउदाहृतः ॥ सपिंडीकरणेचैवप्रेतश्चेद्भ्रमतेयदि ॥ सपिंडीकरणंकुर्यात्पुनःपाकेनतत्क्षणं ॥ मासिकेचगयाश्राद्धेप्रत्यब्देचमहालये ॥ पिताचेद्भ्रमनंकुर्यात्पुनःश्राद्धंसमाचरेत् ॥ संक्रांतिपक्षपातेषुयुगमन्वष्टकासुच ॥ पिताचेद्भ्रमतेदर्शेपुनःश्राद्धंनकारयेत् ॥ श्राद्धदिनेतिक्रांतेसातिश्राद्धलोपः ॥ श्राद्धानिस्वस्वकालेस्युःप्रमादादकृतानिचेत् ॥ अतीतानिनकार्याणिमत्वाद्धंमासिकंविना ॥ सत्यव्रतः ॥ ऊनमासेपुनित्येपुतथानैमित्तिकेषुच ॥ उत्कर्षेचापकर्षेचनकुर्यादष्टकासुच ॥ अथजीवत्पितामहविषयं ॥ पितामहोस्थितोयस्यपितायदिविपद्यते ॥ द्वौपिंडावेकनामानावेकश्चमपितामहे ॥ सत्यव्रतः ॥ द्वौपिंडौपितृनाम्नैवदद्याज्जीवत्पितामहः ॥ प्रपितामहस्यचैकंपितुःप्रयाद्धिकेपुच ॥ अथश्राद्धदिनेवैश्वदेवविधिः ॥ संग्रहे ॥ वृद्धावादौक्षयेचांतेदर्शमध्येतुकुर्वते ॥ ॥ महालयेचपिंडांतेवैश्वदेवंचतुर्विधं ॥ मध्यइतिदर्शे ॥ अग्नौकरणानंतरंपृथक्पाकेनवैश्वदेवंकर्तव्यं ॥ बलिहरणादिकं-

shrinath.udupa@gmail.com

मृतस्यचसुतस्यापिपूर्णम्,शौचमिष्यते॥यावत्सूतकमस्पृश्यामातापित्रोःस्नानतःपिता॥ सर्वेषांतुसपिंडानांअस्पृश्यत्वंनसूतकं॥याव
दाशौचमस्पृश्यास्तावत्प्रेतस्यवैसुताः॥ सपिंडास्तावदस्पृश्यायावत्स्यादस्थिसंचयः॥ यत्रोपनयनात्पूर्वंपुत्रोयदिविपद्यते॥पित्रोस्त्रि
दिनमाशौचंदशाहाज्जननात्परं ॥ मृतश्चानुपनीतश्चेद्दशाहानंतरंयदि ॥ ब्राह्मणंविष्णुमुद्दिश्यचतुर्थेहनिभोजयेत् ॥ पुत्रइत्यत्रकन्या-
याउपलक्षणं ॥ आदंतजन्मनःसद्यआचूडान्नैशिकीस्मृता ॥ त्रिरात्रमाव्रतादेशादितिभेदस्तुगोत्रिणां ॥ मरणंकन्यकाया
श्चेयावद्वर्षत्रयंभवेत् ॥ सद्यःशुद्धिःसपिंडानांतदूर्ध्वमहरेवतु ॥ पुत्रिकाशौचमपिपित्रोःपुत्रवदेवत्रिरात्रमितिगम्यते ॥ ऊनद्वि
वर्षकंप्रेतंनदहेन्निखनेद्भुवि ॥ पूर्णद्विवर्षकंप्रेतंदहेदित्याहकश्यपः ॥ एकाहमपिन्यूनंस्याद्विवर्षस्यतुवैयदि ॥ निक्षिपेद्भुवि
तंप्रेतंनदाहोनोदकक्रिया ॥ असंस्कृतसपिंडानामित्यनुपनीतज्ञातीनामित्यर्थः ॥ पंचत्वंयदिचेद्गच्छेदसपिंडोह्यसंस्कृतः ॥
॥ तत्रस्नानेनशुद्धिःस्यादितिप्राहुर्मनीषिणः ॥ वाग्दानानंतरंयत्रयदिकन्याप्रमीयते ॥ आशौचंत्रिदिनंतत्रपितृपक्षेश्चवैकु
ले ॥ कन्याशौचंविवाहोर्ध्वंपितृगोत्रेनविद्यते ॥ पुरुषत्रयपर्यंतंविवाहात्पूर्वमेवाहे ॥ दत्तानारीपितुर्गेहेमृयेताथम्रियेतवा ॥
॥ अबंधुवर्गस्त्वेकेनशुचिस्तज्जनकास्त्रिभिः ॥ जनकग्रहणंमातापितृष्वसोदराणामुपलक्षणार्थं ॥ पितृगेहादतोन्यत्रयदिक-
न्याप्रमीयते ॥ तत्रस्यात्पक्षिणीपित्रोर्नचान्येषामयंभवेत् ॥ दशाहात्परतःकन्यामरणंशृणुतेपिता ॥ आशौचंतद्दिनंपित्रो
र्नान्येषामितिनिर्णयः ॥ शाखाशौचमतोन्येषांपित्रोःश्रवेनशुध्यति ॥ पित्रोःशावमतोन्येषांनैवाशौचेनशुध्याति ॥ दशा
हाभ्यंतरेपित्रोर्मरणंश्रूयतेयदि ॥ अवशिष्टदिनैःशुद्धाःपुत्राश्चैवान्यगोत्रिणः ॥ दशाहान्मरणंपित्रोर्वाहिश्चेच्छ्रुयतेयदि ॥ अव

shrinath.udupa@gmail.com

णादिदशाहांतंपुत्राणांतद्भवेदघं ॥ ऊर्ध्वंचेज्ज्ञातिमरणंदशाहाच्छ्रूयतेयदि ॥ सवासाजलमाप्लुत्यस्यादाशौचंयथोचितं ॥ मासत्रयेत्रिरात्रंस्यात्षण्मासात्पक्षिणीभवेत् ॥ अहस्तुनवमादर्वागूर्ध्वंस्नानेनशुध्यति ॥ श्रुतंवाहिर्दशाहाच्चेदपत्यमरणंयदि ॥ तथाजन्मचपुत्रस्यसद्यःस्नानेनशुध्यति ॥ एकंदेशमिदंप्रोक्तमाशौचंपूर्वसूरिभिः ॥ देशांतरंभवेद्यत्रस्नानमात्रेणशुध्यति ॥ ॥ देशांतरलक्षणं ॥ महानद्यंतरंयत्रगिरिर्वाव्यवधायकः ॥ वाचोयत्रविभिद्यंतेतद्देशांतरमुच्यते ॥ देशांतरंवदंत्यन्येषष्टियोजनमायतं ॥ प्रसह्ययोजनद्वयंगच्छन्यत्रमृतस्तस्यवार्तामाशौचकालमध्येप्रापयितुंनशक्नोतितद्देशांतरं ॥ तथाचविप्रस्यदशाहाशौचिनःविंशतियोजनैर्देशांतरं ॥ क्षत्रियस्यद्वादशाहाशौचिनःचतुर्विंशतियोजनैरित्यादि ॥ तथा ॥ एकाहपक्षिणीत्रिरात्राशौचेषुद्विचतुःषड्योजनरूपदेशांतरंयोज्यं ॥ पुत्रविपयेतु ॥ त्रिंशद्योजनदूरत्वाप्रत्येकंदेशभेदतः ॥ प्रोक्तंमुनिभिराशौचं सपिंडानामिदंभवेत् ॥ पुत्रः ॥ पितरौचेन्मृतौस्यातांदूरस्थोपिहिपुत्रकः ॥ श्रुत्वातदिनमारभ्यपुत्राणांदशरात्रकं ॥ ॥ पत्न्याअपितथाशौचंभवेदेवंविनिश्चितं ॥ पत्न्याशौचंभवेत्भर्तुरप्येवंमुनिरब्रवीत् ॥ दूरस्थानिधनंभर्तुर्दशाहाच्छ्रुणुतेयदि ॥ भार्याकुर्यादघंपूर्णपत्न्याअपिपतिस्तथा ॥ मातापित्रोर्यथाशौचंदशाहंश्रूयतेसुतैः ॥ अनेकेब्देपिदंपत्योस्तथैवस्यात्परस्परं ॥ पितुर्दशाहमध्येचेन्मातायदिमृतातदा ॥ दहेन्मंत्राग्निनाप्रेतंनकुर्यादुत्तरक्रियां ॥ पैतृकादूर्ध्वमेवास्यान्मात्राशौचंतुपक्षिणी ॥ विधायोदकदानादिकुर्यान्मातृक्रियांततः ॥ पैतृकात्सपिंडीकरणादूर्ध्वमित्यर्थ ॥ मातुर्दशाहमध्येतुमृतःस्याद्यादिवैपिता ॥ पितुर्मरणमारभ्यदशाहंशावकंभवेत् ॥ एकमेवपितुश्राद्धंकुर्योदेकादशेहनि ॥ ततोवैमातृकंश्राद्धंकुर्यादाद्या

shrinath.udupa@gmail.com

दिषोडशं ॥ अवशिष्टंदशाहांतंकृत्वाकर्मविधानतः ॥ मातृकंसकलंचैवसपिंडीकरणंभवेत् ॥ ततःकुर्यात्पितुःपुत्रःषोडशंच सपिंडनं ॥ तयोःस्यादेककालेवासापिंड्यमितिकेचन ॥ देशांतरेकृतेपित्रोःपुत्रेणप्रेतकर्मणि ॥ एकस्मिन्नेवकालेचेन्मरणंश्रूयतेतयोः ॥ दूरगोप्याचरेत्पुत्रोह्याशौचमुभयोःसमं ॥ कुर्यादेकादशाहेतुतयोःश्राद्धंपृथक्पृथक् ॥ पितुर्दशाहमध्येचेन्मरणंश्रूयतेयदि ॥ कृताक्रियायामातुश्चपित्राशौचेनशुध्यति ॥ असंस्कृतायामातुश्चमरणंश्रूयतेयदि ॥ पितुर्दशदिनादूर्ध्वमातृकंपाक्षिणीभवेत् ॥ कृत्वाप्रेतक्रियामादौमातुरेवाथवैपितुः ॥ कृतक्रियायामातुश्चश्राद्धंस्यात्पितृपूर्वकं ॥ मातुर्दशाहमध्येतुपितुश्चेत्कृतकर्मणः ॥ मरणंश्रूयतेतत्रमातुःकर्मकथंभवेत् ॥ पितुःश्रवणमारभ्यदशाहंसूतकंभवेत् ॥ आशौचानंतरंकुर्यान्मातृकंसकलंसुतः ॥ अवशिष्टंचयत्किंचित्प्रेतकर्माथवैपितुः ॥ कुर्यादाब्दिकवच्छ्राद्धमन्यथाकृतकर्मणः ॥ पैतृकंसकळंप्रेतकर्मकृत्वाथमातृकं ॥ आशौचंपक्षिणीमातुःकुर्यात्प्रेतक्रियादिकं ॥ देशांतरगतेचिरायितेविचारः ॥ दूरदेशंगतेवार्ताजीवतःश्रूयतेनचेत् ॥ यदिपूर्ववयस्कस्ययावद्वत्सरविंशतिः ॥ तथामध्यवयस्कस्यह्यब्दापंचदशैवतु ॥ तथापरवयस्कस्ययावद्वादशवत्सरं ॥ अतर्ऊर्ध्वंप्रेतकर्मकार्यंतस्यविधानतः ॥ कृत्वाषडब्दंन्यब्दंवाप्रायश्चितंस्वशक्तितः ॥ प्रेतकार्येकृतेतस्ययदिचेत्पुनरागमः ॥ घृतकुंभेनसंस्नाप्यसर्वौषधिभिरप्यथ ॥ संस्कारान्सकलान्कृत्वामौंजीबंधनमाचरेत् ॥ ॥ पूर्वपत्न्यासहैवास्यावेवाहःकार्यएवहि ॥ अथद्वादशाद्वादूर्ध्वमवलोकननिषेधः ॥ दंपतीपितृपुत्रौचस्वसारौभ्रातरौतथा ॥ पितृव्यमातुलौचैवदौहित्रेभागिनेयकौ ॥ पुत्रिकापितरौचैवभगिनीभ्रातरौतथा ॥ द्वादशाब्देव्यतीतेतुदूरदेशंगतेयदि ॥

shrinath.udupa@gmail.com

॥ एतेषामेकमेकोपिनान्योन्यमवलोकयेत् ॥ इच्छातिकांचिदाचीयाअन्योन्यमवलोकनं ॥ शिवालयेथवातीर्थेस्नात्वात्र ज्वाल्यदीपकौ ॥ शिवंसंपूज्यविधिवदुभौतौदेवमध्यतः ॥ धृत्वाकांश्यमयंपात्रंसजलंरत्नपूरितं ॥ शांतिदैर्मंत्रवोषैश्चद्विजो क्तैरवलोकयेत् ॥ आननंचैकमेकस्यदृष्ट्वासम्यक्शिवंनमेत् ॥ ब्राह्मणेभ्योयथाशक्त्यादद्यात्पात्रंसदक्षिणं ॥ अन्येभ्यश्चा थविप्रेभ्योयथावित्तानुसारतः ॥ तेभ्योपिदक्षिणांदत्वापूजयेच्चशिवंपुनः ॥ नत्वादेवंद्विजान्सूर्यानागत्यस्वस्यमंदिरं ॥ ततो र्व्याहृतिभिर्होमंशतमष्टोत्तरंतिलैः ॥ भुक्त्वाथभोजयेद्विप्रान्यथावित्तानुसारतः ॥ बांधवैःसहभुंजीतसर्वारिष्टप्रशांतये ॥ इ- त्थंयःकुरुतेविप्रस्वस्यारिष्टंनविद्यते ॥ आयुष्कामीनरश्चैवअकृत्वानावलोकयेत् ॥ पूर्वावलोकितानांतुविधिरेषउदाहृतः ॥ ॥ अथानुगमनविधिः ॥ प्राणंत्यजतियानारीभर्त्तारमनुवैमृतं ॥ तस्याएवतथाकुर्यात्पितृवत्प्रेतसत्क्रियां ॥ अग्निश्चरु स्तथाहोमोत्सुपस्छानंतथैवच ॥ एकएवभवेत्कर्तादंपत्योरनुयायिनोः ॥ नवश्राद्धंसपिंडंचषोडशादिकमेवच ॥ ॥ तयोःश्राद्धंसुतःकुर्याद्युगपच्चपृथक्पृथक् ॥ अथसापत्नमातृविषयं ॥ सापत्नमातृमरणंदशाहाच्चेद्भाद्रिःश्रुतं ॥ ॥ प्रथमेद्भेव्यतीतेवात्रिदिनंचाथपक्षिणी ॥ यावत्प्रथमाद्भस्तावत्त्रिरात्रमाशौचंतदूर्ध्वंपक्षिणीपुत्रवत्साः ॥ सा- पत्नमातुर्विषयएवतत् ॥ अपिशब्दादतीतेद्भेपित्रिरात्रमुक्तंतदपुत्रवत्साएव ॥ तथाच ॥ पितृपत्न्यामपेतायाम पुत्रायांतुवैयादि ॥ संवत्सरेव्यतीतेपित्रिरात्रमशुचिर्भवेत् ॥ पुत्रस्योपनयादूर्ध्वंमरणंश्रूयतेयदि ॥ दशाहात्परतोयावदद्भं स्यात्त्रिदिनंतथा ॥ पुनर्दाहः ॥ दशाहात्परतोयस्यपुनर्दाहोभवेद्यदि ॥ अनेकेद्भेपिसर्वेषांत्रिदिनंसूतकंभवेत् ॥ के

shrinath.udupa@gmail.com

चिद्विशेषमाहुः ॥ गृहीतेपूर्वमाशौचेपितुश्चासंस्कृतस्यतु ॥ दौहित्रादेपुनराशौचंदशाहमितिकथ्यते ॥ पुत्राणामिदमाशौ
चमन्येषांत्रिदिनंभवेत् ॥ प्राग्राहिणांतुनैवंस्यात्कर्तुर्वैत्रिदिनंभवेत् ॥ यस्मिन्ग्रामेशवस्तिष्ठेज्ज्ञातिभ्योयस्यकस्यचित् ॥
ग्रामस्यतावदाशौचंनीत्वाशुद्धिस्तुतत्क्षणात् ॥ असपिंडाशौचं ॥ पुत्रीगेहेथवान्यत्रप्रमृतौपितरौयदि ॥ दशाहाभ्यंतरेपु
त्यास्त्रिरात्रंशावसूतकं ॥ पित्रोर्दशादिनादूर्ध्वंमरणंदत्तकन्यका ॥ श्रूयेतयदिचेत्तस्याःपक्षिण्याशौचमिष्यते ॥ स्वसुर्गृहे
मृतोभ्राताभ्रातुर्वाथगृहेस्वसा ॥ आशौचंत्रिदिनंतत्रपक्षिण्येवापरत्रतु ॥ भगिनीसूतकंचैवभ्रातुश्चैवाथसूतकं ॥ नैवस्या
स्तुभ्रातृपत्न्यास्तथाचभगिनीपतेः ॥ मरणंश्रूयतेभ्रातुर्दशाहात्परतोयदि ॥ दिनमेकंस्वसुःप्रोक्तंस्नानंस्याद्भगिनीपतेः ॥
॥ दशाहात्परतोभ्रातामरणंश्रूयतेस्वसुः ॥ तस्यैकंदिनमाशौचंतत्पत्न्याःस्नानमुच्यते ॥ भगिन्यश्चात्मनःपित्रोर्मातामहश्चत
त्सुतः ॥ म्रीयतेदत्तकन्यायाःस्नानंतेषांतथोच्यते ॥ अस्यार्थः ॥ आत्मनोभगिन्यःमातापित्रोर्भगिन्यः ॥ मातामहश्चकारा
न्मातामहीतत्सुतःमातास्वसुतःएतेम्रीयंतेचेद्दतकन्यायाविवाहितायाःस्नानमात्रमेव ॥ दत्तकन्यामरणेतेषामितिभागिनेयमातामा
हमातामहीमातुळानामपिस्नानमात्रमेवेत्यभिप्रायः ॥ पितृष्वसुःपतिर्मातृष्वसुर्भर्त्तामृतोयादि ॥ दशाहाभ्यंतरेस्नानाच्छुद्धिरूपंनकिं
चन ॥ मातामहोमातुळश्चम्रीयतेवाथतत्स्त्रियः ॥ दौहित्रोभागिनेयश्चपितुर्मातुश्चवैस्वसा ॥ स्वगृहेऽप्यहमाशौचंपरत्रस्यात्तुपक्षिणी ॥
श्रुतंवहिर्दशाहाच्चेत्स्नानेनैवविशुध्यति ॥ स्वगृहइत्याशौचिनोगृहंनमृतस्य ॥ जामाताश्वशुरःश्वश्रूर्म्रीयतेस्वगृहेयादि ॥
॥ आशौचंत्रिदिनंतत्रपरवेश्मनिपक्षिणी ॥ मातुरैक्याद्विपितृकौभ्रातरावन्यगोत्रजौ ॥ एकाहंसूतकेतत्रात्रिरात्रंमृतके

shrinath.udupa@gmail.com

तयोः ॥ याज्ञवल्क्यः ॥ अनौरसेषुपुत्रेषुभार्यास्वन्यगतासुचेति ॥ एकाहमाह ॥ तदसान्निध्याज्ञेयंयदापितुरेकाहस्तदा-
सपिंडानांस्नानं ॥ अन्याश्रितेषुदारेषुपरपत्नीसुतेषुच ॥ गोत्रिणःस्नानशुद्धाःस्युस्त्रिरात्रेणैवतत्पिता ॥ श्रोत्रियाचार्यशि
ष्यर्त्विक्कुडपाध्यायश्चवैगुरुः ॥ मित्रश्चैवसहाध्यायीमृतश्चेत्स्वगृहेह्यहं ॥ स्वगृहात्परगृहमपिगृह्यते ॥ परगृहेपाक्षिणीत्युक्त-
त्वात् ॥ मरणंत्वसपिंडानांदशाहाच्चेत्श्रवाहिःश्रुतं ॥ सद्यःस्नानेनशुत्थिःस्यादितिप्राहुर्मनीषिणः ॥ असापिंडाइति ज्ञा
तयोनभवंतिइत्यर्थः ॥ तस्येवयस्ययत्प्रोक्तमाशौचंचान्यगोत्रिणां ॥ भवेन्नैवाथतत्पत्न्याइत्येवंमुनयोविदुः ॥ अथपक्षिण्या
दिलक्षणं ॥ द्विदिवारात्रिमेकाचेत्पक्षिणीत्यभिधीयते ॥ अहोरात्रमितिप्रोक्तंनैशिकीत्यभिधीयते ॥ आसायमहरेवस्यात्स
द्यस्तात्कालमुच्यते ॥ एवंविचार्यनिर्णीतमाशौचंतुमनीषिभिः ॥ अथातुरस्नानविधिः ॥ आतुरस्नानउत्पन्नेदशवारमना
तुरः ॥ स्नात्वास्नात्वास्पृशेदेनमातुरःशुत्थिमाप्नुयात् ॥ ज्वराभिभूतायानारीरजसाचपरिप्लुता ॥ कथंतस्याभवेच्छौचं
शुत्थिःस्यात्केनकर्मणा ॥ चतुर्थेहनिसंप्राप्तेस्पृशेदन्यातुतांस्त्रियं ॥ सासचैलावगाह्यापःस्पृशेत्स्नात्वापुनःपुनः ॥ दशद्वाद
शवाकृत्वाह्याचमेच्चपुनःपुनः ॥ अंतेचवाससंत्यागस्ततःशुद्धाभवेत्तुसा ॥ अथरजस्वलामरणविधिः ॥ पंचभिःस्नापयित्वा
तुगव्यैःप्रेतांरजस्वलां ॥ वस्त्रांतरकृतांकृत्वातांदहेद्विधिपूर्वकं ॥ सूतिकायांमृतायांतुकथंकुर्वीतयाद्विकः ॥ कुंभेसलिल
मादायपंचगव्यंतथैवच ॥ पुण्यैर्मिश्रमभिमंत्र्यापोवाचाशुद्धिलभेत्ततः ॥ तेनापिस्नापयित्वातुदाहंकुर्याद्यथाविधि ॥ अन्यो
पिपक्षः ॥ दशाहाभ्यंतरेचैवस्त्रीयतेचेत्प्रसूतिका ॥ कथंतस्याभवेच्छुद्धिर्दाहकर्मकथंभवेत् ॥ शूर्पेणस्नापयेद्विप्रोदशवारंततो

shrinath.udupa@gmail.com

जलैः ॥ पंचपल्लवसंयुक्तैःपंचगव्यैःकुशोदकैः ॥ कारयित्वाततःस्नानमभिषिंचेत्कुशोदकैः ॥ दाहयित्वाविधानेनमंत्रवत्पै
त्रमेधिकं ॥ अथगर्भिणीमरणविधिः ॥ प्रवक्ष्यामिक्रमेणैवशौनकोहंद्विजन्मनां ॥ गर्भिण्यांतुमृतायांवैकथंकुर्वीतिमानवाः ॥
॥ गर्भिण्यामरणेप्राप्तेषण्मासाभ्यंतरेयदि ॥ सहैवदहनंकुर्याद्गर्भछेदंनकारयेत् ॥ प्रेतांश्मशानंनीत्वाथभर्तावापुत्रएववा ॥
॥ छेदयेदूर्ध्वषण्मासाद्गर्भिण्यामरणंयदि ॥ नाभेरधोवामभागेगर्भछेदोविधीयते ॥ शनैस्तुछेदयेद्भर्तापुत्रोवाप्यन्यएववा ॥
॥ सगर्भिण्यांमृतायांतुसंस्कुर्यादुदकेनतां ॥ आपोहिष्ठात्रिभिर्मंत्रैःप्रोक्ष्यगर्भ..माहितां ॥ नीत्वाश्मशानंषण्मासादूर्ध्वंभर्ता
विदारयेत् ॥ शिशुमादायजीवंतंदापयेत्स्तनयन्यया ॥ यस्तेस्तनयइत्यनयाव्याहृत्यागृहमानयेत् ॥ उदरंचाव्रणंकृत्वापृष
दाज्येनपूरयेत् ॥ मृद्भस्मकुशगोमूत्रैरापोहिष्टादिभिस्त्रिभिः ॥ स्नापयित्वाविधायान्यद्वस्त्रांतच्चाथतांदहेत् ॥ मृतेपत्यौद-
शाहेस्त्रीसूयतेवारजस्वला ॥ भूत्वाशुद्धायथाकालेस्नात्वा ..वंविमोचयेत् ॥ सूत्रंमंगलसूत्रमित्यर्थः ॥ अथमहानद्यः ॥
॥ गोदावरीभीमरथीकृष्णावेणीसरस्वती ॥ तुंगभद्रासुप्रयोगाकावेरीसप्तनामका ॥ दुग्धोदानलिनीरेवासीतलाकस्त्व-
नामकः ॥ एताअपिमहानद्यःसह्यमूलाद्विनिर्मिताः ॥ अथपुण्यपर्वताः ॥ श्रीशैलोहिमहान्मेरुर्मैनाकोमलयस्तथा ॥
॥ ऋषभःकूटकोलश्चमहेंद्रोद्रोणसंज्ञकः ॥ चित्रकूटस्त्रिकूटश्चहेमकूटस्तथैवच ॥ गोवर्धनश्चगोकर्णोनीलश्चककुभस्तथा ॥
॥ सह्योविंध्यश्चमंदारोविख्याताःपर्वताअमी ॥ ततश्चैवतथाप्रोक्तायेचान्येगिरिसंज्ञकाः ॥ महानद्यंतरंयत्रगिरिर्वाव्यव-
धायकः ॥ इत्युक्तत्वान्महानद्यःपर्वताश्चोक्ताः ॥ अथदुर्मरणानि ॥ विद्युत्तोयाग्निचांडालोसर्पपाशद्विजाआपि ॥ वृक्ष-

shrinath.udupa@gmail.com

व्याघ्रपशुभ्यश्चमरणंपापकर्मिणां ॥ आत्मानंघातयेद्यस्तुविषशस्त्राग्निनायदि ॥ स्वेच्छयामृत्युमाप्नोतिसयातिनरकंध्रुवं ॥
क्षिपेदस्थीनिगंगायांशरीरंचाप्यसंस्कृतं ॥ नदीष्वन्यासुवातीर्थेदुर्मृतस्यनरस्यच ॥ वर्षादूर्ध्वंभवेत्तस्यप्रायश्चित्तंविधानतः ॥
नारायणबलिंकृत्वापालाशविधिनाचरेत् ॥ प्रेतकर्मततःकुर्याद्दाहादिसकलंहितत् ॥ षोडशादिसपिंडंचतदातस्योपतिष्ठति ॥
देशकालभयाद्वापिसद्यःकर्तुमुपक्रमेत् ॥ प्रायश्चित्तांहोद्विगुणंविधायाथौर्ध्वदेहिकं ॥ मृतस्यानिश्चयात्सद्यःकर्तव्याप्रेतसत्क्रिया ॥
प्रायश्चित्तविधिंकृत्वानैवेच्छयामृतस्यतु ॥ शस्त्रादिनाहतेसद्यदिनादर्वाङ्मृतोयदि ॥ भवेदुर्मरणंप्राहुरित्येवंपूर्वसूरिभिः ॥
अस्नात्वाचाप्यहुत्वाचह्यदत्वान्नंतथाद्विजः ॥ एवंविधस्यविप्रस्यसर्वदासूतकंभवेत् ॥ व्याधितस्यकदर्यस्यऋणग्रस्तस्यसर्वदा ॥
क्रियाहीनस्यमूर्खस्यस्त्रीजितस्यविशेषतः ॥ व्यसनासक्तचित्तस्यपराधीनस्यनित्यशः ॥ श्राद्धत्यागविहीनस्यभस्मांतंसूतकंभवेत् ॥
स्वाध्यायजपहोमादिनाशौचीवर्जयेत्सदा ॥ संध्यांतुमनसाकुर्यादर्घ्यमात्रंसमंत्रकं ॥ ऋत्विजांदीक्षितानांचयज्ञियंकर्मकुर्वतां ॥
नैवाशौचंभवेत्तेषांपितुश्चमरणंविना ॥ जननेमरणेचैवनाशौचंब्रह्मचारिणां ॥ पित्रोर्मरणएवस्यादाशौचंब्रह्मचारिणां ॥
॥ अथास्थिशुद्धिः ॥ अस्थिशुद्धिंप्रवक्ष्यामिपंचामृतकुशोदकैः ॥ मृद्भस्मगोमयैर्नवसंलिप्यप्रोक्षयेज्जलैः ॥ दश-
वारंनिमज्याप्सुप्रतिप्रणवसंयुतः ॥ पंचगव्यैश्चसंशोध्यनद्यांतीर्थोदकेपिवा ॥ केशवाद्यैश्चसंप्रोक्ष्यचतुर्विंशतिनामभिः ॥
हेममौक्तिकरत्नाद्यैःसंयुक्तानिचकारयेत् ॥ वेष्टयेत्ताम्रपात्रेणह्यथवामृगचर्मणा ॥ सुसंस्कृतानामेवास्थ्नामस्पृशत्वंनविद्यते ॥
असंस्कृतानिचास्थीनिनस्पृशेत्ब्राह्मणःक्वचित् ॥ अथनिक्षेपः ॥ यावदस्थिमनुष्याणांगंगातोयेचतिष्ठति ॥ याव-

shrinath.udupa@gmail.com

द्वर्षसहस्राणिस्वर्गलोकेमहीयते ॥ दशाहाभ्यंतरेवापिगयास्छ्राद्धंयदि ॥ अद्धोदकेमृतेयावत्तावत्पुण्यमवाप्नुयात् ॥ वत्सरात्प्रथमादर्वाक्तीर्थेचास्छ्रानिनिक्षिपेत् ॥ विनागंगामथास्छ्रानिद्वितीयेब्देनिनिक्षिपेत् ॥ स्नानंकृत्वाततस्छ्राप्यकेशवाद्यैश्च नामभिः॥ प्रक्षाल्यपंचगव्यैश्चपुष्पैश्चसमुपार्जयेत् ॥ धेनुंदत्वाथविप्रायलब्ध्वाज्ञांसुसमाहितः ॥ उद्धरेत्पितृनामानिसुसंकल्प्ययथाविधि ॥ अघमर्षणपूर्वेणधर्मायेतिनमोस्तुते ॥ विसर्जयेज्जलेस्छ्रानिनमोनारायणायच ॥ अथगुर्वादिलक्षणं ॥ निषेकादीनिकर्माणियःकरोतियथाविधि ॥ संभावयतिचान्येनसविप्रोगुरुरुच्यते ॥ कुलवृत्थात्समायातावंशेयस्यपरंपरा ॥ पुरोहितःसविज्ञेयःसर्वसंस्कारकर्मसु ॥ उपनीयतुयःशिष्यंवेदमध्यापयेद्विजः ॥ संकल्पंसहरस्यंचतमाचार्यंप्रचक्षते ॥ अग्न्याधेयंपाकयज्ञमग्निष्टोमादिकान्मखान् ॥ यःकरोतिव्रतीयस्यतस्यऋत्विगिहोच्यते ॥ पितैवगुरुरित्येवततश्चैवपुरोहितः ॥ आचार्योवेददश्चापिगुरुत्वंस्याच्चतुर्ष्वपि ॥ इतिश्रीमन्नारायणभट्टविरचितायांधर्मप्रवृत्तौअशौचप्रकरणं ॥ अथश्राद्धविधिरभिधीयते तत्रकर्तुर्नियममाह ॥ दंतधावनतांबूलंनखकेशनिकृंतनं ॥ कर्ताकुर्वीतपूर्वेद्युर्भोक्ताचैवपरेहनि ॥ दंतधावनतांबूलंक्षौराभ्यंगमभोजनं ॥ रसौषधिपरान्नंचश्राद्धकर्ताविवर्जयेत् ॥ पुनर्भोजनमध्वन्नंभारमध्वानसंगमं ॥ दानंप्रतिग्रहोहोमःश्राद्धभुक्त्वष्टवर्जयेत् ॥ ॥ शुचीनिमंत्र्यद्वौदैवेत्रीन्विमान्पितृकर्मणि ॥ दैव्येपित्र्येथवैकैकंसपिंडीकरणंविना ॥ सायमौपासनंहुत्वास्वयंभुक्तवतो द्विजान् ॥ उपगम्यस्वयंशिष्यःसुतोवाप्रश्रयान्वितः ॥ श्राद्धंश्वोभवितातत्रभवद्भिर्दिश्यतेक्षणः ॥ एवमामंत्र्यनियतोमनोवाकायकर्मभिः ॥ भोक्तुर्भोजयितुश्चैवब्रह्मचर्यमतःपरं ॥ श्राद्धहेवाथकुर्वीतपूर्वेद्युर्यद्यसंभवे ॥ परेद्युरथवाप्रातःकुतपेवा-

shrinath.udupa@gmail.com

निमंत्रयेत् ॥ दत्वादैवेक्षणंचादौपित्र्येचैवापसव्यतः ॥ स्नात्वामध्यान्हिकींसंध्यांकृत्वाहूयनिमंत्रितान् ॥ नतमिस्रादिकान्मंत्रान्ब्राह्मणैःसहसंपठेत् ॥ प्रायश्चित्तनिमित्तंतुसूक्तंयत्रातिलोदकं ॥ कुर्याच्छ्राद्धेषुसर्वेषुतीर्थेनैवकदाचन ॥ ब्राह्मणैर्वत्रपूतैश्चहिरण्यंसकुशैर्जलैः ॥ सर्वमभ्युक्षयेद्वेश्मततःशुध्येदसंशयः ॥ ब्रह्मदंडार्थमादायहिरण्यंसकुशंतिलैः ॥ त्रिःप्रदक्षणमावृत्यसमस्तेतिपटन्द्विजान् ॥ द्रव्यंनिवेद्यविप्राणांपुरतोयःस्वशक्तितः ॥ तेभ्यश्चैवलभेदाज्ञामनोवाकायकर्मभिः ॥ नत्वापितरमुद्दिश्यश्राद्धंचामुकसंज्ञकं ॥ कर्तुममाधिकारोस्तुभवंतोथब्रुवंत्विति ॥ कालश्चमुख्यकालोस्तुपाकादीनांपवित्रता ॥ ॥ कृत्वानिमंत्रितांस्पृष्ट्वाप्रत्यूचुस्तेतथैवच ॥ द्विराचम्यततःकर्तृप्राणायाममथाचरेत् ॥ पूर्ववदेवसंकल्प्यप्राचीनावीत्यतःपरं ॥ नामगोत्रंसमुच्चार्यरूपंचश्राद्धकर्मणि॥ प्रेतकर्मणिगोत्रादिनामसंकीर्तयेद्द्विजः॥संबंधनामगोत्राणिरूपांश्चैवानुवादयेत॥ एवंसर्वत्रनामादितैलेस्यादंजनेपिच॥संकल्पेचासनेपाद्येपिंडेचाच्छादनेक्षणे ॥ अन्नेचावाहनेक्षय्येनामान्येषुसमुच्चरेत् ॥ पितॄणांचैवदेवानामन्नेनहविषातथा ॥ सद्यःश्राद्धविधानेनकरिष्येयुष्मदाज्ञया ॥ दैवेक्षणंततोदद्यात्सव्येनैवतुदैविकं ॥ पितृणामपसव्येनसर्वस्यात्पैतृकंचयत् ॥ गोमयेनैवकुर्वीतप्रांगणेमंडलद्वयं ॥ श्राद्धकालेतुविप्राणांपादप्रक्षालनायच ॥ मंडलंचतुरस्रंस्यादेवेप्रादेशसंमितं ॥ वितस्तिपैतृकेवृत्तंतयोर्मध्येषडंगुलं ॥ देवानामंडलंचैवप्रागग्रौद्वौकुशौयवान् ॥ गंधपुष्पेक्षिपेत्पित्र्येदक्षिणाग्रान् कुशांस्तथा ॥ दद्यान्मंत्रंसमुच्चार्यदैवेथापितृकर्मणि ॥ दत्वापाद्यंपठेन्मंत्रंशन्नोदेवीरभिष्टये ॥ पादमूलेपितुस्छानंपादमध्येपितामहः ॥ प्रपितामहःपादाग्रेपादौप्रक्षालयेत्क्रमात् ॥ शीर्षेस्वस्यजलांसिचेत्तत्तत्स्छानाद्विनिर्गतं ॥ दक्षिणांसंस्पृशेत्कर्तु

shrinath.udupa@gmail.com

ब्राह्मणोमुखमीक्ष्यच ॥ कर्त्ताचम्यकुशान्भूमौविसृज्याथद्विराचमेत् ॥ विसृजेयुर्द्विजादर्भानाचम्यस्वस्वमंडले ॥ ईशान्या
माचमेत्कर्तामंडलाच्छ्राद्धकर्मणि ॥ देवाश्चैवततःपूर्वेपितृविप्रास्तथोत्तरे ॥ दैवेकर्मण्युदक्संस्थान्प्राङ्मुखानुपवेशयेत् ॥
॥ प्राणानायम्यसंकल्प्यस्वयंचैवोपविश्यतु ॥ ततस्तिष्ठेत्करिष्येहंप्रक्रांतंश्राद्धकर्मच ॥ प्राचीनावीत्यपहताइतिमंत्रंसमुच्च-
रन् ॥ नैऋतींदिशमारभ्यसर्वादिक्षुक्षिपेत्तिलान् ॥ पितृणांपुरतःप्रोक्ष्यमंत्रेणोदीरतामिति ॥ उदक्संस्थंतथादेवंगायत्र्या
प्रोक्षयेदथ ॥ संस्मृत्यपुंडरीकाक्षंपाकादिप्रोक्ष्यवारिणा ॥ श्राद्धकालेगयांध्यात्वाप्राचीनावीत्युदङ्मुखः ॥ उपविष्टःपृथ
क्पाणीदेवानामपिसंमुखः ॥ आसनादियथाचारंकर्मकुर्यात्तथैवहि ॥ देवानांदक्षिणेदद्यात्कंबलादिकुशासनं ॥ पितृ
णामासनंदद्याद्वामभागेयथोचितं ॥ अर्घ्यस्यामासनात्पूर्वंपश्चादावाहनंभवेत् ॥ यथाचारस्तथाकुर्याद्भाष्यकारोब्रवीद-
थ ॥ विश्वेदेवासइत्यस्यद्विरावृत्तिर्भवेदिह ॥ विश्वेदेवाश्रृणुतेतिसकृन्मंत्रमुदीरयेत् ॥ आगच्छंतुमहाभागाविश्वेदेवामहाब
लाः ॥ येअत्रविहिताःश्रात्धेसावधानाभवंतुते ॥ सौवर्णेराजतेताम्रेतदभावेतुपर्णजे ॥ अर्घ्यार्थंद्वेप्रकुर्वीतदैवेपात्रेथपैतृके ॥ त्री
णिचैवार्घ्यपात्राणिपर्णाभ्यामुभयत्रतु ॥ दैवेपित्र्येथपर्णाभ्यामर्घ्यपात्राणिकारयेत् ॥ पर्णयोरेकतोमूलेकृत्वातूत्तानयोःक्रमा
त् ॥ प्रविशंतियथापात्रेसमूलान्यंगुलानिहि ॥ मानंस्यादर्घ्यपात्राणांदैवेपित्र्येचकर्मणि ॥ देवानामर्घ्यपात्रंस्याच्चतुरंगुल-
विस्तृतं ॥ उन्नतंचाथवैवृत्तंपैतृकेंगुलिपंचकं ॥ आदौप्रसार्यप्रागग्रौत्युदक्संस्थौकुशौचवै ॥ द्वौद्वौतुन्यग्बिलेस्यातामर्घ्य
पात्रेअथोपरि ॥ गायत्र्याप्रोक्ष्यचोत्तानेकुर्यात्पात्रेचपैतृके ॥ उपरिस्थावधःकार्यावधस्थौचतथोपरि ॥ शन्नोदेवीरितिमंत्रंस

shrinath.udupa@gmail.com

कुदुच्चार्यपूरयेत् ॥ प्रतिपात्रयवोसीतिमंत्रांतेनिर्वपेद्यवान् ॥ गंधपुष्पकुशादीनिनिक्षिपेदर्घ्यपात्रयोः ॥ संपन्नेदेवपात्रेतुस्वाहाघ्यौं
चेत्यथाब्रवीत् ॥ यादिव्याइतिमंत्रेणदद्यादर्घ्यंपृथक्पृथक् ॥ गंधमाल्यांबरादीनिकांडानुसमयेथवा ॥ देवार्च्यादक्षिणादिस्या-
त्पादजान्वंसमूर्धसु ॥ शिरोंसजानुपादेषुवामांगादिषुपैतृके ॥ अर्चतप्रार्चनयवैःपूजयेदक्षतैःक्रमात् ॥ गंधपुष्पेधूपदीपौवासांस्या
भरणानिच ॥ दद्याद्वासांसिमंत्रेणयुवासुवासाइत्यथ ॥ दत्वापितृभ्योवासांसिपश्चान्मंत्रंसमुच्चरेत् ॥ पूजनंविधिवत्कृत्वाततोनुज्ञांद्वि
जन्मनां ॥ गृहीत्वाह्वपसव्येनकरिष्येपितृपूजनं ॥ प्राचीनावीत्यपोदद्यात्पितृकर्माप्रदक्षिणं ॥ दर्भान्द्विगुणभुग्नांस्तुदत्वैषामासनेषु
तु ॥ आवाहयेत्पितॄंस्तेषुविप्रेषुविधिवत्क्रमात् ॥ उशंतस्त्वेतुमंत्रेणप्रतिपितरमुच्चरेत् ॥ आपोदत्वाथदर्भेषुह्यर्घ्यपात्राणिवैक्रमात् ॥
पूर्वदक्षिणकाग्राणिह्याग्नेयीप्रवणानितु ॥ आस्तीर्यपूर्ववद्दर्भानधश्चैवतथोपरी ॥ गायत्र्यातानिसंप्रोक्ष्यकृत्वोत्तानानिपूर्ववत् ॥
तैजसेश्ममयेपात्रेमृन्मयेतर्हितेकुशैः ॥ एकद्रव्येषुवाग्नेयीदिक्संस्थेषुततःपरं ॥ उत्तानेष्वपरुव्येनतेषुवैनिर्वपेत्तिलान् ॥
पुरयेदुदकंतेषुपितृपात्रादिपुत्रिषु ॥ निषिच्यापोनुमंत्र्याघ्र्याशन्नोदेवीरभिष्टये ॥ अनुमंत्रःसकृत्कार्यस्तिलोसीत्यवपेत्तिलान् ॥
आवृत्तिःप्रतिपात्रंस्यान्मंत्रस्योहस्तुनेष्यते ॥ गंधपुष्पाक्षततेषुपात्रेषुप्रक्षिपेदथ ॥ स्वधार्घ्याइत्यपार्घ्यास्ताउपवीतीनिवेदयेत् ॥ आ
न्याआपःप्रदातव्याविप्रपाणिष्वतःपरं ॥ अर्घ्यसंशेषमादायदक्षिणेनतुपाणिना ॥ सव्यहस्तगृहीतेननिनयेत्पितृतीर्थतः ॥ त्रि
भिःपितरिदंतेर्घ्यमितिपाणिष्वनुक्रमात् ॥ दत्वादत्वानिनीतास्तायादिव्यर्चानिमंत्र्यतु ॥ दत्वार्घ्यंपितृहस्तेषुपश्चान्मंत्रंसमु-
च्चरेत् ॥ यादिव्याइत्यनेनैवहस्तेहस्तंनिधापयेत् ॥ पितृपात्रेप्रसिच्यार्घ्यशेषंपात्रद्वयेस्थितं ॥ अनक्तिपुत्रकामस्तैर्मुखमेकी-

shrinath.udupa@gmail.com

कृतैर्जलैः ॥ दत्वार्घ्यंसंस्रवांस्तेषांपात्रेकृत्वाविधानतः ॥ पितृभ्यःस्थानमसीतिन्युब्जंपात्रंकरोत्यथ ॥ न्यग्विलंपितृपात्रं स्यादासमाप्तेर्नचालयेत् ॥ नोत्थरेत्प्रथमंपात्रंपितृणामर्घ्यपातितं ॥ आवृतास्तत्रतिष्ठंतिपितरःशौनकोब्रवीत् ॥ उद्धृतंयदितत्पात्रंविवृतंवायदाभवेत् ॥ अभोज्यंतद्भवेच्छ्राद्धंकुत्थैःपितृगणैर्गतैः ॥ प्राचीनावीत्यपोदत्वापितृपूर्वंतिलैःक्रमात् ॥ अर्चयेद्विरआरभ्यनमोवइतिमंत्रतः ॥ प्राचीनावीत्यथेदानींगंधमाल्यंसधूपकं ॥ दीपंदद्यंयथाशक्तिदेयंवार्यंतरंतरा ॥ कुर्वीत भोजनार्थंहिमंडलानियथाक्रमं ॥ दैविकेचतुरस्रंतुपैत्र्येवृत्तानुवैयतः ॥ क्षिपेद्देवेयवान्दर्भौपैतृकेसकुशांस्तिलान् ॥ मंडलेदैविकेपात्रेसौवर्णेराजतेतथा ॥ तदभावेसुवर्णानांभाजनान्न्यसेदथ ॥ आग्नेयादिपरिस्तीर्यपितृपूर्वंतिलोदकैः ॥ कुशैस्तिलैर्भस्मनाचमध्येमध्येजलेनतु ॥ करशुद्धिंततःकुर्यात्तत्तोयंमंडलेक्षिपेत् ॥ दैव्येवायव्यमारभ्यपरिषिंचेज्जलेनच ॥ कुशैःपत्रैर्यवैश्चैवभस्मनाकरशोधनं ॥ पितृयज्ञचरोरर्धमुद्धृत्याभ्यज्यसर्पिषा ॥ अग्नौकरिष्यइत्येतान्स्पृष्टोक्तिःक्रीयतामिति ॥ ॥ अग्नौकरिष्येकरवैकरवाणीतिवापितान् ॥ क्रियतांतैःकुरुष्वेतिकुर्वीत्युक्तेयथाक्रमं ॥ प्राचीनावीतिनैवस्यादनुज्ञाचाहुतिद्वयं ॥ सोमायेतितुमंत्राभ्यांगृह्याग्नौजुहुयात्पविः ॥ अग्नेरभावेगृह्यस्यजुहुयात्पितृपाणिषु ॥ अभ्यज्यपितृपात्रेषुहुतशेषंचयद्घृतं ॥ कुशैराज्यंगृहीत्वातुमूर्धानंदिवइत्यृचा ॥ दैवपूर्वाणिसर्वाणिभाजनान्याभिधारयेत् ॥ आमास्वित्यादिकान्मंत्रान्सूक्तानिचजपन्स्वयं ॥ सव्येनैवततोन्नादिविधिनापरिवेषयेत् ॥ अन्नंचपायसंभक्ष्यंघृतंचव्यंजनादिकं ॥ सूपमंतेप्रदातव्यंसर्वस्यादेवपूर्वकं ॥ कर्तुर्दक्षिणतोदैवेपायसादितुवेषयेत् ॥ तथाचवामतःस्वस्यपैतृकेपरिवेषयेत् ॥ पितृणांभाजनस्छे

shrinath.udupa@gmail.com

पुप्राचिनावीतिनेत्यथ ॥ अन्नेषुपरिविष्टेषुहुतशेषंददात्यथ ॥ देवपात्रास्थितचान्नंगायत्र्याचाभिमंत्रयेत् ॥ उद्दिश्यचान्नंवि
श्वेभ्योदास्यमानमथापिवा ॥ दत्वाजपेत्ततोमंत्रंयेदेवासोदिवीत्यथ ॥ पितृभ्योपितथादत्वायेचेहेतिजपेदथ ॥ तिष्ठन्कु-
र्यादुपस्छानंदेवताभ्यइतिक्रमात् ॥ नमोदित्यादिभिर्मंत्रैःसव्येनैवद्विजस्तुतिः ॥ तिथिवारादिकंस्मृत्वागृहीत्वासतिलंजलं ॥
पितृन्देवान्समुद्दिश्यक्रियमाणेनवैमया ॥ श्राद्धेनैवमृतृप्तिःस्यात्पितृणांचैवमेवाहि ॥ ब्रह्मलोकनिवासेतुनिनयेत्सातिलंजलं ॥
॥ ब्राह्मणैःप्रोक्षयित्वान्नंगायत्रींसमुदीरयेत् ॥ परिषेचनमंत्रस्यकारयेद्देवपूर्वकं ॥ चित्रगुप्तबालिंचवैनदद्याच्छ्रात्थभुग्द्विजः ॥
अन्नेनचाथवाज्येनदद्यात्सव्येनदैविके ॥ अथैवापोशनार्थंवैपित्र्यादिद्विजपाणिषु ॥ निनयेत्सुजलंचाथसव्येनैवतुदैविके ॥
तिष्ठन्नेवस्मरेत्पादान्नीशानादीनुदङ्मुखः ॥ तत्सदेवामृतंचास्तुजुषध्वंहियथासुखं ॥ उत्कामृतोपस्तरणमसिस्वाहापिबेदथ ॥ वाग्य
तोभोजनंकुर्युर्लब्धंयच्चयथारुचि ॥ भुंजानानान्श्रावयेद्गित्रात्राक्षोघ्रान्पितृलिंगकान् ॥ पुराणानिपवित्राणिऋचोगाथापितृ
स्तुतिः ॥ यावदुष्णंभवत्यन्नंयावद्भुंजीतवाग्यतः ॥ पितरस्तावदश्नंतियावन्नोक्ताहविर्गुणाः ॥ हविर्गुणानवक्तव्याःपितरोया
वदर्पिताः ॥ तृप्तैस्तुपितृभिःपश्चाद्वक्तव्यंशोभनंहविः ॥ भोजनस्यचपर्याप्तंकिंचिदेयंततोधिकं ॥ यद्यदुक्तंततः
किंचिंकिंचिदुच्छिष्टभागिनां ॥ इच्छातृप्तेषुविप्रेषुगायत्रींसमुदीरयेत् ॥ तृप्तास्स्थइतितान्स्पृष्ट्वादेवांश्चाथापितॄनिति ॥ तृप्ते
पुश्रावयेत्तस्मासुधुवाताऋतायते ॥ अक्षन्नितिचतान्विप्रान्संपन्नमितिपृच्छतः ॥ क्रियतामन्नशेषःकिंतेचेष्टैःसहभुज्यतां ॥
॥ तद्वास्वीकृत्यसर्वस्मात्किंचित्किंचित्कृतंभवेत् ॥ सार्ववार्णिकमन्नाद्यमानीयाप्लाव्यवारिणा ॥ समुत्सृजेदुक्तवतामग्रतः

shrinath.udupa@gmail.com

मकिरेद्भुवि ॥ पुरतश्चतिलान्दर्भान्पौक्ष्यापःपितृभाजनात् ॥ येअग्निदग्धामंत्रेणभुव्यन्नंप्रकिरेदथ ॥ यद्यद्भुक्तंततः किंचित्किंचित्पिंडार्थमुद्धरेत् ॥ पितृयज्ञचरोरन्नमुद्धृतंप्रक्षिपेदथ ॥ यजमानकुलेजाताइतिमंत्रंसमुच्चरन् ॥ भुक्तशेषं-त्यजेद्भूमौब्राह्मणःस्वयमुद्धरेत् ॥ मापान्नंपायसंचान्नंभक्ष्यभोज्यादिकंचयत् ॥ यद्यद्भुक्तंद्विजैःश्राद्धेसर्वंपिंडार्थमुत्थरेत् ॥ मापाःसर्वत्रवैग्राह्यादेवेपित्र्येचकर्मणि ॥ प्रेतपिंडेनचग्राह्याइत्येवंकौशिकोब्रवीत् ॥ उत्तराचमनात्पूर्वंपिंडदानंभवेदिह ॥ पश्चाद्वापिवदन्त्यन्येकेचित्गृह्यविदोजनाः ॥ पिंडदानमनाचांतेष्वाचांतेष्वथवाभवेत् ॥ अंभोनिनयनाद्यंतंपितृयज्ञंसमापयेत् ॥ सान्निध्यौनैवगृह्याग्नेरथवोच्छिष्टसान्निधौ ॥ पिंडेषुचभवेत्तत्रवृत्तिकारवचोयथा ॥ पात्रादर्वाक्स्फ्येनलेखांलिखेदपहताइति ॥ अभ्युक्ष्यतामवस्तीर्यसकृदाच्छिनबर्हिषा ॥ लेखायांपिंडदेशेतुशुध्यंतामितितुत्रिभिः ॥ तत्रापिंडत्रयंदद्यात्परार्चीनेनपाणिना ॥ पितरित्यथचैतत्तेक्षिपेद्यचेतिमंत्रतः ॥ पित्रेनामानजानीयात्तेद्यादिवदेत्क्रमात् ॥ निपृतानत्रपितरइतिताननुमंत्र्यतु ॥ अप्रदक्षिणमातृसत्युदक्प्राणान्नियम्यच ॥ अभ्यावृत्यानुमंत्र्यामीमदंतेत्यनुमंत्रतः ॥ चरुशेषमवघ्रायनिनयेत्पूर्ववज्जलं ॥ आघ्रायाथचरोःशेषमाचमेदुपवीतकः ॥ निनयेदपसव्येनशुध्यंतामित्यपोथवै ॥ अभ्यंक्ष्वांक्ष्वेतिनामादिमंत्राभ्यांतैलमंजनं ॥ दद्यादशामथैतद्वादितिपिंडेष्वतःपरं ॥ दद्यात्पिंडेषुलोमानि-मकोष्ठस्थानियानिच ॥ पंचाशद्वत्सरादूर्ध्वमर्वाक्भवतिवृत्तिकृत् ॥ वरुणःपितृपिंडेस्यात्प्रजापतिःपितामहे ॥ प्रपितामहपिंडेग्निरित्येताःपितृदेवताः ॥ दत्वापिंडत्रयंचेत्थंसव्येनैवतुपूजयेत् ॥ गंधपुष्पादिभिश्चैवपिंडाधिष्ठाधिदेवताः ॥ यत्किंचि

shrinath.udupa@gmail.com

त्पच्यतेगेहेभक्ष्यभोज्यादिकंचयत् ॥ अनिवेद्यनभोक्तव्यंपिंडेभ्योनकदाचन ॥ नमोवइत्युपस्थायमनोन्वेतितृचेनवै ॥ पर
तनेतिमंत्रेणपिंडांस्तांश्चप्रवाहयेत् ॥ औपासनांतिकंगछेज्जपेदग्नेदमित्यृचं ॥ तिथिवारादिकान्स्मृत्वापितृपूर्ववदुच्चरेत् ॥
पितृणांब्रह्मलोकोस्तिइत्युक्तानिनयेज्जलं ॥ आचांतानांचशुध्यर्थंपाणीप्रक्षालयेदथ ॥ मध्येमध्येजलंचैवदद्याद्यवकुशाश्च
तान् ॥ पुनर्देयंजलंदैवेपितृणामपसव्यतः ॥ जलंदद्यात्तिलान्दर्भानक्षतान्पूर्ववज्जलं ॥ पृष्ट्वाभुक्तवतोथास्मद्गोत्रमित्राभि
वादयेत् ॥ प्रत्यूचुस्तेततोविप्राःपितृप्रसादोत्स्वस्थ ॥ पितृप्रसादतोलब्धान्स्वगृह्यस्वयमक्षतान् ॥ धारयेच्छिरसिस्वस्यस्वगो-
त्रस्याभिवृत्धये ॥ चालयित्वाचपात्राणिस्वस्तीत्यथसमुच्चरेत् ॥ दद्यादक्षय्यमुदकंदैव्येपित्र्येयथाक्रमं ॥ अन्नप्रकिरणंके-
चिदत्रैवेच्छंतिसूरयः ॥ पात्रस्थानेषुसर्वेषुयथाचारोभवेदिह ॥ अन्नंप्रकिरणार्थंयत्तदानीयजलाप्लुतं ॥ आचांतानांसमी
पेषुत्वग्रतोविकिरेत्भुवि ॥ असोमपाश्चमंत्रेणदेवानांविकिरेद्भुवि ॥ उत्तानंप्रथमंपात्रंकृत्वायज्ञोपवीत्यथ ॥ दत्वाचदाक्षि-
णांशक्त्याविसृजेदोंस्वधोच्यतां ॥ अवशिष्टंतुयत्किंचिदर्घ्यपात्रस्थितंजलं ॥ पिंडानांपुरतःसिंचेदोंस्वधोच्यतामित्यथ ॥
॥ अनुज्ञयातुविप्राणांततःपिंडान्समुत्धरेत् ॥ शांतिरित्यादिभिर्मंत्रैःपिंडस्थानेजलंक्षिपेत् ॥ स्वस्तित्युच्चारयेत्कर्ताब्राह्म-
णैःशोभनंहविः ॥ ततोविसर्जयेच्छ्राद्धंवाजवाजवेतेत्यृचा ॥ उत्तिष्ठतेतिवामांसंस्पृष्ट्वाविप्रस्यवैपितुः ॥ सहैवपितरोदेवैः
स्वस्थानंगंतुमुद्यताः ॥ आमावाजस्यप्रसवइतिमंत्रंसमुच्चरन् ॥ त्रिःप्रदक्षिणमावृत्यमंडलस्थान्द्विजानथ ॥ पवित्रग्रंथि
मुत्सृज्यमंडलेविसृजेज्जलं ॥ दक्षिणाभिमुखास्तिष्ठन्याचेतेमान्वरान्पितृन् ॥ दातारोनोभिवर्धतांवेदाःसंततिरेवनः ॥ श्रद्धाच

shrinathdudhe@gmail.com

नोमाव्यगमत्वबहुधेयंचनोस्त्वति ॥ अन्नंचमेबहुधेयंवेतीत्याश्वलेयमाह ॥ याचितारश्चनःसंतुमाचयाचिष्मकिंचन ॥
॥ याचितारंप्रतिब्रुयुस्तथैवास्त्वितितेद्विजाः ॥ स्वादुषंसदइत्येतौमंत्रौकर्तापठेदिह ॥ अक्षतान्पक्षिपेत्पादेष्विहैवस्तंतथेति-
च ॥ लभेदथाशिषस्तेभ्यःसंतुष्टेभ्योयथारुचि ॥ आयुःप्रजांधनंविद्यांस्वर्गंमोक्षंसुखानिच ॥ प्रयच्छंतुतथाराज्यं
पितानृणांपितामहाः ॥ घृतेनाभ्यज्यचैवपादान्विप्राणांक्षालयेदथ ॥ मर्दयेद्भक्तिभावेनततश्चैवाभिवादयेत् ॥ अद्यमे-
सफलंजन्मभवत्पादाब्जवंदनात् ॥ अद्यमेवंशजाःसर्वेयातावोनुग्रहादिवं ॥ पत्रशाकादिदानेनक्लेशितायूयमीदृशाः ॥ त
तत्क्लेशजातंचितस्थंविस्मृत्यक्षंतुमर्हथ ॥ वसिष्ठसदृशाविप्राःसूर्यपर्वसमातिथिः ॥ आसनादेर्नमस्कारोभवत्सत्कारएवतु ॥
यस्यस्मृत्याचनामोक्त्या०न्यूनंसंपूर्णतां०मंत्रहीनं०श्राद्धंसंपूर्णतांयातिप्रसादाद्भवतांमम ॥ जपेन्मंत्रंवसिष्ठासोदेवान्वासिष्ठइत्यथ
॥ इदंपितृभ्यइत्येतामृचैगाथांपठेदथ ॥ क्षमध्वंभोद्विजन्मानःपितृयज्ञेममाद्यवै ॥ कृत्वातौसंपुटौपाणीश्वासीमांतमनुव्रजये-
त् ॥ म्रियतेचेत्पितायस्यविद्यमानेपितामहे ॥ पैतृकादिपुनामानिकथमेवोच्चरेदिति ॥ द्विवारंपितृनाम्नैवपैतृकादि-
षुवायतः ॥ प्रपितामहनाम्नैवएकवारमितीहतु ॥ अनेनविधिनाश्राद्धंकुर्याज्जीवत्पितामहः ॥ दद्यात्पिंडद्वयंपित्रेतथै-
कंप्रपितामहे ॥ इतिश्रीमन्नारायणविरचितायांधर्मप्रवृत्तौश्राद्धप्रकरणंसमाप्तं ॥ अथश्राद्धोपयोगिवचनानि ॥ प्रत्य-
ब्दंविधिनापित्रोःश्राद्धंकृत्वाद्विजोत्तमः ॥ कुर्यात्पंचमहायज्ञान्नित्ययज्ञविदोविदुः ॥ पित्रोःप्रत्याब्दिकंश्राद्धंविधिवत्ततत्स-
माप्यच ॥ कार्याःपंचमहायज्ञाइत्याहशालकायनः ॥ दद्याद्विसर्जितान्पिंडान्गुरवेदक्षिणान्वितान् ॥ तदभावेप्यवा

shrinath.udupa@gmail.com

न्यस्मैविप्रायैवाप्सुनिक्षिपेत् ॥ पिंडांस्तुगोजविप्रेभ्योदद्यादग्नौजलेपिवा ॥ प्रक्षिपेत्सत्सुविप्रेषुद्विजोच्छिष्टंनमार्जयेत् ॥ पात्राणिचालयेच्छ्राद्धेस्वयंशिष्योथवासुतः ॥ नस्त्रीभिर्नचकौमारैर्नान्यैश्चैवकदाचन ॥ नदद्यात्गोजविप्रेभ्योजलेनैवतुनिक्षिपेत् ॥ विकिरंतुद्विजोच्छिष्टंभूमौस्खात्वातुनिक्षिपेत् ॥ संकल्पादौपादशौचेपिंडदानेविसर्जने ॥ अर्चनांतेचविकिरेस्मृतमाचमनीयकं ॥ संकल्पादौचेयदर्भास्स्याज्याविप्रांघ्रिशोधने ॥ अर्चनादौघृतायेचस्याज्याःश्राद्धविसर्जने ॥ विसर्गश्चूलकश्चैवविकिरंपंक्तिवारणं ॥ करशुद्धिरपोशानंपितृपूर्वाणिषट्सदा ॥ स्वागतेस्वस्तिवचनेगोत्रशेषेप्रदक्षिणे ॥ अर्घ्येचदक्षिणादानेषट्सुसव्यंविधीयते ॥ आवाहनेचपिंडेचश्रात्द्धानुवादनेक्षणे ॥ अन्नाच्छादनपाद्येषुनामान्यक्षय्यउच्चरेत् ॥ अक्षय्यासनयोःषष्ठीद्वितीयावाहनेतथा ॥ अन्नदानेचतुर्थीस्याच्छेषाःसंबुत्थयःस्मृताः ॥ अन्नदानेविशेषःस्यादादौसंबुद्धिरुच्यते ॥ प्रथमाचचतुर्थीचयथालिंगविभक्तितः ॥ घृतलेपंपादशौचंविष्टरेचोपवेशनं ॥ मंत्रस्योहस्तथाजुष्टंवर्जयेदाश्वलायनः ॥ अन्नस्यहिचतुर्भागंपिंडानांपरिपेचनं ॥ बव्हृचोनैवकुर्वीतपिंडपात्रमडधोमुखं ॥ दीयमानंचयच्चान्नंगायत्र्याभ्युक्ष्यवारिणा ॥ दद्यच्छ्रात्थेनिधायान्यमन्नस्योपरिवैकुशान् ॥ परिविष्टंचयच्चान्नमंगुष्ठेनद्विजस्यतु ॥ स्पर्शयेत्सलिलंतोयंश्राद्धेविप्रकरेर्पयेत् ॥ अन्नादिसकलंदेयंविनाज्यंदेवपूर्वकं ॥ उक्तोयंमुनिभिःश्राद्धेविधिर्वाजसनेयिनां ॥ प्रेतकार्येषुसर्वेषुसपिंडीकरणेतथा ॥ पाणावेवतुहोमःस्यादन्यत्राग्नौकरेपिवा ॥ क्रतुर्दक्षौसत्यवसूकामकालौधनुर्धरौ ॥ पुरूरवाद्रवाश्चेतिप्रत्यद्धेचैवपार्वणे ॥ अन्यथाकुरुतेयस्तुश्राद्धंतस्यवृथाभवेत् ॥ विभक्तिलिंगान्योज्ञात्वाश्राद्धेसंकल्पमाच-

shrinath.udupa@gmail.com

रेत् ॥ हव्यंदेवानगृण्हंतिकव्यंचपितरस्तथा ॥ भुङ्क्तेयःश्राद्धकृन्मर्त्योयदिपंक्तौद्विजन्मनां॥ सयातिनरकंघोरंपितृभिःसहमज्जति॥
अज्ञानात्कुरुतेश्राद्धंयोभिश्रवणवर्जितं ॥ श्राद्धंहताभवेत्कर्तानिराशाःपितरोगताः ॥ ब्राह्मणेभ्योक्षतांलब्धानाशीर्वचनसंयुतान्॥
धारयेच्छिरसिस्वस्यश्राद्धेनप्रेतकर्मसु ॥ द्राभ्यामेवसुपर्णाभ्यामर्घ्यपात्राणिपैतृके ॥ सपिंडीकरणेप्रेतकार्येष्वेकेनचैवहि ॥
श्राद्धेप्रत्याब्दिकेपूर्वंतर्पणंक्रियतेयदि ॥ पितरस्तेनतृप्यंतिततोन्नंनलभंतिते ॥ नित्यकर्मकथंश्राद्धेकारुण्यानांयदाब्दिकं ॥
आब्दिकात्तर्पणंपूर्वंकुर्याच्छ्राद्धमतःपरं ॥ धर्मज्ञैर्विधिरुक्तोयंमातृकेपैतृकेनवा ॥ उर्ध्वपुंड्रंत्रिपुंड्रंवाललाटेयस्यदृश्यते ॥
कर्तुश्चैवाथभोक्तुश्चनिराशाःपितरोगताः ॥ तुलसीबिल्वपत्रंचरक्तपुष्पाणिकेतकी ॥जातीदर्शनमात्रेणनि० ॥ रंगवल्याकृतां
रेखांकंठेमालाद्विजस्यतु ॥ ललाटेतिलकंदृष्ट्वानि० ॥ घंटानादंविवादंचहुंकारंहास्यरोदनं ॥ आवाच्यवचनंश्रुत्वानि० ॥
प्रातर्होमंतुनिर्वर्त्यसमुधृत्यहुताशनात् ॥ शेषंमहानसेकृत्वातत्रपाकंसमाचरेत् ॥ यदिस्याल्लौकिकेपाकस्ततोन्नंतत्रहूयते ॥
शालाग्नौयदिचेदन्नंहोमंतत्रैवकारयेत् ॥ होमइतिवैश्वदेवः ॥ श्राद्धेवस्त्रादिकंचैवविप्रेभ्योदीयतेयथा ॥ पिंडेभ्योपितथादद्यादन्य
थानिष्फलंभवेत् ॥ पितृयज्ञविधानेनश्राद्धेपाकपरिक्रिया ॥ गृह्याग्नौस्यात्क्षणंदत्वातदाशौचंनविद्यते ॥ कर्मप्रारंभमारभ्यभ-
वेद्यावद्विसर्जनं ॥ यदिस्यात्सूतकंमध्येत्वासीमांतंनसूतकं ॥ स्नात्वाकूर्वीतवैपाकंश्राद्धेपत्नीविधानतः ॥ पुनःस्नायात्ततश्चैव
धारयेदन्यदंबरं ॥ संसृष्टभ्रातृभिर्युक्तोज्येष्ठःकुर्यात्समंत्रकं ॥ सकलंपैतृकंपित्रोरनुज्ञास्यतदाज्ञकाः ॥ तिथिवारादिकं
ज्ञात्वापितॄनुद्दिश्यवैयतः ॥ सज्येष्ठाअनुजाःसर्वेनिनयेयुस्तिलोदकं ॥ संसृष्टेप्रगतेज्येष्ठेबहिःश्राद्धंकनीयसा ॥ नकार्यमा-

shrinath.udupa@gmail.com

ज्ञयाकार्यमाज्ञयाकेपिसंकटे ॥ आज्ञयाक्रियमाणतुज्यष्ठश्रमध्यआगतः ॥ ज्येष्ठःकुर्याच्चतच्छेषंपिंडदानादिकंचयत् ॥ पिं-
डदानादधोज्येष्ठेक्रियमाणेतुकर्मणि ॥ कनिष्ठाश्रागताःपिंडेनिनयेयुस्तिलोदकं ॥ क्रियतेयस्यवैश्राद्धमज्ञातेकस्यचिद्यदि ॥
॥ निमंत्रयेन्नतुज्ञातिंनज्ञातिंस्वस्यवात्रतु ॥ यत्रैवपच्यतेपाकोयदिशालान्वितोगृहे ॥ संगेनपितरस्तस्यविचरंतित्यकुत्सिते ॥
॥ मंत्रानुच्चार्यकर्तैवश्राद्धकर्मसमाचरेत् ॥ नैवोच्चरेद्विजोभोक्तावृथास्यादुच्चरेद्यदि ॥ नजपेयुर्द्विजामंत्रान्भोक्तारःश्राद्धक-
र्माणि ॥ स्वादोःमूक्तंजेपयुस्तेनतंचयमदैवतं ॥ अथसमस्तपित्रर्चनविधिः ॥ देवानादौसमभ्यर्च्यपितृवर्गमथार्चयेत् ॥
॥ मातृवर्गततोमातामहादेश्चयथाक्रमं ॥ पितृवर्गमातृवर्गवर्गमातामहस्यच ॥ अर्चयित्वाथकारुण्यानर्चयेदितिशौनकः ॥
॥ अथान्यःपक्षः ॥ देवानाभ्यर्च्यपित्रादिवर्गवर्गसमर्चयेत् ॥ एकस्मिन्नथवाकालेसर्वानप्यर्चयेत्पितॄन् ॥ एकोद्दिष्टावि-
धानेनवर्गञ्चैकैकमर्चयेत् ॥ तीर्थेमहालयेचैवाहित्वाद्वादशदैवतं ॥ पितृवर्गमथोमातुर्वर्गमातामहस्यच ॥ पृथग्वर्गस्यवर्गस्य
नामान्युच्चारयेत्क्रमात् ॥ संकल्पेविधिरेपस्यात्तथाचैवानुवादयेत् ॥ तीर्थेमहालयेचैवमर्चनंस्यात्पृथक्पृथक् ॥ स्वस्याश
क्तत्वविषये ॥ रोगादिनायदाश्राद्धंस्वयंकर्तुमशक्यते ॥ पुत्रेणैवाथशिष्येणज्ञातिनावापिकारयेत् ॥ एकादश्यांश्राद्धभोज
नविचारः ॥ शौनकः ॥ श्राद्धंकृत्वातुयोविप्रोमोहादुपवसेद्यदि ॥ राक्षसंभवतिश्राद्धंसोपिगच्छेदधोगतिं ॥ एकाद-
श्यांयदाश्रात्धंभवेद्यदिकथंतदा ॥ कृत्वातूपवसेच्छ्रात्थंविधुरोविधिवापिहि ॥ श्राद्धंकृत्वागृहस्छोवैनैवकुर्यादुपोषणं ॥ पि-
तृशेषंसमश्नीयादेकादश्यांनदुष्यति ॥ मोहादुपवसेच्छ्राद्धंकृत्वाचेद्धरिवासरे ॥ समूढोनरकंयातिपितृभिःसहमज्जति ॥

shrinath.udupa@gmail.com

॥ एतत्स्मार्तविषये ॥ अथवैष्णवविषये ॥ कण्वः ॥ एकादश्यांयदाश्राद्धंप्रसङ्गंयदिवाभवेत् ॥ कार्यमेवाहितच्छ्राद्धमु-
पवासःकथंभवेत् ॥ उपवासोयदानित्यःश्राद्धंनैमित्तिकंभवेत् ॥ कृत्वातूपवसेच्छ्राद्धंशेषमाघ्रायवैचरोः ॥ स्कांदे ॥ तएवो
पवसेयुश्चैद्वैष्णवाहरिवासरे ॥ कृत्वातुविधिनाश्राद्धमाघ्रायपितृसेवितं ॥ श्राद्धंकृत्वासमाघ्रायपितृशेषंविधानतः ॥ उपवासंत
तःकुर्यात्केचिदेवंविदुर्बुधाः ॥ न्यायागतधनस्तत्वज्ञाननिष्ठोतिथिप्रियः ॥ श्राद्धकृत्सत्यवादीचगृहस्थोपिविमुच्यते ॥ पितृयज्ञा
त्परोधर्मःपितृयज्ञात्परंतपः ॥ पितृयज्ञात्परंकर्मनचैवास्तीहभूतले ॥ इतिश्रीमन्नारायणविरचितायांधर्मप्रवृत्तौश्राद्धप्रकर
णंसमाप्तं ॥ अथदानविधिरभिधीयते ॥ तत्रादौदानप्रशंसा ॥ श्रुतिः ॥ दक्षिणावतामिदिमानिचित्रेति ॥
उच्चादिविक्षिणावंतोअस्थुरिति ॥ तस्मादानंपरमंवदंतीत्यादीनिश्रुतिवचनानि ॥ तथायाज्ञवल्कः ॥ देशेकालेउ
पायेनद्रव्यंश्रद्धासमन्वितं ॥ पात्रेप्रदीयतेयत्तत्सकलंधर्मलक्षणं ॥ नाविद्ययाकेवलयातपसाकेवलेनहि ॥ विद्यातपोभ्यांयुक्तं
यत्तत्पात्रंप्रचक्षते ॥ पात्रेदत्तंतुयत्किंचिच्छुचिर्भूत्वासमाहितः ॥ ज्ञेयंतत्सर्वमक्षय्यंमहादानादिकंचयत् ॥ ददातिप्रत्य
हंयस्तुहिरण्यादिकमेवच ॥ भुक्त्वाभोगान्यथाकामान्सोश्नुतेपदमव्ययं ॥ हिरण्यमन्नमुदकंफलपुष्पादिकंचयत् ॥ यत्किं
चित्प्रसहंदेयंयथावित्तानुसारतः ॥ दानंनैमित्तिकंदद्यात्सुसंकल्प्ययथाविधि ॥ नित्यदानेतुनैवस्यात्संकल्पादिफलादिके ॥
॥ सर्वत्रप्रांङ्मुखोदातागृहीताचउदङ्मुखः ॥ सजलंदक्षिणायुक्तंदद्याद्विप्रकरेसदा ॥ विच्छिन्नंकरेदत्तंसद्यःशतगुणंभवेत् ॥
॥ आलस्यादथवालोभान्निष्फलंस्यादिनांतरे ॥ यत्रसंकल्पितंद्रव्यंतादृनेनेचन्नदीयते ॥ द्विगुणंस्याद्वितीयेन्हितृतीयेत्रिगुणं-

shrinath.udupa@gmail.com

भवेत् ॥ अथगोदानं ॥ गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश ॥ यस्मात्तस्माच्छिवंमेस्यादतःशांतिंप्रयच्छमे ॥ १ ॥ अथकपिलागोदानं ॥ कपिलेसर्वदेवानांपूजनीयासिरोहिणि ॥ सर्वतीर्थमयेयस्मादतः० ॥ २ ॥ कृष्णेनमोनमस्तुभ्यंब्रह्मविष्णुशिवात्मिके ॥ जन्मप्रभृत्तिपापानिकृष्णेनाशयमेसदा ॥ ३ ॥ अथभूदानं ॥ सर्वेषामाश्रयाभूमिर्वराहेणसमुद्धृता ॥ अनंतसस्यफलदात्र्यतः० ॥ ४ ॥ यस्यांरोहंतिबीजानिकालेचैवमहीतले ॥ त्वत्प्रसादाच्चसकलाममसंतुमनोरथाः ॥ ५ ॥ दानान्यन्यानिसर्वाणिकनकादीनियानीच ॥ तानिभूमिप्रदानस्यकलांनार्हंतिषोडशीं ॥ अथतिलदानं ॥ महर्षेर्गोत्रसंभूताःकाश्यपस्यातिलाःस्मृताः ॥ तस्मात्तिलप्रदानेनममपापंव्यपोहतु ॥ ७ ॥ अथहिरण्यदानं ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ॥ अनंतपु० ॥ ८ ॥ अथाज्यदानं ॥ कामधेनोःसमुद्भूतंसर्वक्रतुषुसंस्थितं ॥ देवानामाज्यमाहारम० ॥ ९ ॥ अथधान्यदानं ॥ धन्यंकरोषिदातारमिहलोकेपरत्रच ॥ यस्मात्त्वमुच्यतेधान्यमतः० ॥ १० ॥ अथगुडदानं ॥ गुडमिक्षुरसोद्भूतं रसानांपरमंवरं ॥ दानेनानेनमेयस्माच्छांतिरस्तुसदागृहे ॥ ११ ॥ अथशर्करादानं ॥ शर्करेक्षुरसोद्भूतासदास्वादुकराशुभा ॥ दानेनानेनमेनित्यम० ॥ १२ ॥ अथरजतदानं ॥ पितृणांवल्लभंयस्माद्विष्णोर्वैशंकरस्यच ॥ रजतंपातुमान्नित्यंशोकसंसारसागरात् ॥ १३ ॥ लवण० ॥ अन्नाद्याःस्वादुतांयांतिलवणेनरसाश्रये ॥ नित्यंलवणदानेनममसंतुमनोरथाः ॥ १४ ॥ अथनानाधान्यदानानि ॥ ब्रह्मणानिर्मिताःपूर्वव्रीहयोयज्ञसाधनाः ॥ अनेनव्रीहिदानेनममसंतुम० ॥ १५ ॥ व्रीहिजास्तंडुलाःशुद्धाःपितृदेवद्विजप्रियाः ॥ दानेनानेनमेसंतुसर्वकामाश्चसंपदः ॥ १६ ॥ गोधूमदा०॥धान्यचूडामणिर्जंबूद्वीपेगोधूम

shrinath.udupa@gmail.com

संज्ञका ॥ गंधर्ववनसंज्ञानाम० ॥ १७ ॥ यावनालाः ॥ यावनालाःप्रियकराःशांतिपुष्टिफलप्रदाः ॥ दानेनानेनवैयस्माच्छांति
रस्तुसदासम ॥१८॥ मापदा० ॥ यस्मादेवहितार्थायविष्णोर्देहसमुद्भवाः ॥ पितृतृप्तिकरामाषाःमयच्छंतुशुभांगति ॥१९॥ मुद्गाः ॥
मुद्गबीजानिवैयस्मात्प्रियाणिपरमेष्ठिनः ॥ तस्मादेषांप्रदानेनममसंतुष्य० ॥२०॥ चणकाः ॥ गोवर्धनगिरेर्भारंसमयेहरिरक्षिताः॥
॥ चणकाःसर्वपापघ्नाममशांतिप्रयच्छतु ॥ २१ ॥ कुलित्थाः ॥ अग्निगर्भोद्भवाःसौम्यावलारोग्ययशप्रदाः ॥ कुलित्थाः
सर्वपापघ्नाह्यतः० ॥ २३ ॥ निष्पावाः ॥ निष्पावानिर्मिताःपूर्वलोकानांचहितायवै ॥ दानेनानेनवैयस्मादतःशां० ॥ २३ ॥
यवाः ॥ पूर्वमेवहियज्ञार्थंनिर्मिताब्रह्मणायवाः ॥ अनेनयवदानेनशांतिरस्तुसदासम ॥ २४ ॥ प्रियंगवः ॥ प्रियंगवःप्रिया-
यस्मादग्नेर्वैयज्ञसाधनाः ॥ तस्मात्प्रियंगुदानेनशांति० ॥ २५ ॥ अथश्यामाकाः ॥ श्यामाकास्तुसदापुण्यानिर्मिताब्रह्मणापु
रा ॥ दानेनानेनवैयस्मादतःशांतिम० ॥ २६ ॥ कोद्रवाः ॥ कोद्रवानिर्मितादेवैःप्राणिनांचहितायवै ॥ यस्मात्तेषांप्रदाने-
नअतः० ॥ २७ ॥ मसुराः ॥ मसुराःपुष्टिदालोकेब्रह्मणानिर्मिताहिताः ॥ तस्मादेषांप्रदानेनअतः० ॥ २८ ॥ कंवलदानं ॥
हिमनाशकरंपुण्यंकंवलंबलवर्धनं ॥ दानेनानेनवैयस्माद० ॥ २९ ॥ अन्नदानं ॥ अन्नंब्रह्ममयंसाक्षाल्लोकानांप्राणरक्षणं ॥
अन्नदानेनवैकामान्नभुत्कासायुज्यमाप्नुयात् ॥ ३० ॥ जलदानं ॥ जलंब्रह्ममयंनित्यंजीवनंनिस्कारणं ॥ जलदानेनवैय-
स्माद्वांच्छितंफलमश्नुते ॥ ३१ ॥ अथमंडकदानं ॥ सूर्यमंडलसंभूतासर्वमंगलदायकाः ॥ मंडकाःसर्वदोषघ्नाःशांतिदाः
स्युःसदामम ॥ ३२ ॥ तैलदानं ॥ तैलंतिलसमुद्भूतंसर्वारिष्टनिवारकं ॥ दृष्टिदंपुष्टिदंचैवममानिष्टंप्रशाम्य

shrinath.udupa@gmail.com

तु ॥ ३३ ॥ नवनीतदानं ॥ क्षीरार्णवसमुद्भूतंविष्णोस्तुष्टिकरंपरं ॥ नवनीतंप्रदास्यामिप्रीतिमेदेहिसर्वदा ॥
॥ ३४ ॥ दुग्धदानं ॥ प्राणिनांजीवनंक्षीरंपितृदेवप्रियंवदा ॥ कांतिदंपुष्टिदंबलसमतःशां० ॥ ३५ ॥ दधिदानं ॥
दधिक्षीरोद्भवंदेवपितृणांतृप्तिकारकं ॥ अतस्तस्यप्रदानेनशांतिर० ॥ ३६ ॥ तक्रदानं ॥ तक्रंदधिसमुद्भूतंप्राणिनांशांतिदंप
रं ॥ अतस्तक्रप्रदानेनशां० ॥ ३७ ॥ पुष्पदानं ॥ मनोहराणिपुष्पाणिसदादेवप्रियाणिच ॥ अतस्तेषांप्रदानेनशां० ॥ ३८ ॥
फलदा० ॥ फलानिमधुराणीहदेवद्विजप्रियाणिच ॥ अतस्तेषां० ॥ ३९ ॥ प्रियंस्वादुकरंनित्यंफलंदत्तंमनोहरं ॥ तेनमे
सफलावाप्तिर्भवेज्ज० ॥ ४० ॥ छत्रं ॥ संपदांभूषणंछत्रंवर्षतापनिवारणं ॥ अनेकप्रीतिदंयस्मादतः० ॥ ४१ ॥ उपानद्दा०॥
उपानहौप्रदास्यामिशिलाकंटकरक्षणे ॥ पादसंरक्षणार्थायगृहाणत्वंसुखायमे ॥ ४२ ॥ शीतलोदककुंभ० ॥ वारिणापूरितंपा
त्रंतापत्रयहरंशुभं ॥ पितृणांतुष्टिदंत्वस्यगृहाणत्वं० ॥ ४३ ॥ व्यजनं० ॥ व्यजनंवायुदैवत्यंसर्वकालसुखावहं ॥ अस्यदाने-
नवैशांतिःसर्वदास्तुगृहेमम ॥ ४४ ॥ गृहदानं ॥ इदंगृहंगृहाणत्वंसर्वोपस्करसंयुतं ॥ तवप्रियप्रदानेनममसंतुमनोरथाः ॥ ४५
॥ चंदनं० ॥ काष्ठानामुत्तमंशैलंमहादेवेननिर्मितं ॥ गंधप्रियकरंपुण्यमतः ॥ ४६ ॥ शिविका० ॥ शिविकासुखदानित्यंमहाल-
क्ष्मीप्रियासदा ॥ संप्रदानेनवैतस्याःसर्वदास्तुसुखंमम ॥ ४७ ॥ पंचकः ॥ पंचकोरोगसंहर्तासर्वसौख्यप्रदायकः ॥ संप्रदानेन-
मेनित्यंशांतिरस्तुसदालये ॥ ४८ ॥ शयनीयं० ॥ सुखदंशयनंयस्मात्केशवस्यप्रियंसदा ॥ दानेनानेनसौभाग्यंसर्वदास्तुगृहेमम ॥
॥ ४ ॥ कशिपुदानं ॥ मृदुनिर्बीजकार्पासपुरितंसुखदंनृणां ॥ कशिपोश्चप्रदानेनसुखंस्यात्सर्वदामम ॥ ५० ॥ तांबूलं ॥ तांबूलं

shrinath.udupa@gmail.com

सुखदंलोकेसर्वदामंगलप्रदं ॥ प्रियंचैवशिवदेवानामतः० ॥ ५१ तिलपात्रदानं ॥ तिलपात्रंसदापुण्यंसुवर्णतिल-पूरितं ॥ दानेनानेनमेनित्यंसर्वारिष्टंप्रशाम्यतु ॥५२॥ धान्यं ॥ सर्वदेवमयंधान्यंसर्वप्रीतिकरंमहत् ॥ प्राणिनांजीवनंधान्यम तः० ॥ ५३ ॥ दासी० ॥ दासीयंप्रत्यहंगेहेमार्जनादिक्रियाकरी ॥ संप्रदानेनचैवास्याःसुखसंपत्सदास्तुमे ॥ ५४ ॥ श-य्या०॥तांबुलपुष्पसंयुक्तांनानापरिमळैर्युतां ॥ वस्त्रेणाच्छादितांशय्यांनानारत्नसमन्वितां॥५५॥ धूपदाहान्वितंभव्यंभाजनंकांस्य निर्मितं ॥ मंचस्योभयतोदीपंव्यजनंचसुगंधिकं ॥ ५६ ॥ सजलंकलशंदंडंवैणवंचयथातथा ॥ स्थापितंशिरसोभागे पिददेशेत्युपानहौ ॥ ५७ ॥ कर्पूरंलालवंगादिद्रव्यंप्रीतिकरंशुभं ॥ सिंदुरांजनकस्तूरीहारिद्राकुंकुमांबरं ॥ ५८ ॥ सकंचुकंतथारवाद्यंविन्यसेद्राजनेशुभे ॥ प्रसार्याथनवंतत्रकशिपुंचोपबर्हणं ॥ ५९ ॥ कशिपोश्चप्रदानेनसुखंस्यात्सर्वदामम ॥ ॥ ६ ॥ पुरतोगंधपात्रादितथाचैवासनंन्यसेत् ॥ ६० ॥ पृष्ठदेशेतुवैछत्रंन्यसेपूंजांसमाचरेत् ॥ ततोविप्रंसमभ्यर्च्य दानंदद्याद्यथोचितं ॥ ६१ ॥ शोभनंमंचकंनव्यंपट्टेनैवसमावृतं ॥ प्रसार्याथनवंतत्रकशिपुंचोपबर्हणं ॥ ६२ ॥ सोपस्कारसमायुक्तंनानारत्नोपशोभितं ॥ पुष्पतांबूलसहितंनानापरिमळान्वितं ॥ मंचकोरोगनाशघ्नःसर्वसौख्यप्रदायकः संप्रदानेनमेनित्यंशांतिरस्तुसुखालये ॥ अशून्यंशयनंयस्मादतः० ॥ शय्यास्छाचात्मनोमूर्तिगौरीशंकरयोःप्रिया ॥ दानेना-स्याःसुखंचास्तुशांतिर्मेपदमव्ययं ॥ ६६ ॥ दिवोज्ञानप्रदोनित्यंदेवतायाःप्रियःसदा ॥ दानेनास्यभवेत्सौख्यंशांतिर्मेप दमव्ययं ॥ मज्योतिर्गुणपात्रंचदीपवांहसमुन्नतं ॥ सुखदंचास्यदानेनशांतिरस्तुसदाममं ॥ कुंकुमदानं ॥ कुंकुमंशोभनंदि

shrinath.udupa@gmail.com

व्यंसर्वदामंगलप्रदं ॥ दानेनास्यसदासौख्यंसौभाग्यशांतिरस्तुत ॥ ६९ ॥ सिंदूरदानं ॥ सिंदूरंशुभदंचैवगणनाथाप्रि
यंसदा ॥ दानेनास्यगृहेशांतिसुखंचास्तुसदाममम ॥ ७० ॥ कस्तूरी० ॥कस्तूरीभाग्यदाभव्योदेवमर्त्यीप्रयासदा ॥ दानेना-
नास्याःसुखंभाग्यंशांतिरस्तुसदाममम ॥ ७१ ॥ कलशदा०कलशःशुभदोभव्योजलेनपरिपूरितः ॥ दानेनास्यसदासौख्यं
शां० ७२ ॥ गंधदानं ॥ गंधोमनोहरोभव्यःशांतिदःसुखदःसदा ॥ संप्रदानेनचैवास्यशांतिरस्तुसदाममम ॥ व्यजनं०
व्यजनंवायुदैवसंघर्षकालेसुखप्रदं ॥ तस्मादस्यप्रदानेनम० ॥ ७४ ॥ कर्पूररुचिरंचित्रगृहाणेमंसुपूजितं ॥ पुण्यगंध-
स्थितासामेकमलाप्रीयतामिति ॥ ७५ ॥ दंडदानं ॥ भयनाशकरोदंडोवैणवोदेवनिर्मितः ॥ दानेनानेनचैवास्य० ॥ ताड
पत्रादि ॥ सौभाग्यद्रव्यदानंचस्त्रीनिःकार्यप्रयत्नतः ॥ सभर्तृकाभिःसंक्रांतौफलादीनांतथैवच ॥ दानंषोडशसंख्याक
मेकैकस्यचफलस्यच ॥ हेमरजतकांस्यानांभाजनानियथाक्रमं ॥ सगुडंतिलसंयुक्तंसुखंप्रीतिकरंनृणां ॥ संवर्धितंगृहा
णेदम० ॥ ८० ॥ हिरण्यादीनिपात्राणिमृद्भांडानितथापिवा ॥ गृहाणेमानिवैयस्मद्वास्करःप्रीयतामिति ॥ गो
धूमजनितंपिष्टंशिलायंत्रविनिस्तं ॥ द्विजश्रेष्ठगृहाणेदम० ॥ तंडुलदानं॥ तंदुलाःशालिजाःशुभ्राःसजलाःपात्रसंस्थिताः॥संप्रदा
नेनचैतेषांशां०॥सौवर्ण राजनंकांस्यंपायसान्नादिपुरितं॥ दानेनास्यचसौभाग्यंशांतिरस्तुसदावयोः ॥८४॥ अथव्यासप्रोक्तंफलपु
ष्पदानं ॥ कदळीदानं ॥ कदळीसर्वदोषघ्नीहेमवर्णीवरावृता॥ दानेनास्याःसुखंभाग्यंशांतिरस्तु० ॥ हेमपात्रं० ॥ जन्मांतर
सहस्रेषुयत्कृतंदुष्कृतंमया ॥ हेमपात्रप्रदानेनममपापं० ॥ रजतपात्र० ॥ कन्यादूषणतःपापंपरदाराभिमर्शनात् ॥ रौप्य

shrinath.udupa@gmail.com

पात्रप्रदानेनपापंगच्छतुमेसदा ॥ ताम्रपा० ॥ परापवादपैशून्यंदुष्टमांसस्यभक्षणं ॥ पापंगात्रस्थितंताम्रपात्रदानेननश्यतु ॥
॥ कांस्यपात्रं ॥ मयापापान्यनेकानिकामाकामकृतानिच ॥ कांस्यपात्रप्रदानेनतानिनश्यंतुमेसदा ॥ ५ ॥ लोहपा० ॥
॥ ज्ञानाज्ञानकृतंपापंयमलोककृतंचिरात् ॥ लोहपात्रप्रदानेनममपीडांव्यपोहतु ॥ ६ ॥ ताम्रपात्रं० ॥ सूर्यप्रीतिकरंताम्रमा-
रोग्यंबलवर्द्धनं ॥ तस्मादस्यप्रदानेनप्रीयतांमेदिवाकरः ॥ ७ ॥ कांस्यपा० ॥ कांस्यंब्रह्मशिवःसाक्षात्कांस्यमेतद्बिभावसुः ॥
॥ कांस्यंविष्णुमयंयस्मादतः० ॥ ८ ॥ अथरत्नदानानि ॥ यस्मात्सर्वेसुरत्नेषुदेवाःसर्वेव्यवस्थिताः ॥ रत्नदानेनमेशांतिम-
यच्छंतुसदामुराः ॥ ९ ॥ माणिक्यदानं ॥ माणिक्यंपद्मरागंचवैडूर्यंवज्रमेवच ॥ गोमेदंचमरंतर्कपुष्पपरागंचमौक्तिकं ॥ हरि
तंचनवैतानिरत्नानिचवदंतिहि ॥ मौक्तिकंभूषणंविष्णोःश्रियोगौर्याशिवस्यच ॥ दानेनास्याशिवंमेस्तुपरत्रसुखसंपदः ॥ प्र-
वाळदानं ॥ प्रवाळंपुष्टिदंकांतिवर्धनंशुभदंसदा ॥ दानेनास्यसुखंचैवशांतिरस्तुसदाममं ॥ मणिदानं ॥ मांगल्यमणयो
लक्ष्म्याःप्रियागौर्याश्चसर्वदा ॥ दानेनैवसुखशांतिःसौभाग्यंसर्वदास्तुमे ॥ तादंक० ॥ कर्णप्रसाददंस्त्रीणांभूषणंमंगलप्रदं ॥
॥ दानेनानेनवैचास्यसौभाग्यत्वंसदास्तुमे ॥ तैलदा० ॥ तैलंपुष्टिकरंनृणांलक्ष्मीदंमंगलंशुभं ॥ दानेनास्यतुमेशांतिःस-
र्वारिष्टंप्रशाम्यतु ॥ अथगजदानं ॥ ऐरावतश्चतुर्दंतोगजानांनायकश्चयः ॥ दिग्दंतिनांचसंपूज्यमतःपापंक्षयायतु ॥ प्रभुः ॥
॥ सुप्रतीकगजेंद्रत्वंसरसत्याभिषेचक ॥ इंद्रस्यवाहनश्रेष्ठसर्वदेवैश्चपूजित ॥ गजेंद्रमत्तमातंगदैत्यसैन्यविनाशक ॥ तव-
दानेनमेशांतिःसर्वदास्तुसुखंमम ॥ फलदानं ॥ इदंफलंमयादेव० ॥ तस्मात्फलप्रदानेनमम० ॥ विप्रायवेदविदुषेश्रो० ॥ नर-

shrinath.udupa@gmail.com

कोत्तारणार्थाय० ॥ अश्वदानं ॥ अश्वोविवाहनंभानोःकारणंहितथाक्रतोः ॥ संप्रदानेनमेचास्यशांतिरस्तुसुखंशिवं ॥ वृषभदा-
नं ॥ वृषभोधुर्यएवस्यान्महादेवप्रियःसदा ॥ संप्रदानेनचैवास्यशांतिरस्तुसुखंशिवं ॥ अजदानं ॥ अजाग्निवाहोयज्ञार्थंब्रह्मणा-
निर्मितःपुरा ॥ मेषदानेनवैशांतिःसुखंचास्तुसदामम ॥ छागदानं ॥ छागःप्रियोहियज्ञानामाहुतित्वेव्यवस्थितः॥ अस्यचैवप्रदा-
नेनशांतिरस्तु० ॥ अथदेवताप्रतिमादानं ॥ मृत्युंजयमहारुद्रगौरीवृषभवाहन ॥ संप्रदानेनदेवेशममसंतुमनोरथाः ॥ शिवनाभिः
शिवःसाक्षात्सक्षान्नारायणोपिवा ॥ दानेनास्यहरिहरौप्रसन्नौस्तांसदावयोः ॥ शालिग्रामशिलापुण्याभुक्तिमुक्तिप्रदायिनी ॥
शालग्रामप्रदानेनममसंतुमनोरथाः ॥ इतिशालग्रामदानं ॥ चक्रांकितशिलापुण्याशालग्रामशिलाशुभा ॥ दानेनैवभवेत्त
स्यउभयोर्वांछितंफलं ॥ शंखदानं ॥ शंखःशुभकरोनित्यंसर्वमंगलदायकः ॥ तस्मादस्यप्रदानेनशांति० ॥ घंटादानं
घंटादेवप्रियानित्यंमहानंदकराशुभा ॥ संप्रदानेनचैवास्याःशांतिरस्तुसदामम ॥ विष्णुमूर्तिदानं ॥ नारायणजगन्नाथश्री
पतेगरुडध्वज ॥ तवमूर्तिप्रदानेनप्रसन्नोभवसर्वदा ॥ सूर्यप्रतिमादानं ॥ ग्रहाणामधिपःसूर्यःपद्महस्तप्रभाकरः ॥ तस्मा
दस्यप्रदानेन०॥गणेशप्रतिमा०॥गणनाथोविघ्नहरोगौरिसूनुरभीष्टदः ॥ अस्यदानेनमेशांतिःप्रसन्नोभूद्विनायकः ॥ जगदंबादा
नं ॥ आदिमायामहाशक्तिर्विश्वमातर्जगन्मयी ॥ दानेनास्याःप्रसन्नास्तुसर्वदाममशांभवी ॥ पुस्तक० ॥ सरस्वतिज-
गन्मातःशुद्धब्रह्मादिदैवते ॥ पुस्तकस्यप्रदानेनरक्षमांपरमेश्वरि ॥ सोपस्करसमायुक्ताप्रियामूर्तिसदाक्षिणा ॥ गृहाणत्वं
द्विजश्रेष्ठममसंतुमनोरथाः॥ देशकालउपायेनद्रव्यंश्रद्धासमन्वितं ॥ पात्रेप्रदीयतेयत्तत्सकलंधर्मलक्षणं ॥ ददातिप्रतिगृह्णाति

shrinath.udupa@gmail.com

हिरण्यादिकमेवच ॥ भुक्त्वाभोगान्यथाकामंसोश्नुतेपदमव्ययं ॥ अथाभयतोमुखी ॥ यावद्वत्सस्यपादौद्वौमुखंयोन्यांचदृश्यते ॥ तावद्द्यौःपृथिवीज्ञेयायावद्वर्भनमुंचति ॥ संपूज्यतांसप्रसवांयःकरोतिप्रदक्षिणं ॥ सार्णवांसकलांपृथ्वींसप्रदक्षिणकृद्भवेत् ॥ सुपूजितामिमांगांयोददात्युभयतोमुखीं ॥ सागरांतोर्विदानेनतत्फलंलभतेध्रुवं ॥ सालंकृतांगृहाणेमांददाम्युभयतोमुखीं ॥ विष्णुरूपद्विजश्रेष्ठत्राहिमांभवसागरात् ॥ अथमहिषीदानं ॥ गृहाणमहिषींगृष्टींसवत्सांस्वर्णभूषितां ॥ ॥ सुनेत्रांचसुशृंगांचश्यामांसंपूर्णविग्रहां ॥ पयस्विनींसुशीलांतांदारिद्र्यतिमिरापहां ॥ हेमशृंगीरौप्यखुरींकांस्यघंटासमन्वितां ॥ सुसंभारावृतांरम्यांसालंकारांसदक्षिणां ॥ महिषींवस्त्रसंयुक्तांसुशीलांचपयस्विनीं ॥ नीलवस्त्रावृतांचाहंदास्ये मृत्युहरायच ॥ यमवाहानुमहिषीमृत्युरूपेणसंस्थिता ॥ सर्वव्याधिहराविप्रम० ॥ सरत्नंसजलंशृंगंधृत्वाविप्रकरेर्पयेत् ॥ ॥ कांस्यपात्रास्थितेपाणौदद्यादानेसदक्षिणां ॥ मृत्युरूपांगृहाणेमांमहिषींद्विजसत्तम ॥ मृत्योःसंत्राहिमांघोरात्गच्छत्वंयत्र कुत्रवा ॥ ततोबहिर्द्विजोगच्छेन्निरस्येदुदकंपथि ॥ तैलेनवाजलेनापिपुनश्चतर्पयेद्यमं ॥ आज्यावलोकनंकुर्यादशदानानिवै यतः ॥ अन्येभ्यश्चैवविप्रेभ्योदद्याच्छक्त्याचदक्षिणां ॥ अनेनविधिनाचैवमहिषीदानमुत्तमं ॥ यःकरोतिनरस्तस्यनचमृत्युभयंक्वचित् ॥ इतिमहिषीदानविधिः ॥ ऋतुपरत्वेदानमाह ॥ सम्यक्पूदद्याद्वसंतेन्नंजलंस्वादुसुशीतलं ॥ गंधपुष्पादिकंचैवब्राह्मणेभ्योविशेषतः ॥ ग्रीष्मेचोपानहौछत्रमन्नपानादिकंचहि ॥ हेमंतेपितथाचैवमदद्यादिंधनादिकं ॥ चित्रान्नंशैशिरेदद्यात्सर्पिर्दधिसमन्वितं ॥ ऋतुष्वेवंचतुर्थेषुकेचिदिच्छंतिसर्वदा ॥ नशक्नोत्यसमर्थश्चेन्नरोदातुंतदायदि ॥ पुण्यकालेथ

shripath.udupa@gmail.com

वादद्याच्चितंवित्तादिकंयदा ॥ पुण्यकालःसविज्ञेयश्चित्तंवित्तंयदाभवेत् ॥ अनित्यंचशरीरंस्याच्तस्मादानंसमाचरेत् ॥ इति
नारायणप्रवृत्तौदानप्रकरणं ॥ अथभूशुत्थिः ॥ भूशुद्धिर्मार्जनादाहात्कालाद्वोत्क्रमणादथ ॥ सेकादुल्लेखनाच्छेपात्गृहंमार्ज
नलेपनात् ॥ निर्लेपंकांचनंभाडंमृद्विरेवविशुध्यति ॥ अब्जमश्ममयंचैवराजतंचानुपस्कृतं ॥ गवाघ्रातानिकांस्यानिशूद्रो
च्छिष्टानियानिच ॥ शुध्यंतिदशभिःक्षारैःश्वकाकोपहतानिच ॥ भस्मनाशुध्यतेकांस्यंसुरयायन्नलिप्यते ॥ सुराशकृन्मूत्रपुरीषै
स्तुशुध्यंतेत्र्युपलेपनैः ॥ ताम्रमाम्लेनशुध्येतनचेदाभिषलेपितं ॥ आमिषेणतुयल्लिप्तंपुनर्दाहेनशुध्यति ॥ सूतिकोच्छिष्टभां
डस्यसुरामेध्यहतस्यच ॥ त्रिःसप्तमार्जनाच्छुत्थिर्नतुकांसस्यतापनं ॥ सूतिकाश्वानविण्मूत्ररजस्वलाहतानिच ॥ मक्षेसद्या
नितान्यग्नौयद्यद्यावदहेदपि ॥ सुवर्णरौप्यशंखाश्चमुक्तारत्नमयानिच ॥ कांस्यायस्ताम्रपात्राणित्रपुसीसादिकानिच ॥ नले
पितान्यशुध्यंतिकेवलेनजलेनतु ॥ शूद्रोच्छिष्टानशुध्यंतित्रिधाक्षाराम्लवारिणः ॥ ब्रह्मक्षत्रविशांचैवसकृत्संमार्जितंशुचि ॥
॥ व्रीहयःप्रोक्षणादद्भिःशाकमूलफलानिच ॥ तन्मात्रस्यापहाराद्वानिस्तृषीकरणेनवा ॥ चांडालाध्युषितेयत्र
यत्रमूत्रादिसंगतिः ॥ एवंकश्मलभूयिष्ठाभूरमेध्यामकीर्तिता ॥ श्वसूकरखरोष्ट्राद्यैःसंस्पृष्टादुष्टतांव्रजेत् ॥
॥ अंगारतुषकेशास्थिभस्मादैर्मलिनाभवेत् ॥ यस्यवास्यादमेध्यासामृत्युर्वाप्रसवेपिच ॥ पंचधावाचतुर्धा
वापूर्ववद्भूर्विशुध्यति ॥ इतिभूतशुत्थिः ॥ अथगृहशुद्धिः ॥ गृहशुद्धिप्रवक्ष्यामित्वंतस्त्वांशवदूषणे ॥ प्रोत्सृ
ज्यमृन्मयंभांडंशुद्धमन्नंतथैवच ॥ गृहपादस्यतत्सर्वंगोमयेनोलेपपयेत् ॥ अद्भिःसंप्रोक्ष्यचैवाथश्वानेनघ्रायतेबुधः ॥ ब्राह्म-

shrinath.udupa@gmail.com

णैर्मंत्रपूतैश्चहिरण्यकुशवारिणा ॥ सर्वमभ्युक्षयेद्देदेस्ततःशुध्यतदसशयः ॥ इतिगृहशुद्धिः ॥ अथपात्रशुद्धिः ॥ निर्लेप
कांचनंभाडंमृद्भिरेवविशुध्यति ॥ अब्जमश्ममयंचैवराजतंचानुपस्कृतं ॥ चरुस्रुक्चरुमल्लेहपात्राण्युष्णेनवारिणा ॥ सलेपा
नामलेपानांवारिणाशुद्धिरिष्यते ॥ यज्ञसाधनभूतानांपात्राणांचैवसर्वदा ॥ स्रुवादीनांचसर्वेषांवारिणाशुद्धिरिष्यते ॥
गवाघ्रातानिकांस्यानिशूद्रोच्छिष्टानियानिच ॥ शुध्यंतिदशभिःक्षारैःश्वकाकोपहतानिच ॥ भस्मनाशुध्यतेकांस्यंसुरयायन्न
लिप्यते ॥ सुरामूत्रपुरीषैस्तुशुध्यंतेत्त्र्युपलेपनात् ॥ ताम्रमाम्लेनशुध्येतनचेदामिषलेपनं ॥ आमिषेणतुसंलिप्तंपुनर्दाहेनशुध्यति ॥ सू
तिकोच्छिष्टभांडस्यसुरायेध्यहतस्यच ॥ त्रिःसप्तमार्जनाच्छुद्धिर्नतुकांस्यतापनं ॥ सूतिकाश्वानविण्मूत्ररजस्वलाहतानिच ॥
प्रक्षेप्तव्यानितान्यग्नौयावद्यावदहेदपि ॥ सुवर्णरौप्यशंखास्मशुक्तिरत्नमयानिच ॥ कांस्यायस्ताम्रपात्राणित्रपुसीसादिकानिच ॥
निर्लेपनानिशुध्यंतिकेवलेनजलेनतु ॥ शूद्रोच्छिष्टानिशुध्यंतित्रिभाक्षाराम्लवारिभिः ॥ ब्रह्मक्षत्रविशांचैवसकृत्संमार्जनाच्छुचिः ॥
चतुर्थेनतुयद्भुक्तंचतुर्भिस्तत्रमार्जनं ॥ अग्नौप्रक्षिप्यगृह्णीयाद्धस्तेप्रक्षाल्ययत्नतः ॥ गोशृंगेणतुसंस्पृष्टंतत्पात्रंशुचितांव्रियात् ॥
गंडूषंपादशौचंचयःकुर्यात्कांस्यभाजने ॥ षण्मासंभुविनिक्षिप्यउत्थ्रस्यपुनःसाधयेत् ॥ लोहानांदहनाच्छुद्धिर्भस्मनागोम
येनवा ॥ दहनात्खननाद्वापिशैलानामंभसापिवा ॥ काष्टानांप्रोक्षणाच्छुद्धिर्मृद्गोमयजलैरपि ॥ एवंभोजनपात्राणांमुक्तो
यंपूर्वसूरिभिः ॥ संहतानांतुपात्राणांयद्येकमुपहन्यते ॥ तत्रैवशोधनंप्रोक्तंमासान्यद्द्रव्यशुद्धिकृत् ॥ इतिपात्रशुद्धिः ॥
॥ अथ धान्यशुद्धिः ॥ व्रीहयःप्रोक्षणाद्द्रिःशाकमूलफलानिच ॥ तन्मात्रस्यापहाराद्वानिस्तुषीकरणेनवा ॥ गृहदाहे

shrinath.udupa@gmail.com

समुत्पन्नेपशौदग्धेचमानुषः ॥ आमोज्यस्तद्गतोव्रीहिर्धर्मात्तुद्रव्यसंगृहाः ॥ मृन्मयेनावदानानामधोभुविचतिष्ठति ॥ यवमा
षतिलादीनांनदोषंमनुरब्रवीत् ॥ नचात्रपाणिनोयत्रकेवलंगृहदीपनं ॥ तत्रद्रव्याणिसर्वाणिगृण्हीयादाविचारयन् ॥ धान्य
पूगतृणानांचकाष्ठानांचैवसर्वदा ॥ क्लिनानांवाप्यक्लिनानांमारुतेनैवशुध्यति ॥ इतिधान्यशुद्धिः ॥ अथान्नशुद्धिः ॥
पक्षिजग्धंगवाघ्रातमवधूतमवाक्षुतं ॥ दूषितंकेशकीटैश्चन्मृत्क्षेपेणविशुध्यति ॥ देवद्रोण्यांविवाहेषुयज्ञेषुप्रकृतेषुच ॥ काकैः
श्वभिश्चसंस्पृष्टमन्नंतंनाविसर्जयेत् ॥ तन्मात्रमन्नमुधृत्यशेषंसंस्कारमर्हति ॥ बहुष्वेवविजानीयात्कृतेष्वन्नेषुवैयतः ॥ पक्वंद्रोणा
दधिकंत्वन्नंकाकश्चाद्युपातितं ॥ ग्रासमुधृत्यतन्मात्रंयत्तुलालकृतोभवेत् ॥ हेमोदकेनवाभ्युक्ष्यराजतेनांबुनाथवा ॥ अग्नि
ज्वालोपसंस्पर्शात्सुवर्णमधुसर्पिषा ॥ द्रव्याणांप्लावनेनैवधनानांप्रोक्षणेनवा ॥ छागेनचोपसंस्पृष्टमन्नंतच्छुचितामियात् ॥
श्रपणंघृततैलानांप्लावनंगोरसस्यच ॥ भांडानिप्लावयेद्विद्वःशाकमूलफलानिच ॥ द्रव्याणांचैवसर्वेषांशुद्धिरुत्पवनंस्मृतं ॥
मोक्षणंसंहतानांचदारवानांचतत्क्षणात् ॥ घृतंचैवदधिक्षीरंतथैवेक्षुरसोगुडः ॥ शूद्रभांडस्थितंतक्रंतथामधुनदुष्यति ॥ आ
ममांसंघृतंक्षौद्रंस्नेहाश्चफलसंभवाः ॥ म्लेंछभांडस्थितादुष्यानिष्कृताशुचयस्कृतः ॥ निर्यासानांगुडानांचलवणानांतथैवच ॥
कुसुंभकुसुमानांचत्यूर्णाकार्पासयोस्तथा ॥ मृत्पर्णतृणकाष्ठानांश्वभिश्चांडालवायसैः ॥ स्पर्शनेविहितंशौचंसोमसूर्यादिमारुतैः ॥
उच्छिष्टोनतुसंस्पृष्टोद्रव्यहस्तःकथंचन ॥ इतिअन्नशुद्धिः ॥ अथजलशुद्धिः ॥ अविगंधारसोपेतानिर्मलाःपृथिवींगताः ॥ अ
क्षीणाश्चैवगोपानाआपःशुद्धिकरास्मृताः ॥ भूमिस्थंमुदकंमेध्यंतृषायत्रतुगौर्भवेत् ॥ अवाप्तमेदंमध्यमेनतद्देवशिलागतं ॥

shrinath.udupa@gmail.com

॥ उद्धृतावाप्रशस्तास्युःशुद्धपात्रेयथाविधि ॥ एकरात्रोषितास्तान्युस्त्वभेदाःस्मृद्धृताः ॥ अक्षोभ्यानितडागानिनदीवा
पिसरांसिच ॥ चंडालाद्यशुचिस्पर्शेनतीर्थपरिवर्जयेत् ॥ वापीकूपतडागेषुमानुषंशीर्यतेयदि ॥ अस्थिचैवविनिर्मुक्तेचिर
कालोभवेद्यदि ॥ दत्यरेदुद्धकंसर्वंपंचपिंडान्मृदांतथा ॥ प्रक्षिपेत्पंचगव्यंचततःशुद्धिमवाप्नुयात् ॥ श्वभिश्चकाकचांडालै
र्दूषितेपुविशोधनं ॥ घटानांशतमुत्धृत्यपंचगव्यंक्षिपेत्ततः ॥ उपानच्छ्लेष्मविण्मूत्रस्त्रीरजोमद्यमेवच ॥ एभिस्तुदूषितःकूपोकुं
भानांषष्टिमुत्धरेत् ॥ जलाशयेस्वल्पजलेस्छावरेचमहीतले ॥ कूपवत्कथिताशुत्थिर्महत्सुनचदूषणं ॥ चांडालभांडसंस्पृष्टं
पीत्वाकूपगतंजलं ॥ गोमूत्रयावकाहारैस्त्रिरात्रेणैवशुध्यति ॥ अजागावोमहिष्यश्चब्राह्मण्यश्चप्रसूतिकाः ॥ दशरात्रेणशु-
ध्यंतिभूमिस्छेचनवोदकं ॥ इतिजलशुत्थिः ॥ अथवस्त्रशुद्धिः ॥ अहतंचनवंश्वेतंसदशंनान्यधारितं ॥ पवित्रंतद्विजानी
याद्वस्त्रंसकलकर्मसु ॥ वस्त्रंमृदंभसाशुध्येद्रज्जुर्वेदलमेवच ॥ रज्वादिकंचदुष्टंचेत्यजेत्तन्मात्रमेवच ॥ यदिमूत्रपुरीषाभ्यांरेत
सारुधिरेणवा ॥ चैलंसमुपहन्येतह्यद्भिःप्रक्षालयेत्ततः ॥ अद्भिस्तुप्रोक्षणाच्छौचंबहूनांधान्यवाससां ॥ प्रक्षालनेनत्वल्पा-
नामद्भिःशौचंविधीयते ॥ उर्णाकौशेयकुतपपट्टक्षौमदुकूलजाः ॥ अल्पशुद्धाभवंत्येतेशोषणात्प्रोक्षणादिभिः ॥ तान्येवामे
ध्ययुक्तानिक्षालयेच्छोधनैःस्वकैः ॥ तूलिकामुपधानंचपुष्पंरक्तांबरंतथा ॥ शोषयित्वातपेत्कांचित्करैःसमार्जयेन्मुहुः ॥
॥ पश्चात्तुवारिणाप्रोक्ष्यविनियुंजीतकर्मणि ॥ चैलवच्चर्मणांशुत्थिर्वेदछानांतथैवच ॥ शाकमूलफलानांचधान्यवच्छुत्थिरि
ष्यते ॥ जलभस्महरिद्राभिर्लेपनंकथ्यतेबुधैः ॥ तैलगोमयगोमूत्रैश्चर्मणांशुत्थिरिष्यते ॥ आविकंपट्टमूलंचपवित्रंचैवसर्व

shrinath.udupa@gmail.com

दा ॥ अक्षेष्वक्षेपनेचैत्यात्तावत्प्रक्षालनंस्मृतं ॥ पवित्रपुष्पकुशादीनिधृत्वावासोऽपिशुध्यते ॥ एषाचमनेनस्याच्छुद्धिरेव
विदुर्बुधाः ॥ श्व्याकर्दमतोयानिनावःपायितृणानिच ॥ चारुतेनैवशुध्यंतिपक्वेष्टकानितान्यपि ॥ रेतःस्पृष्टंशवस्पृष्टंस्पृष्ट-
मूत्रपूरीषयोः ॥ रजस्वलाभिःसंस्पृष्टमूर्णावातेनशुध्यति ॥ इतिवस्त्रशुद्धिः ॥ अथदेहशुद्धिः ॥ अद्भिर्गात्राणिशुध्यंति
मनःसत्येनशुध्यति ॥ विद्यातपोभ्यांशुद्ध्यात्माबुद्धिर्ज्ञानेनशुध्यति ॥ अजाश्वामुखतोमेध्यागावोमेध्याश्चपृष्ठतः ॥ योषितः
सर्वतःशुद्धाःकारुहस्तःशुचिःसदा ॥ एवंसंक्षेपतःशुद्धिःसर्वेषांकथिताबुधैः ॥ विज्ञेयाशुद्धिरेवन्येषांविशेषाःस्मृतितोन्यतः ॥
॥ इतिश्रीमन्नारायणविरचितायांधर्मप्रवृत्तौद्रव्यशुद्धिप्रकरणं ॥ अथप्रायश्चित्तान्युच्यंते ॥ कृतानांचैवपापानांज्ञानाज्ञान
कृतेपिवा ॥ उच्यतेषापिनांशुद्ध्यैप्रायश्चित्तविनिर्णयः ॥ वेदवेदांगतत्वज्ञाःधर्मशास्त्रविशारदाः ॥ स्वधर्मनिरतादांतातेषां
षांपापंनिवेद्यच ॥ एकोवावेदविद्धर्मंयोव्याचष्टेसमाहितः ॥ सविज्ञेयःपरोधर्मोनाज्ञायांनियुतोनतु ॥ विज्ञाप्यनखरोमाणि
प्रवाप्यस्नानमाचरेत् ॥ केशानांवपनंकृत्वाप्रायश्चित्तंसमाचरेत् ॥ केशानांरक्षणार्थायद्विगुणंव्रतमाचरेत् ॥ रा-
जावाराजपुत्रोवाब्राह्मणोवाबहुश्रुतः ॥ सर्वान्केशान्समुत्सृज्यछेदयेदंगुलद्वयं ॥ सर्वत्रैवहिनारीणांशिरसोमुंडनंस्मृतं ॥
॥ भस्मगोमयमृद्वारिपंचांगव्यादिकल्पतैः ॥ मलापकर्षणंकार्यंबाह्यशौचापनुत्तये ॥ संध्यकृत्वात्वाशुचिर्भू-
त्वासार्द्रवासाःसमाहितः ॥ प्रदक्षिणावेयंकृत्वापापानितुनिवेदयेत् ॥ मयानैवप्रवेष्टव्यावक्तव्यंनासमंजसं ॥
अब्रुवन्निब्रुवन्वापिनरोमवतिकिल्बिषी ॥ योज्ञात्वाधर्मशास्त्राणिप्रायश्चित्तंप्रयच्छति ॥ प्रायश्चितीभवेत्पूतोवक्तारंकि-

shrinath.udupa@gmail.com

लिवर्षंव्रजेत् ॥ अनर्चितमनाहूतमपृष्टंचयथाविधि ॥ प्रायश्चित्तनदातव्यंज्ञानवद्भिरपिद्विजैः ॥ प्रायश्चित्तमकुर्वाणाःपापेषु
निरताद्विजाः ॥ अपश्चात्तापिनःकष्टान्नरकान्यांतिदारुणान् ॥ तामिस्रंलोहशंकुंचमहानिरयशाल्मलिं ॥ रौरवंकुतलंपू-
तिमृत्तिकंकालसूत्रकं ॥ संघातंलोहितोदंचसविषंसंप्रतापनं ॥ महानरककाकोलंसजीवनमहापथं ॥ अवीचिमंधतामिस्रं
कुंभीपाकंतथैवच ॥ असीपत्रावनंचैवपतनंचैकविंशतिः ॥ महापातकजैर्घोरैरुपपातकजैस्तथा ॥ अनुयांतित्वनाचीर्णप्राय-
श्चित्तानराधमाः ॥ विहितस्याननुष्ठानान्निंदितस्यनिषेवणात् ॥ अनिग्रहाच्चेंद्रियाणांनरःपतनमृच्छति ॥ तस्मादेनेनक
र्तव्यंप्रायश्चित्तंविशुत्थये ॥ एवमस्यांतरात्माचलोकश्चैवप्रसीदति ॥ प्रायश्चित्तैरपैत्येनोयदज्ञानकृतंभवेत् ॥ कामतोव्यवहा
र्यस्तुवचनादिहजायते ॥ ब्रह्महाभ्यपस्तैयीतथैवगुरुतल्पगः ॥ एतेमहापातकिनोयश्चतैःसहसंवसेत् ॥ हंतानुमंतोपदेष्टाव-
क्ता.दातातथैवच ॥ युद्धोपदेशकश्चैवतथासंप्रतिघातकः ॥ प्रोत्साहकःसहायश्चतथामार्गानुदर्शकः ॥ अनिषिद्धाक्षमोयस्तु
सर्वेब्रह्महनःस्मृताः ॥ अकार्यकारिणामेषांप्रायश्चित्तंप्रकल्पयेत् ॥ आकृष्टताडितोवापिधनैर्वाविप्रयोजितः ॥ समुद्दिश्यस्व
जनाणांस्तमाहुर्ब्रह्मघातकं ॥ असंबंधेनयःकश्चिद्विजःप्राणान्परित्यजेत् ॥ तस्यैवतद्भवेत्पापंनतुयंपरिकीर्तयेत् ॥ गुरूणा
मध्यविक्षेपोवेदनिंदासुहृद्वधः ॥ ब्रह्महत्यासमंचैदमधीतस्यचनाशनं ॥ यज्ञेविवाहकार्येचत्वन्यस्मिन्धर्मकर्मणि ॥ विघ्नं-
समाचरेद्यस्तुतमाहुर्ब्रह्मघातकं ॥ निषिद्धभक्षणंचैवउत्कर्षेचवचेभृतं ॥ रजःस्वलामुखास्वादःसुरापानसमंभवेत् ॥ अश्व
त्थमनुष्यस्त्रीभूधेनुहरणंतथा ॥ निक्षेपस्यचसर्वंहिसुवर्णस्तेयसंमितं ॥ सखीभार्याकुमारीषुस्वयोनिष्वंत्यजासुच ॥ पितृष्व-

shrinath.udupa@gmail.com

सामातुलानीस्नुषामातृस्वसाऽपि ॥ मातुःसपत्नीभागनीआचार्यतैनयातथा ॥ आचार्यपत्नीस्वसुतांगछेत्तुगुरुतल्पगः ॥
॥ छित्वालिंगंवधस्तस्यसकामायास्त्रियास्तथा ॥ अथोपपातकानि ॥ गोवधोव्रात्यतास्तेयभ्रूणानांचानपक्रिया ॥ अना
हिताग्नितापण्यविक्रयःपरवेदनं ॥ भृत्यादध्ययनादानंभृतकाध्यापनंतथा ॥ पारदार्यपारिवेत्र्यंवार्धुष्यंलवणक्रिया ॥ स्त्रीशूद्र
तृभतृवधोनिंदितार्थोपजीवनं ॥ नास्तिक्यंव्रतलोपस्तुसुतानांचैवविक्रयः ॥ धान्यकूपपशुस्तेयमयाज्यानांचयाजनं ॥
॥ कन्यादिदानंतस्यैवकौटिल्यंव्रतलोपनं ॥ आत्मनोर्थेक्रियारंभोमद्यपस्त्रीनिषेवणं ॥ स्वाध्यायाग्निसुतत्यागोवांधवत्यागए
वच ॥ इंधनार्थेद्रुमच्छेदःस्त्रीहिंसौषधिजीवनं ॥ हिंसयंत्रविधानंचव्यसनादात्मविक्रयः ॥ शूद्रसख्यंहीनसख्यंशूद्रयोनिनि
षेवणं ॥ तथैवानाश्रमेवासःपरान्नपरितुष्टता ॥ असच्छास्त्राधिगमनमाकरेष्वधिकारिता ॥ भार्याविक्रयणंचैवमेकैकमुप-
पातकं ॥ महापातकतुल्यानिपापान्युक्तानियानितु ॥ तानिपातकसंज्ञानितन्यूनमुपपातकं ॥ ब्राह्मणस्यरुजंकृत्वाघ्राति
चाघ्रायमद्ययोः ॥ ज्यैष्ठ्यंचमैथुनंपुंसिजातिभ्रंशकरंस्मृतं ॥ खरोष्ट्राश्वमृगेभानामजाविकवधस्तथा ॥ संकरीकरणंप्रोक्तंमहि
षस्यवधस्तथा ॥ निंदितेभ्योधनादानंवाणिज्यंशूद्रसेवनं ॥ अपात्रीकरणंप्रोक्तंअसत्यस्यचभाषणं ॥ क्रिमिकीटकयोर्हि
त्यामेध्यदुर्गंधिसेवनं ॥ मलिनीकरणंप्रोक्तमुक्तादन्यत्रकीर्त्तितं ॥ अथप्रायश्चित्तं ॥ शिरःकपालीध्वजवान्भिक्षाशीकर्म
वेदयन् ॥ ब्रह्महाद्वादशाब्दानिमितभुक्शुध्यतीतामिति ॥ तच्चरेद्ब्रह्महासर्वव्रतंद्वादशवार्षिकं ॥ समाप्तेतुशतंदद्याद्गवामस्मि
न्व्रतेमति ॥ अज्ञात्वाब्राह्मणंहत्वासामान्यंद्विजसत्तमः ॥ प्रायश्चित्तमिदंकुर्याद्विधिनाद्वादशादिकं ॥ ब्राह्मणस्यापरित्रा

shrinath.udupa@gmail.com

णात्गवांद्वादशकस्यवा ॥ तथाश्वमेधावभृतस्नानाद्वाशुध्यत्यमाप्नुयात् ॥ दीर्घतीव्रामयग्रस्तब्राह्मणंगामथापिवा ॥ दृष्ट्वा पथिनिरातंचकृत्वातुब्रह्महाशुचिः ॥ आनीयविप्रसर्वस्वंहृतंघातितएववा ॥ तन्निमित्तंक्षतःशस्त्रैर्जीवतोपिविशुध्यति ॥ अरण्येनियतोजप्त्वात्रिःकृत्वावेदसंहितां ॥ हत्वागुरुंश्रोत्रियंचआहिताग्निमथापिवा ॥ अज्ञानतोयदाहन्याद्विगुणंव्रतमाचरेत् ॥ ॥ तदात्मानंदहेदग्नौनिहन्याद्यदिकामतः ॥ एतदुक्तंब्राह्मणस्यद्विगुणंक्षत्रियस्यतु ॥ वैश्यस्यत्रिगुणंप्रोक्तंशूद्रादीनांचतुर्गुणमित्यादि ॥ इतिब्रह्महत्यादिप्रायश्चित्तं ॥ गौडीपैष्टीचमाध्वीचविज्ञेयात्रिविधासुरा ॥ यथैवैका तथासर्वानपातव्याद्विजोत्तमैः ॥ सुरावैमदमत्तानांपाप्माचमलमुच्यते ॥ तस्मात्ब्राह्मणराजन्यौवैश्यश्चनसुरांपिबेत् ॥ मधुकंचैक्षवंक्षीरंतालंखर्जूरनारिकं ॥ नपातव्यंद्विजैर्मद्यमपेयंयावनालकं ॥ सुरांबुव्रतगोमूत्रपयसामग्निसन्निभं ॥ सुराया न्यतमंपीत्वामरणंशुद्धिमाप्नुयात् ॥ बालवधाद्राजवधाद्ब्रह्महत्याव्रतंचरेत् ॥ पिण्याकंवाकणान्वापिभक्षयेत्तुसदानिशि ॥ अज्ञानात्तुसुरांपीत्वारेतविण्मूत्रमेववा ॥ पुनःसंस्कारमर्हतित्रयोवर्णाद्विजातयः ॥ पतितोकन्नसायातिब्राह्मणीवासुरांपिबेत् ॥ इहैवसाशुनीगृध्रीसूतकीचैवजायते ॥ आपःसुराभाजनस्थामद्यभांडस्थितास्तथा ॥ प्राजापत्यंचरेत्पीत्वाछर्दित्वोपवसेदिवं ॥ ॥ इतिसुरापानप्रायश्चितं ॥ अथस्वर्णस्तेयप्रायश्चित्तं ॥ ब्राह्मणःस्वर्णहारीतुराज्ञेमुसलमर्पयेत् ॥ स्वकर्मख्यापयंस्तेनहतोमुक्तोपिवाशुचिः ॥ अनिवेद्यनृपेशुध्येत्सुरापव्रतमाचरेत् ॥ आत्मतुल्यसुवर्णंतुदद्याद्विप्रायतुष्टिकृत् ॥ सुवर्णंतुसुवर्णमाषपरिमितं ॥ अपत्दत्यसुवर्णस्यमाषमात्रंद्विजाधमः ॥ गोमूत्रयावकाहारैःस्त्रिभिर्मासैर्विशुध्यति ॥ रौप्यंदत्वाद्विजोमोहाच्चरेच्चांद्रय

shrinath.udupa@gmail.com

णंव्रतं ॥ गनर्णदशकादूर्ध्वंद्विगुणंत्रिगुणंचरेत् ॥ इतिस्त्रर्णस्तेयं ॥ अथगुरुतल्पप्रायश्चित्तं ॥ गुरुतल्पगसूमिज्वन्मार्ज-
मीवविशुध्यति ॥ स्वयंवाशिश्नवृषणंनिकृत्वाधार्यचांजलौ ॥ निर्क्रातिदिशमातिष्ठेदार्यादादाजिह्मकः ॥ पितृभार्यांतुवि-
ज्ञायसवर्णांयोधिगच्छति ॥ जननींवाप्यविज्ञायमृतःशुद्धिमवाप्नुयात् ॥ गुरोःक्षत्रस्तांभार्यांपुनर्गत्वात्वकामतः ॥ लिंगाग्रंछे
दयित्वातुततःशुध्येत्सकिल्बिषात् ॥ गुरोर्भार्यांतुयोवैश्यांपुनर्गत्वात्वकामतः ॥ अंडमात्रंसमुत्कृत्यशुत्थोजीवन्मृतोपिवा ॥
पुनःशूद्रांगुरोर्गत्वायदिविमोवियोहितः ॥ ब्रह्मचाहतदुष्टात्माद्वादशाब्दव्रतंचरेत् ॥ एतत्व्रताविशुद्धिस्तुपतितेषुउदाहृता ॥
स्त्रीणामतीष्टसक्तानामेषएवविधिःस्मृतः ॥ अथसंसर्गप्रायश्चित्तं ॥ योयेनपतितेनैवसंसर्गयातिमानवः ॥ सतस्यैवव्रतंकुर्यात्तत्सं
सर्गविशुद्धये ॥ एभिस्तुसंवसेद्योवैवत्सरंवापितत्समः ॥ कन्यांसपुद्वहेदेपांसोपवासामकिंचनां ॥ यजनंयोनिसंबंधंस्वाध्यायंसह
भोजनं ॥ कृत्वासद्यःपतत्येवपतितेननसंशयः ॥ संल्लापस्पर्शशयनंसहयानासनाशयात् ॥ याजनाध्यापनादानात्पापंसममतं
नृणां ॥ संसर्गमाचरेद्विप्रःपतितादिष्वकामतः ॥ पंचाहंवादशाहंवाद्वादशाहमथापिवा ॥ मासार्धमासमेकंवामासत्रयम
थापिवा ॥ अब्दार्धमब्दमेकंवाभवेदूर्ध्वंतुतत्समः ॥ पंचाहेतुचरेत्कृछ्रंद्वादशाहेतप्तकृछ्रकं ॥ पराकस्त्वर्धमासेस्यान्मासेचांद्राय
णंचरेत् ॥ मासत्रयेतुकुर्वीतकृछ्रचांद्रायणोत्तरं ॥ षण्मासिकेतुसंसर्गेषडब्दंव्रतमाचरेत् ॥ इतिमहापातकप्रायश्चित्तं ॥ अ-
थोपपातकप्रायश्चित्तं ॥ बाल्यप्रभृतियत्पापमज्ञात्वाचोपपादितं ॥ षडब्देनैवशुध्येतमहतःपातकादृते ॥ उपपातकमभ्यस्तं
महापातकतांव्रजेत् ॥ द्वादशाब्दकृतेनैवतस्यशुत्थिस्तुनान्यथा ॥ कृतोपवासोवसेद्गोष्ठेचर्मणातेनसंवृतः ॥ चतुर्थेहनिचा

shrinath.udupa@gmail.com

श्नीयादक्षारलवणमितं ॥ गोमूत्रेणाचरेत्सोन्द्रौमासौनियतेंद्रियः ॥ दिव्यनूनञ्छतांगास्तास्तिष्ठन्त्यूर्ध्वरजःपिबेत् ॥ तिष्ठंति ष्वनुनिष्ठेतचरंतीताष्वनुव्रजेत् ॥ आसीनास्तुतथासीतनियतोजितमत्सरः ॥ आतुरामभिषिक्तांवाचोरव्याघ्रादिभिर्भयात् ॥ पतितांपंकमग्नांवासर्वप्राणैर्विमोचयेत् ॥ नकुर्वीतात्मनस्त्राणंगोस्तुकुर्यात्सशक्तितः ॥ अनेनविधिनायस्तुकृत्वागाःसम नुव्रजेत् ॥ सगोहत्याकृतंपापंत्रिभिर्मासैर्विशुध्यति ॥ वृषभैकादशागास्तुदद्यात्सुचरितव्रताः ॥ अविद्यमानेसर्वस्वंवेदविज्ञेनिवेद येत् ॥ गर्भिणींकपिलांदोग्ध्रीहेमधेनुंचसुव्रतां ॥ खट्वादिनाघातयित्वाद्विगुणंव्रतमाचरेत् ॥ पादमेकंचरेद्रोधेद्वौपादौवंध नेचरेत् ॥ योजनेपादहीनंस्याच्चरेत्सर्वंनिपानने ॥ पाषाणैर्लकुडैर्वापिशस्त्रेणान्येनयोबलात् ॥ निपातयतियोगास्तुकृत्स्नं कुर्याद्व्रतंहिसः ॥ अपालनात्तृणेष्वेवगौश्चरंतंकथंचन ॥ जलौघपल्वलमग्नामेघविद्युद्धतापिवा ॥ श्वभ्राद्वापतितांकस्माच्छान द्यैर्वापिभक्षिता ॥ प्राजापत्यंचरेत्कृच्छ्रंगोस्वामीव्रतमुत्तमं ॥ शृंगभंगेगोच्छभंगेवाचर्मनिर्भेदनेथवा ॥ प्राजापत्येनशुद्धिःस्या त्स्वस्छासायदिवाभवेद् ॥ व्रणमुत्पादनंयेनकुर्यात्सव्रणरोहणं ॥ मृत्युर्भवतिचेत्तेनगोहंतातस्यपुष्कला ॥ अतिदोहातिवहा भ्यांनासिकाभेदनेनवा ॥ नदीपर्वतसंरोधमृतेपादोनमाचरेत् ॥ अस्थिभंगंगवांकृत्वाकटिभंगंतथैवच ॥ यदिजीवतिष ण्मासंप्रायश्चितंनविद्यते ॥ एतदेवव्रतंकुर्युरुपपातकिनोद्विजाः ॥ अवकीर्णविशुध्यर्थंचांद्रायणमथापिवा ॥ एतच्चांद्राय णंत्वकामकृतेज्ञेयं ॥ कामकृतेतु ॥ दद्यात्त्रिरात्रंबोपोष्यवृषभैकादशात्सुगाः ॥ उपपातकशुद्धेःस्यादेवंचांद्रायणेनवा ॥ इत्युपपातकप्रायश्चित्तं ॥ क्षत्रियस्यवधंकृत्वाषडब्दंव्रतमाचरेत् ॥ अब्दौद्येवधतद्वत्तुशूद्रवधेचरेत् ॥ अंत्यजानांवधंकृ

shrinath.udupa@gmail.com

त्वाह्यब्दमेकंव्रतंचरेत् ॥ अप्रदुष्टांस्त्रियंहत्वाशूद्रहत्याव्रतंचरेत् ॥ हस्तिनंतुरगंछागंमहिष्युष्ट्रकपींस्तथा ॥ मृगंचरोहिणंह-
त्वाचरेच्चांद्रायणंव्रतं ॥ अजादिकंखरंश्वानंसृगालंसूतकंतथा ॥ मार्जारंशशकंहत्वाप्राजापत्येनशुध्यति ॥ कपोतकवकानां
चगृध्राणांप्लवकस्यच ॥ बधेत्वेषांप्राणिनांचपादकृच्छ्रंसमाचरेत् ॥ अनस्थीन्प्राणिनोहत्वाप्राणायामेनशुध्यति ॥ अस्थ्या
न्नवितवधेविप्रःकिंचिद्दद्याद्विशुध्यमे ॥ सावित्रीपतितायस्यदशवर्षाणिपंचच ॥ सशिरंवपनंकृत्वाव्रतंकुर्यात्समाहितः ॥
एकविंशतिरात्रंचपिबेत्प्रस्रुतियावकं ॥ भोजयेद्धविष्यान्नंब्राह्मणान्सप्तपंचच ॥ ततोयावकशुद्धस्यतस्योपनयनंस्मृतं ॥
एतदुपनयस्यपरमकालात्पूर्वंपरमकालेज्ञेयं ॥ अतऊर्ध्वंव्रात्यस्तोमादतेकृतेतिवचनात् ॥ गजाश्वस्थीदहरणेमणीनांरजतस्यच ॥
धनापहरणेचैवकुर्यात्सांवत्सरंव्रतं ॥ धान्यान्नधनचौर्याणिकृत्वाकामाद्द्विजोत्तमः ॥ स्वजातीयगृहेष्वेवकृच्छ्राब्देनविशुध्यति ॥
मनुष्याणांचहरणेरत्नानांचतथैवच ॥ कूपवापीजलानांचशुद्धिश्चांद्राचणेनच ॥ धान्यान्नहरणेकृच्छ्रंतिलानामैदवंस्मृतं ॥
सर्वेषांधातुजातीनांपराकंहरणेचरेत् ॥ दशगव्याणकादूर्ध्वंद्विगुणादिव्रतंचरेत् ॥ आसहास्तुत्रिगुणमर्धहेमविधिस्मृतं ॥
विजयेयद्व्रतंप्रोक्तंहरणेद्विगुणंहितत् ॥ हरणादशगुणंदत्वाप्रायश्चित्तंसमाचरेत् ॥ अजाभिषट्कार्यासताम्रधान्यतिलादिषु ॥
चतुर्गुणमृणंदत्वाप्राजापत्यंसमाचरेत् ॥ कांस्यसीसादिधातूनांद्विगुणंस्तेयमोक्षणं ॥ प्राजापत्यार्धभागश्चप्रायश्चित्तंविशोधनं ॥
गोहर्तुःसप्तकृच्छ्रस्यादर्द्धहस्त्यश्वहारके ॥ चतुर्गुणमृणंदत्वाशंखस्यैकादशोत्तरं ॥ भक्ष्यभोज्याधिहरणेयानशय्यासनेषुच ॥
पुष्पेमूलफलानांचकृच्छ्रंसांतपनंचरेत् ॥ यस्ययस्यतुवर्णस्यवृत्तछेदंसमाचरेत् ॥ तस्यतस्यवधेप्रोक्तंब्राह्मणानुमतंचरेत् ॥

shrinath.udupa@gmail.com

॥ कालेत्वाधायकर्माणिसम्यक्कुर्याद्विधानतः ॥ तदाकुक्कुटखरोत्रणमासिमासिविशुध्यति ॥ अनाहिताग्नौपित्रादौयक्ष्यमाणःसुतोयदि ॥ सद्विजासेनपशुनायजेत्तानिक्रियायतु ॥ सुरालवणमद्यानांकृत्वाक्षीरस्यविक्रयं ॥ लाक्षायाश्चैवमांसस्यतिलानांचघृतस्यच ॥ विक्रेतात्राणिनांचैवकुर्यात्कृछ्रंमहाव्रतं ॥ तैलमध्वादिसोमानांचरेच्चांद्रायणंव्रतं ॥ दध्नश्चेक्षुरसस्यैवगुडखंडादिविक्रये ॥ सर्वेषांस्नेहपक्वानांप्राजापत्यंसमाचरेत् ॥ भक्ष्यान्नानांचसर्वेषांप्राजापत्यं० ॥ उषवासंतुतक्रस्यनक्तंकांजिकविक्रये ॥ हेमरौप्यादिलोहानांकार्पासस्यांबरस्यच ॥ विक्रयेचित्रवस्त्राणांप्राजापत्यंस० ॥ पुंगीफलंमातुलिंगंद्राक्षांखर्जुरमेवच ॥ एतेषांपादकृछ्रंस्याद्धान्यादीनांचविक्रये ॥ कस्तुरिकादिगंधादिविक्रयेकृछ्रमाचरेत् ॥ नीलींविक्रीणियाद्यस्तुह्यादिदेशव्रतंचरेत् ॥ खरश्वाश्वतरीणांचगजानामैदवंस्मृतं ॥ गोविक्रयंद्विजःकृत्वाप्राजाप० ॥ चांद्रायणंप्रकुर्वीतएकाहाद्वेदविक्रये ॥ सर्वेषामेवविद्यानांपादकृछ्रं० ॥ रत्नानांविक्रयेकृछ्रंहिंग्वादीनांतथैवच ॥ अन्येषांचैवसर्वेषांपादकृछ्रंस० ॥ कामतःपरिवेद्येतुचरेदब्दत्रयंद्विजः ॥ समाप्तेब्देतुकन्यांतांज्येष्ठायचोपपादयेत् ॥ अज्ञात्वापारिवेदेचकृछ्रमेकंद्वयोःस्मृतं ॥ अतिकृछ्रंचरेद्धातापरिवेत्तोचांद्रायणंचरेत् ॥ अथागम्यागमनं ॥ रेतःसिक्काकुमारीषुस्वयोनिष्वंत्यजासुच ॥ ॥ सपिंडापत्यदारेषुप्राणत्यागोविधीयते ॥ व्रतस्थांविधवांगत्वाज्ञात्वाअर्द्धंसमाचरेत् ॥ गुरोर्दुहितरंगत्वातथैवभुनयोर्वधून् ॥ चांडालींपतितांम्लेच्छींस्नुषांचभगिनींसखीं ॥ मातापित्रोस्वसारंचनिक्षितांशरणागतां ॥ मातुलानींप्रव्रजितांसगोत्रांनृपयोषितं ॥ सखिभार्यांगुरोर्भार्यांभ्रातृभार्यांतथैवच ॥ पितृव्यपत्नींतनयांधात्रींचैवागतस्यच ॥ आसांगत्वाद्विजो

shrinath.udupa@gmail.com

मोहात्पडब्दंव्रतमाचरेत् ॥ कामतश्चेत्सकृद्दत्वाद्वादशाब्दंव्रतमाचरेत् ॥ द्वितीयेद्विगुणंप्रोक्तंतृतीयेत्रिगुणंस्मृतं ॥ ज्ञात्वातु-
कामतःकृत्वाह्यात्मभेदंनिकृंतयेत् ॥ अभ्यासात्कामतोगत्वानिष्कृतिर्नविधीयते ॥ चांडालांत्यस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यच ॥
॥ पतत्यज्ञानतोविप्रोज्ञानात्साम्यंतुगच्छति ॥ रजकश्चर्मकारश्चनटोबुरुडएवच ॥ कैवर्तमेदभिल्लाश्चह्यंत्यजाःसप्तकीर्तिताः ॥
॥ रजस्वलांद्विजोगत्वाह्यब्दकृच्छ्रंसमाचरेत् ॥ कंदर्पकामतोविप्रःपादकृच्छ्रंसमाचरेत् ॥ दिवाभिगमनेविप्रःस्नात्वातूपवसेदि
नं ॥ अहोरात्रंतुषष्ठ्यादौप्राजापत्यंतुपर्वणि ॥ शूद्राभिगमनेविप्रःप्राजापत्यंस० ॥ गर्भपातंसकृत्कृत्वाशूद्रहत्याव्रतंचरेत् ॥
॥ शूद्रीशयनमारोप्यब्राह्मणोयात्यधोगतिं ॥ तस्यांचैवप्रसूतस्यनिष्कृतिर्नैवविद्यते ॥ अभ्यासेवगुणावृत्यिमासादर्वाग्वि-
धीयते ॥ ततोमासगुणावृत्तियावत्संवत्सरोभवेत् ॥ ततःसंवत्सरगुणायावत्पापंसमाचरेत् ॥ तावत्कृच्छ्रंप्रकुर्वीतषडब्दंका
मतश्चरेत् ॥ ब्राह्मणींकामतोगछेत्क्षत्रियोवैश्यजामपि ॥ गोमूत्रपाचकेमासादत्तार्धाचविशुध्यति ॥ विप्राशूद्रेणसंपृक्तानचैत
स्मात्प्रसूयते ॥ प्रायश्चित्तंस्मृतंतस्याःषडब्दंव्रतमुत्तमं ॥ क्षत्राःशूद्रेचसंपृक्तेचरेच्चांद्रायणत्रयं ॥ चांद्रायणंच
रेत्कृच्छ्रंचरेद्वैश्याश्च गमे ॥ शूद्रंगत्वाचरेद्वैश्याकृच्छ्रंचांद्रायणंचरेत् ॥ अनुलोम्येनकुर्वीतकृच्छ्रपादंचरोपितं ॥
॥ बलाद्यदिगृहीत्वाचेन्मैथुनंपापकर्मभिः ॥ सकृत्कृतेसंतपनेसतुप्रस्रवणेशुचिः ॥ कामतःशूद्रसंपर्केह्यंत्यजे
र्वातथैवच ॥ प्रविशेत्संप्रदीप्तेग्नौमृत्युनाचविशुध्यति ॥ यत्पुंसःपरदारेपुसमानेपुव्रतंचरेत् ॥ व्यभिचा
राच्चभर्तुःस्त्रीतदशेषंसमापयेत् ॥ कथंचित्ब्राह्मणींगछेत्क्षत्रियोवैश्यएवच ॥ चतुरब्दंषडब्दंचप्रायश्चित्तंविधीयते ॥

shrinath.udupa@gmail.com

शूद्रस्तुब्राह्मणींगच्छेत्कथंचित्कामसंमोहितः ॥ द्वादशाब्दव्रतेनैवतस्यशुद्धिस्तुनान्यथा ॥ कामतोब्राह्मणींगच्छेच्छूद्रोवाब्रह्मस्त्रजोपिवा ॥ प्रविशेत्संप्रदीप्तेग्नौमृत्युनाचविशुध्यति ॥ अथनानाविधप्रायश्चित्तं ॥ अग्निहोत्रापवित्थाग्निर्ब्राह्मणःकामकामतः ॥ चांद्रायणंचरेन्मासंबालहत्यासमंहितत् ॥ यावंत्यब्दान्यतीतानिनिरेग्रस्तुद्विजजन्मनः ॥ तावत्कृछ्रंचरेत्धोमंविप्रेसर्वसमापयेत् ॥ गोष्ठेवसन्ब्रह्मचारीमासमेकंपयोव्रती ॥ गायत्रीज्याप्यनिनिरतोमुच्यतेसत्प्रतिग्रहात् ॥ कृछ्रत्रयंचरेद्भ्रात्योयाजकोपिचरन्नपि ॥ प्लाव्यवेदंजीवमानस्त्यत्काचशरणागतं ॥ गुरुंहुंकृत्यतुंकृत्यविप्रंनिर्जित्यवादतः ॥ वाध्वावाचासमाक्षिप्तंप्रसाद्योपवसेदिनं ॥ प्राणायामंजलेकृत्वाखरयानोष्ट्रयानगः ॥ नग्नस्नात्वाचभुत्काचगत्वाचैवादिवास्त्रियं ॥ पतितादव्यमादत्तेभुंक्तेचाब्राह्मणोयदि ॥ कृत्वातस्यसमुत्सर्गमतिकृछ्रंविशोधनं ॥ विप्रदंडोद्यमेकृच्छ्रःमतिकृछ्रंनिपातने ॥ कृछ्रातिकृछ्रशक्त्यांचकृछ्रमांतरशोणिते ॥ पथिचांडालकंदृष्ट्वाकुर्यात्सूर्यावलोकनं ॥ यदिसंभाषणंचैवगायत्रींतुसकृज्जपेत् ॥ द्विजश्चांडालभांडस्थंसलिलंपिबतेयदि ॥ षण्मासंतुचरेकृछ्रमब्दमन्नस्यभक्षणे ॥ अज्ञानाद्ब्राह्मणोभुंक्तेशूद्रस्यान्नमनातुरः ॥ तस्यपापविशुध्यर्थंप्राजापत्यत्रयंचरेत् ॥ ज्ञानाचेद्ब्राह्मणोभुंक्तेषण्मासंव्रतमाचरेत् ॥ शूद्रहस्तेनयोश्नीयात्पानीयंवापिवेत्क्वचित् ॥ अहोरात्रोषितोभूत्वापंचगव्येनशुध्यति ॥ महापापोपपापाभ्यांयोभिशंसेन्मृषापरं ॥ अभक्षाभक्षमासीतसजापिनियतेंद्रियः ॥ ब्राह्मणस्यव्रणद्वारपूयशोणितसंभवे ॥ क्रिमिरुत्पद्यतेयेनप्रायश्चित्तंकथंभवेत् ॥ गवांमूत्रपुरीषेणदधिक्षीरेणसर्पिषा ॥ स्नात्वोपवासेनस्वर्णदानेनशुध्यति ॥ स्त्रियाःक्षीरंसकृत्पीत्वाकथंचिद्यदिमोहितः ॥ पुनःसंकृत्यचात्मानंप्राजापत्यंचरेत्ततः ॥ ब्रह्मचारीतुयोश्नीयान्मधुमांसंकदाचन ॥

shrinath.udupa@gmail.com

प्राजापत्यंचरेत्कृच्छ्रंत्रीहामेनशुध्यति ॥ सूर्योदयेतुयःशेतेतथाचास्तंगतेरवौ ॥ ब्रह्मस्तेनावुभावेतुह्यहोरात्रोषितःशुचिः ॥
मिथ्याभिशंसिनंद्विजोद्विःसलोमूत्रवादिनः ॥ मिथ्याभिशस्तेदोषंचसमादत्तेमृषावदन् ॥ क्रोधाउन्मादमर्म्यत्वंभार्यायांतुनरःक्वचि
प्राजापत्यंचरेत्कृच्छ्रंतस्यपापविशुद्धये ॥ विप्रस्योक्त्यामृषाभाषंकृत्वातुशपथंमृषा ॥ ब्राह्मणोयावकानतीव्रंचांद्रायणंचरेत् ॥
भिक्षापात्रंशुचीत्वातुशुध्यमंत्रमुदीरयत् ॥ प्रतिग्राह्येषुसर्वेषुषष्टांशंचप्रकल्पयेत् ॥ चांद्रायेणनशुध्यंतिसर्वेयेचप्रतिग्रहाः ॥
कृत्वातस्यसुतस्यापिकृच्छ्रोविशोधनं ॥ कृष्णाजिनंचशय्यांचगजमश्वंरथंतथा ॥ लवणंद्विमुखींधेनुंगृहीत्वाज्यद्रुमाचरेत् ॥
ब्राह्मणोहीवर्णस्यकुर्यादौर्ध्वदेहिकं ॥ कामाल्लोभात्तथामोहात्कृत्वातज्जातितांव्रजेत् ॥ परेषांसवर्णानांहीनेषुतद्वैगुणात्रैगुण्याद्यंतं॥
व्रात्यानांयाजनंकृत्वापरेषामंत्यकर्मच ॥ अभिचारविहीनंचत्रिभिःकृच्छ्रैर्विशुध्यति ॥ * * * वेदत्रयावयेद्विजः ॥ वत्स
रंयावकाहारस्तस्यपापविशोधनं ॥ कन्याद्वेषीतुसोमस्याद्विक्रयीनास्तिकस्तथा ॥ मिथ्याशंसीकृतघ्नश्चगुरोःप्रत्युपकारकः ॥
मातापितृसुतत्यागीभार्यात्यागीतथैवच ॥ असच्छास्त्राभिगामीचतडागारामविक्रयी ॥ अयाज्ययाजकश्चैवकितवःकूटसाक्षकः ॥
तेचह्यात्मविशुध्यर्थंचरेयुर्वत्सरत्रयं ॥ छत्राकंविड्वराहंचलशुनंग्रामकुक्कुटं ॥ पलांडुंगृंजरंचैवमोहाज्जग्धापतेद्विजः ॥ अमत्यै
तानिषट्जग्ध्वाकृच्छ्रंसांतपनंचरेत् ॥ चांद्रायणंयतीनांचशेषेषूपवसेदथ ॥ संसर्गस्पृष्टंयच्चान्नंक्रियादुष्टमकामतः ॥ भूत्कास्व
भावदुष्टंचतप्तकृच्छ्रंसमाचरेत् ॥ मासिकंकणितंशाकंगोरसंलवणंघृतं ॥ हस्तदत्तानिभुक्त्वातुभोक्तासांतपनंचरेत् ॥ अतिथौ
तिष्ठतिद्वारेह्यदत्त्वाभ्यातियोद्विजः ॥ रुधिरंतद्भवेदन्नंभूत्काचांद्रायणंचरेत् ॥ सूतिकाघ्नैस्तुयद्भांडंस्पृष्ट्वात्स्पृष्टिनाथवा ॥

shrinath.udupa@gmail.com

तत्स्थंभुत्काद्विजोमोहात्त्रिरात्रेणैवशुध्यति ॥ चांडालपतितोदक्यावाक्यंश्रुत्वाद्विजोत्तमाः ॥ भुंजीरन्वापिवेयुर्वादिनमेकमभोजनं ॥ यद्वाभोजनकालेतुह्यशुचिःस्पृशतिद्विजं॥ अशित्वासर्वमेवान्नंत्रिरात्रेणैवशुध्यति ॥ अनाचांतःपिवेद्यस्तुभक्षयेद्यदिकिंचन॥ आपोशनमकृत्वातुततश्चांद्रायणंचरेत् ॥ शूद्रवेश्मनियोभुंक्तेपानीयंवापिवेत्कचित् ॥ अहोरात्रोषितोभुत्कापंचगव्येनशुध्याति ॥ घृतहीनंतुयोभुंक्तेनरस्त्वाहुतिपंचकं ॥ पश्चात्घृतेनयोभुंक्तेद्विजश्चांद्रायणंचरेत् ॥ सुरासंस्पृष्टभांडेतुरेतोविण्मूत्रदूषिते ॥ जलक्षीरादिवापीतेतप्तकृछ्रंसमाचरेत् ॥ विण्मूत्राद्युपघातास्तुआपःप्राश्यद्विजोत्तमः ॥ तस्यशुद्धिस्त्रिरात्रेणपुनःसंस्कारमर्हति ॥ अंत्यजैःखातिताःकूपास्तडागानितथैवच ॥ तत्रस्नात्वाचपीत्वाचप्राजापत्यंसमाचरेत् ॥ स्पृष्ट्वादृष्ट्वाचमदिरांविधिवत्प्रातिगृह्यच ॥ शूद्रोच्छिष्टांचयःपीत्वाकुशवारिंपिबेत्त्र्यहं ॥ अभोज्यान्नंद्विजोभुत्कात्रिरात्रेणैवशुध्यति ॥ मत्याभुत्काचरेत्कृछ्रंरेतोविण्मूत्रमेवच ॥ निराचारस्यविप्रस्यानिषिद्धाचरणस्यच ॥ अन्नंभुत्काद्विजःकुर्यात्प्राजापत्यचतुष्टयं ॥ महापातकिनस्त्वन्नंकृतघ्नस्यतथैवच ॥ अतिकृछ्रःसकृद्भुत्कामसाचांद्रायणंचरेत् ॥ आरूढपतितान्नंचसगोत्राभर्तुरेवच ॥ पाखंडानाश्रितानांचयतेश्चैवतथैवच ॥ जाति भ्रंशादिकंपापंकृत्वान्यतरदिच्छया ॥ चरेत्सांतपनंकृच्छ्रंप्राजापत्यमनिच्छया ॥ पादेनब्राह्मणंहत्वाप्रायश्चित्ताविधिच्छया ॥ त्रिरात्रोपोषितःस्नात्वाप्रणिपत्यप्रसादयेत् ॥ नीलीरक्तंयदावस्त्रंब्राह्मणोंगेषुधारयेत् ॥ अहोरात्रोषितोभूत्वापंचगव्येनशुध्यति ॥ रोमकूपेयदागच्छेद्रसोनील्यास्तुकस्यचित् ॥ त्रिवर्णेषुचसामान्यंतप्तकृछ्रविशोधनं ॥ नीलीदारुपदाभित्वाब्राह्मणस्यशरीरतः ॥ शोणितंदृश्यतेतत्रचरेच्चांद्रायणद्वयं ॥ नीलीमध्येयदागच्छेत्प्रमादाद्ब्राह्मणःकचित् ॥ त्रिरात्रोपोषितोभूत्वापंचगव्येनशुध्यति ॥

shrinath.udupa@gmail.com

अपांक्तेयश्चयःकश्चित्पंक्तौभुंक्तेद्विजोत्तमः ॥ विनायज्ञोपवीतेनभुक्तादिनमभोजनं ॥ अनापदिचरेद्यस्तुसिद्धभिक्षांगृहेवसन्॥ प्राजापत्येनशुध्यतेद्यापत्कालेऽयहंद्विजः ॥ नपंक्तौविषमंदद्याद्यचितंचेन्नदापयेत् ॥ प्राजापत्येनकृछ्रेणमुच्यतेकर्मणस्तथा ॥ नदीतरणकर्तुश्चकन्याविघ्नकरस्यच ॥ समेविषमकर्तुश्चनिष्कृतिर्नैवविद्यते ॥ होमकालेतथादोहेस्वाध्यायेदारसंग्रहे ॥ अंत रेणयदागच्छेद्विजश्चांद्रायणंचरेत् ॥ कन्यान्नधनलाभानांबुध्याविघ्नंसमाचरेत् ॥ प्रत्येकंप्राकृतंकुर्यात्ब्रह्मचर्यंतुवार्षिकं ॥ वेतनंकारायित्वातुयःपठेत्पाठयेद्विजः ॥ द्विजश्चांद्रायणंकुर्यात्ततःपापात्प्रमुच्यते ॥ अनिवर्त्यमहायज्ञान्योभुंक्तेप्रत्यहंगृही ॥ अनातुरोशितियत्वर्षत्र्यब्देनशुध्यति ॥ ब्रह्मचारीशुनादष्टस्त्र्यहंसायंपयःपिबेत् ॥ गृहस्छश्चेद्विरात्रंतुचैकाहंयोग्निहोत्रवान् ॥ नाभेरूर्ध्वंतुदष्टस्यतदेवाद्विगुणंचरेत् ॥ स्यादेतद्त्रिगुणंवक्त्रेमस्तकेचचतुर्गुणं ॥ रजस्वलायदिस्पृष्टाश्वानजंबुकरासभैः ॥ पंचरात्र निराहारात्पंचगव्येनशुध्यति ॥ प्रेतस्यप्रेतकार्याणिह्यकृत्वाधनहारितः ॥ वर्णानांयद्वधेप्रोक्तंतदर्धमयतश्चरेत् ॥ बलादा सीकृतायेनम्लेंछचांडालतस्करैः ॥ अशुभंकारितंयेनगवादिप्राणिहिंसनं ॥ उच्छिष्टमार्जनंचैवतथातस्यैवभोजनं ॥ खरोष्ट्रा विड्वराहाणांमहिषस्यचभक्षणं ॥ तत्स्त्रीणांचतथासंगताभिश्चसहभोजनं ॥ मासोषितोद्विजातौहिप्राजापत्यांविशोधनं ॥ चांद्रायणंपराकंचचरेत्संवत्सरोषितः ॥ उर्ध्वंसंवत्सराकल्पंप्रायश्चितंद्विजोत्तमैः ॥ संवत्सरैरस्त्रिभिश्चैवसद्भावंसनिगच्छ ति ॥ चांडालेनचसंस्पृष्टंकांस्यभांडादिकंचयत् ॥ तस्मिन्भुक्तेचरेत्कृछ्रंजलपानेतुकृछ्रकं ॥ चांडालपतितानांचासंचारेसमु पस्छिते ॥ अहोरात्रंत्रिरात्रंस्यात्त्रिरात्रेणैवत्वहःस्मृतं ॥ याम्यंघटमपांपूर्णंपर्यस्येत्प्रेतवद्गहिरित्यादि ॥ इत्युपपातकं ॥

shrinath.udupa@gmail.com

अथकृछ्रचांद्रायणादिलक्षणं ॥ तत्रव्रतांगभूतायमनियमाउच्यंते ॥ ब्रह्मचर्यदयाक्षांतिर्दानंसत्यमलौल्यता ॥ एकभुक्तेननक्तेनतथैवायाचितेनच ॥ उपवासेनचैकेनपादकृछ्रउदाहृतः ॥ यथाकथंचिद्त्रिगुणःप्राजापत्योयमुच्यते ॥ ॥ अयमेवाथकृछ्रस्यपाणिपूरान्नभोजनात् ॥ प्रातस्तुद्वादशग्रासाःसायंपंचदशैवतु ॥ अयाचितौद्वौचाष्टौवापादंनिरशनंस्मृतं ॥ सायंद्वाविंशतिर्ग्रासाःप्रातःपड्विंशतिस्तथा ॥ अयाचिताःषोडशाष्टावशक्तस्यउदाहृताः ॥ कुक्कुटांडप्रमाणंतुमयूरांडप्रमाणतः ॥ ग्रासप्रमाणंविज्ञेयंयथावासांविशेन्मुखे ॥ सायंप्रातस्तथैवैकंदिनद्वयमयाचितं ॥ दिनंदिनंप्रतिदिनंपराकः परिकीर्त्तितः ॥ गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं ॥ प्राश्यापरेतूपवसेत्कृछ्रंसांतपनंस्मृतं ॥ एकैकंप्रत्यहंपीत्वात्र्युपवासस्ततःपरं ॥ ससप्तनतुकृछ्रोयंमहासांतपनःस्मृतः ॥ अथगोमूत्रादिप्रमाणंब्रह्मकूर्चोक्तंज्ञेयं ॥ पिण्याकमात्मतक्रांबुसक्तूनांप्रतिवासरं ॥ एकरात्रोपवासश्चमहाकृछ्रोयमुच्यते ॥ एषांत्रिरात्रमभ्यासादेकैकस्ययथाक्रमं ॥ तुलापुरुषइत्येवंज्ञेयःपंचदशात्मकः ॥ एतद्भयंचनाश्नीयात्कृछ्रार्द्धंतद्विधीयते ॥ एकैकंवासमश्नीयादहानित्रीणिपूर्ववत् ॥ अहंश्चोपवसेदंसमाति कृछ्रःप्रकीर्त्तितः ॥ अहमुष्णंपिबेदापरंहमुष्णंघृतंपिबेत् ॥ अहमुष्णंपयःपीत्वावायुंभक्षंदिनत्रयं ॥ अयंतप्तकृछ्रःशक्तविषयः ॥ ॥ तप्तक्षीरघृतांबूनामेकैकंप्रत्यहंपिबेत् ॥ त्र्यहंचोपवसेत्तप्तंतप्तकृछ्रंसमाचरेत् ॥ क्षीरंतुद्विपलंतत्रघृतमेकपलंस्मृतं ॥ जलं तुत्रिपलंग्राह्यंपरिमाणंप्रकीर्त्तितं ॥ कृछ्रातिकृछ्रःपयसादिवसानेकविंशति ॥ द्वादशाहोपवासेनपराकःपरिकीर्तितः ॥ ॥ कृछ्रःपंचदशान्हिकः ॥ गोक्षीरंसप्तरात्रंतुपिबेत्स्तनचतुष्टयं ॥ स्तनत्रयंसप्तरात्रंसप्तरात्रंस्तनद्वयं ॥ स्तनेनैकेनषड्रात्रंत्रि

shrinath.udupa@gmail.com

रात्रंचान्नभुग्भवेत् ॥ एतत्सौम्यायनन्नामव्रतंकल्मषनाशनं ॥ स्वर्णोदुंबरराजीवबिल्वपत्रकुशोदकैः ॥ प्रत्येकंप्रत्यहंपीत्वा
पर्णकृच्छ्रउदाहृतः ॥ एतान्येवसमस्तानित्रिरात्रोपोषितःशुचिः ॥ क्काथयित्वापिबेदद्भिःपर्णकृच्छ्रोविधीयते ॥ पत्रैस्तुयःप
रंकृच्छ्रंपुष्पैस्तत्कृच्छ्रउच्यते ॥ फलैर्मासेनकथितःफलकृच्छ्रोमनीषिभिः ॥ श्रीकृष्णःश्रीफलैःप्रोक्तोमासेनाम्रफलैस्तथा ॥
॥ मूत्रकृच्छ्रःस्मृतोमूत्रैःस्तोयकृच्छ्रोजलेनतु ॥ तिथिवृध्याचरेत्पिंडान्शुक्लेशिरव्यडसंमितान् ॥ एकैकंन्हासयेत्कृष्णेपिंडंचांद्रा
यणंचरेत् ॥ हविष्यान्नंसमश्नीयाद्गायत्र्याचाभिमंत्रितं ॥ अमावास्यांनभुंजीतअपस्त्रिपवणंस्पृशेत् ॥ वर्द्धमानंतथासोमेग्रा-
संवर्धतेवैसदा ॥ हीयमानेचहीयंतेएतच्चांद्राय० ॥ अष्टवाथसमश्नीयात्पिंडान्मध्यंदिनेदिने ॥ नियतोयहविष्यस्ययति-
चांद्रायणंस्मृतं ॥ चतुर्ग्रासान्समश्नीयान्नियतात्माद्दृढव्रतः ॥ हविष्यंचैकमासंचऋषिचांद्रायणंस्मृतं ॥ यथाकथंचित्पिंडानां
चत्वारिंशच्चतद्वयं ॥ मासेनैवोपभूंजीतचांद्रायणमथापरं ॥ अनादिष्टेषुपापेषुशुद्धिश्चांद्रायणंस्मृतं ॥ धर्मार्थंयश्चरेदेतत्चंद्रस्यैति-
सलोकतां ॥ अथप्रत्याम्नायः ॥ जन्मप्रभृतिपापानिकृतानिसुबहून्यपि ॥ षडब्देनैवशुध्यंतिमहतःपातकादृते ॥ प्रत्या-
म्नायागवांदेयंमशीतिर्धानिभिःशतं ॥ दशलक्षाणिगायत्र्यास्तथाष्टौव्रतमाचरेत् ॥ प्राणायामसहस्राणिद्वादशत्रिगुणानिच ॥
॥ एवंनरोविशेषेणप्रायश्चित्तंसमाचरेत् ॥ तिलहोमस्यलक्षंतुसहस्राण्यष्यशीतिच ॥ प्रत्याम्नायसमागावोदक्षिणाहितथैवच॥
प्राजापत्येह्यशक्तस्तुगांदद्याच्छुभलक्षणां ॥ तदभावेतुनिष्कंस्यात्तर्धंपादमेवच ॥ विप्राभोज्याद्वादशैवउपवासास्तथैवच ॥
पारायणंसंहितायाःसमान्याहुर्मनीषिणः ॥ उपवासस्तुगायत्र्याःसहस्रंविप्रभोजनं ॥ प्राणायामशतंद्वौचसमेमतच्चतुष्टयं ॥

shrinath.udupa@gmail.com

अतिकृच्छ्रःपराकश्चतप्तकृच्छ्रस्तथैवच ॥ प्राजापत्यत्रयंचैवसममेतच्चतुष्टयं ॥ चांद्रायणचरंकृच्छ्रातगायव्याश्चयुतत्रयं ॥ गादा
नानितथात्रीणिसममेतच्चतुष्टयं ॥ पुण्यतीर्थेचार्द्रशिराःस्नानंद्वादशसंख्यया ॥ द्वियोजनंतीर्थयात्राप्राजापत्यसमंस्मृतं ॥
गायत्र्याःकोटिजप्तेनब्रह्महत्याव्यपोहति ॥ लक्षाशीतिंजपेद्यस्तुसुरापानात्प्रमुच्यते ॥ पुनातिहोमकर्तारंगायत्र्यालक्षसप्तति ॥
गायत्र्यापष्टिभिर्लक्षैःपुनातिगुरुतल्पगं ॥ मंडलंपावमानंचजपेन्निसंहविष्यभुक् ॥ मासमेकंतुनक्ताशीशुद्धिर्ब्रह्मवधादृते ॥
इंद्रमिंद्रमिदंसूक्तंमधुछंदेंद्रमेवच ॥ सुरापानात्प्रमुच्येतमासमेकंतुयोजपेत् ॥ षण्मासंवत्सरंवापिनियतोनियताशनः ॥ जप्त्वा
तुपौरुषंसूक्तंमुच्यतेसर्वपातकैः ॥ नारायणंजपेद्यस्तुरुद्रैकादशिकांतथा ॥ महापातकयुक्तोपिमुच्यतेनात्रसंशयः ॥ प्राणा
यामशतंकार्यंसर्वपापात्प्रमुच्यते ॥ उपपातकजातंतुत्वनादिष्टस्यचैवहि ॥ महाव्याहृतिहोमस्तुतिलैःकार्योद्विजत्मना ॥ उप
पातकशुध्यर्थंसहस्रंपरिसंख्यया ॥ निशायांवादिवावापियदज्ञानकृतंभवेत् ॥ त्रैलोक्यसंख्याकरणात्समस्तंप्रणश्यति ॥
वेदाभ्यासरतंशांतंमहायज्ञक्रियापरं ॥ नस्पृशंतीहपापानिमहापातकिनंविना ॥ इतिप्रायश्चित्तप्रकरणंसमाप्तं ॥ पितापिता
महोभार्याजामातामगिनीत्रयं ॥ महालयेगयाश्राद्धेसप्तगोत्राःप्रकीर्तिताः ॥ एकविंशत्युभाभ्यांचद्वादशद्वादशैस्तथा ॥
॥ दशद्विदशपंचकुलमेकोत्तरंशतं ॥ अथाद्धलक्षणं ॥ हिरण्यधान्यमन्नंचस्नानंवासागराप्सुच ॥ चतुर्विधानामेतेषामद्ध-
संज्ञामचक्षते ॥ सालंकृतंवागोदानंतन्मौल्यंवात्रिनिष्ककं ॥ हेमकृच्छ्रोभवेत्रिंशदद्धस्त्वेकउदाहृतः ॥ द्वादशाढकधान्यस्य
कृच्छ्रइत्यभिधीयते ॥ त्रिंशत्कृच्छ्रास्तएवस्युःकथितोद्धोबुधैरपि ॥ द्वादशद्विजभोज्येनकृच्छ्रस्त्वेकउदा० ॥ त्रिंशदेवहितेकृ-

shrinath.udupa@gmail.com

छ्राद्धेकाढ्कःपरिकीर्तितः ॥ समुद्रगामिनीस्नानमेककृच्छ्रस्तुएवहि ॥ कृछ्रास्तेत्रिंशदेकाढ्कःकथ्यतेमुनिभिःसदा ॥ षड्गुणीकृत
मेकाढ्कमेकैकंतुपृथक्पृथक् ॥ षडङ्गामिधुनाब्रूयात्प्रायश्चित्तंचतुर्विधं ॥ साशीतिशतसंख्याकाकृछ्राढ्कस्यचैवहि ॥ चतु-
र्विधानामप्येवंप्रायश्चित्तंविनिर्दिशेत् ॥ एवंकर्तुमशक्तश्चेद्यथावित्तानुसारतः ॥ तीर्थानुगमनंचैवस्नानहोमजपादिना ॥
॥ अत्रापिदशदानानिकुर्यात्पापक्षयायच ॥ यथोक्तविधिनाशक्त्यावशक्तौतुस्वशक्तितः ॥ निवर्तनमिताभूमिर्द्रोणत्रय
मितास्तिलाः ॥ सुवर्णनिष्कमात्रंस्यादाज्यंचैवाढकंस्मृतं ॥ सूक्ष्मवस्त्रद्वयंचैवगुडंचपलमष्टकं ॥ सार्धखारीद्वयंधान्यंत्री
ह्यःपरिकीर्तिताः ॥ निष्कत्रयमितंरौप्यंलवणंसार्धखारिकं ॥ प्रमाणंदशधान्यानांकीर्तयंतिमनीषिणः ॥ निवर्तनमानं
॥ बालवत्सकधेनूनांसहस्रंयत्रतिष्ठति ॥ तद्वैनिवर्तनंज्ञेयमितिशातातपोब्रवीत् ॥ साशीतिरेकाःकृच्छ्रास्युरेकाब्दपरिकीर्ति
तः ॥ षड्गुणीकृतचाढ्कस्यषडशद्भःपरिकीर्तितइत्यादि ॥ अथधान्यपरिमाणं ॥ पलद्वयंतुप्रसृतिर्द्विगुणंकुडवंस्मृतं ॥
॥ चतुर्भिःकुडवैःशूर्पप्रस्थःश्चत्वारआढकः ॥ आढकैस्तैश्चतुर्भिश्चद्रोणस्तुकथितोबुधैः ॥ कुंभोद्रोणद्वयःसूखारीद्रोणास्तुषोडशे
॥ अथसुवर्णपरिमाणं ॥ जालमूर्यमरीचिस्छंत्रसरेणुरजःस्मृतं ॥ तेष्टौलिक्षास्तुतास्तिस्रोराजसर्षपउच्यते ॥ गौरस्तुतेत्र
यःषडेयवमध्यस्तुतेत्रयः ॥ निष्कलःपंचतेमाषास्तेसुवर्णस्तुषोडश ॥ पलंसुवर्णाश्चत्वारःपंचवापिप्रकीर्तितं ॥ द्वौकृष्णले
रौप्यमाषौधरणंषोडशैश्चतैः ॥ शतमानंतुदशभिर्धरणैःपलमेवच ॥ निष्कःसुवर्णश्चत्वारःकर्षकस्ताम्रकःपणः ॥ अन्यःपक्षः
यवःस्यात्तर्षपैःषड्भिर्गुंजाचस्यात्त्रिभिर्यवैः ॥ गुंजाभिपंचभिश्चैकोमाषकःपरिकीर्तितः ॥ भवेत्षोडशभिर्माषैः ॥

shrinath.udupa@gmail.com

सुवर्णस्तैःपुनःस्मृतः ॥ पलंसुवर्णाश्चत्वारःपंचवापरिकीर्त्तितः ॥ मानंतुलांगुलिप्रस्थैर्गुंजाःपंचाद्यमाषकः ॥ तेषोडशस्तुकर्षोस्त्रीपलंकर्षचतुष्टयमित्यादि ॥ अथनिमेषादिनिर्णयः ॥ अक्षिपक्ष्मपरिक्षेपोनिमेषःपरिकीर्त्तितः ॥ द्वौनिमेषौत्रुटीनाम द्वेत्रुटीतुलवःस्मृतः ॥ द्वौलवौक्षणइत्युक्तंकाष्ठाप्रोक्ताक्षणादश ॥ त्रिंशत्काष्ठाःकलाप्रोक्ताकलात्रिंशन्मुहूर्तकः ॥ अन्हःपंचदशप्रोक्तामुहूर्ताःपूर्वसूरिभिः ॥ रात्रावपितथाप्रोक्ताअहोरात्रमितिस्मृतं ॥ मुहूर्तत्रितयंप्रातस्तावानेवाहिसंगवः ॥ मध्यान्हस्त्रिमुहूर्तःस्यादपराण्हस्तुतादृशः ॥ सायान्हस्त्रिमुहूर्तःस्यादित्येवंकथितोबुधैः ॥ अथपिंडप्रमाणं ॥ हेमाद्रावंगिराः ॥ कापित्थबिल्वमात्रान्वापिंडान्दद्याद्विधानतः ॥ कुक्कुटांडप्रमाणान्वामलकैर्बदरैःसमाः ॥ तत्रैवधूम्रः ॥ कुपिन्थस्यप्रमाणेनपिंडान्दद्यासमाहितः ॥ तत्समंविकिरंदद्यात्पिंडांतेपुषडंगुले ॥ अंगुष्टपर्वतौभट्टास्तु ॥ एकोद्दिष्टेसपिंडेचकपित्थंतुविधीयते ॥ नारिकेरप्रमाणंतुप्रत्यब्देपासिकेतथा ॥ तीर्थेदर्शेचसंप्राप्तेकुक्कुडांडप्रमाणतः ॥ महालये गयाश्राद्धेकुर्यादामलकोपमामितिआहुः ॥ कालिकायामाचार्यः ॥ यत्रस्युर्बहवःपिंडास्तत्रबिल्वफलोपमाः ॥ यत्रचैकोभवेत्पिंडस्तत्रखर्जूरसन्निभः ॥ प्रेतपिंडस्तुदैर्घ्येणद्वादशांगुलमुच्यतेतिवायवीये ॥ अथस्त्रीनामानि ॥ स्मृतिरत्नाकरग्रंथांतरे ॥ मार्गशीर्षेतुवाग्देवीततःपद्मावतीभवेत् ॥ श्रीर्देवीचैवसावित्रीभूकल्याणकरातथा ॥ सत्यभामापुण्यवतीरूपवत्याहमितिस्मृतिः ॥ चंद्रावतीचलक्ष्मीचस्त्रीनामकरणंक्रमात् ॥ पित्रादत्तंतुयन्नामभवेत्सांव्यवहारिकं ॥ विवाहेजन्मनामस्यान्न्यासनामाभिवंदने ॥ इति स्त्रीनामानि ॥ इतिश्रीनारायणभट्टविरचितायांधर्मप्रवृत्तौनिमेषादिप्रकरणंसमाप्तं ॥ श्रीवेंकटेशार्पणमस्तु ॥ ॥ ॥

shrinath.udupa@gmail.com

टीप—४५ व ४६ या पानांचे आंकडे जे पुढें मागें ह्मणजे ४६।४५ पडले आहेत ते सरळ वाचावे.

हें पुस्तक शहापूर येथें दत्तात्रय रामचंद्र तिळवे यांनीं आपल्या
धुंडिराज छापखान्यांत छापून प्रसिद्ध केलें.
मिति कार्तिक शुद्ध १० शके १८१२
विकृतिनामसंवत्सरे.

(सन १८६७ चे २५ व्या आक्टा प्रमाणें ह्या पुस्तका संबंधीं सर्व प्रकारचे हक
प्रसिद्ध कर्त्यानें आपणाकडे ठेविले आहेत.)